तीया चंद्रदर्शनी· परविद्धैव कर्तव्या पूर्वविद्धां परित्यजेत्· चंद्रोदये तृतीया चेद्दिनद्वयेपि वर्तते·
पूर्वविद्धा तदा कार्या यदि स्याद्दर्शनं विधोः दिनद्वयेपि चेन्न स्यात्तृतीयां चंद्रदर्शने· परविद्धैव कर्त
व्या पूर्वविद्धां परित्यजेत्· चंद्रोदये तृतीया चेद्दिनद्वयेपि वर्तते· पूर्वविद्धां परित्यज्य कर्तव्या पर
संयुता· अथ विनायकचतुर्थी· मासं स्मृत्विंसमारभ्य यावद्वर्षं भवेन्नृप· विनायकं व्रतं कुर्याच्छु श्रीरामः
चतुर्थ्यां पक्षयोर्द्वयोः विनायकव्रते ग्राह्या तृतीया सहिता न दा· चतुर्थी त्वन्यदेवस्य व्रते याद्याप्य २०
न्विताः बृहस्पतिः चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते· मध्याह्नव्यापिनी चेत्स्यात्परतश्चास्त

चेदहनि· मातृविद्धा प्रशस्तास्य चतुर्थी सर्वदा शुभा· मध्याह्नासनतश्चेत्स्यात्कार्या नागविद्धा प्रशस्यते· भविष्यो
त्तरे· मासि भाद्रपदे शुक्ले चतुर्थ्यां गणनायकं· अर्चयेन्मोदकाद्यैश्च स्नानदर्जपादिकं· चतुर्थी गण
६ नाथस्य मातृविद्धेति यच्च· दिनद्वयस्य साम्ये स्यादिति शास्त्रविदो विदुः गणनाथचतुर्थी तु मध्याह्नव्यापि
नी यदि जयासु तत्र न कर्तव्या कर्तव्या परसंयुता· सार्धप्रहरपर्यंतं चतुर्थी परिवर्तते· परविद्धैव कर्तव्या पूर्वविद्धां
परित्यजेत्· चतुर्थी गणनाथस्य संगवाते परेहनि· यदि न स्यात्तदा पूर्वं कर्तव्या शुभकांक्षिभिः नागचतुर्थी·
कार्तिके शुक्लपक्षे तु चतुर्थ्यां नागपूजनं· कृत्वा प्रदानं सर्वेभ्यो भयेरोगाद्विमुच्यते· पंचमीसहिता
कार्या चतुर्थी कार्तिके सिते· मध्याह्ने पूजयेत्सर्पान्गंधपुष्पाक्षतादिभिः सुगंधं दिने यत्र तत्र नो
व्यक्रणीश्वरान्· क्षीरेणाप्यायपंचम्यां पारयेत्स नरोत्तमः लिंगपुराणे· चतुर्थी गणनाथस्य गौर्यां चैव विधान
तः पूजां कृत्वा लभेत्सिद्धिं सौभाग्यं च नरः क्रमात्· कूर्मे· तिथ्योर्युग्मा द्वयायां च समुपोष्य यथाविधिः तत्रं रवपाला
दिनागानां शिवस्य च महात्मनः पूजां कृत्वा गंधपुष्पक्षीराप्यायनपूर्वकं विषाणि तस्य नश्यंति न चाहिंसंति
१८ पन्नगाः अथ संकष्टचतुर्थी· पुराणे· शृणु राजन्प्रवक्ष्यामि मंत्रैर्नागसंभवैः यदि कृष्णचतुर्थ्यां चैनि
शि चंद्रोदये नृप· चंद्रोदये यदा न स्याद्दिनद्वयेपि वा यदि· प्रदोषव्यापिनी ग्राह्या चतुर्थी संकष्ट

स्मृतिरत्नाकर
२१

ति॰ दिनद्वये पि वर्त्ते तच्चतुर्थ्यां तु विधूदये॰ परैव विधिभिः कार्या गणनाथपरायणैः॰ तत्रापीठं गणे
शस्य पूजयेत्तु कुसुमाक्षतैः॰ विधूदये यदा न स्याच्चतुर्थी संकटव्रते॰ तृतीयासंयुता कार्या सर्वदा
शुभकांक्षिभिः॰ चंद्रोदये यदा न स्याच्चतुर्थी यदि वा परा॰ तदा पूर्वैव कर्तव्या यदि चेत्स्याद्दिन
द्वये॰ सूर्योदये समारभ्य चतुर्थी या च वर्त्तते॰ चंद्रस्योदयपर्यंतं संभवेत्सर्वकामदा॰ अथ
नागपंचमी॰ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॰ द्वारस्योभयतो लेख्या गोमये
न विषोल्बणाः॰ पूजयेद्विधिवद्वीर दध्नि दूर्वांकुरैः कुशैः॰ गंधपुष्पोपहारैश्च ब्राह्मणानां
च तर्पणैः॰ ये तस्यां तत्र पूजयंतीह नागान् भक्तिपुरःसरान्॰ न तेषां सर्पतो वीर भयं
भवति कुत्रचित्॰ षष्ठीयुक्ता सदा कुर्यात् पंचमीनागपूजने॰ चतुर्थीसहिता चैव कर्तव्या
न कदाचन॰ नभस्य पंचमी शुक्ला त्रिमुहूर्त्तयुता परा॰ एकं चेत्तद्व्रते ग्राह्यास्तान्नैव
हि पूजने॰ नभस्य पंचमी यत्र संभवेत्त्वनुवर्तते॰ असायं सा तिथिः प्रोक्ता स्नानदानव्रता
र्चने॰ ग्रंथांतरे॰ उपवासे तिथिर्ग्राह्या पंचमी रविसंयुता॰ मध्याह्नव्यापिनी ग्राह्या षष्ठी यदि
परेहनि॰ षष्ठीयुक्ता सदा कुर्यात्पंचमीनागपूजने॰ स्कंदषष्ठी तु कर्तव्या पंचम्यां स

श्रीरामः
२१

यदि वा निष्फलं भवेत्॰ पंचमी सेव कर्तव्या॰

हिता बुधैः॰ नागविद्धा तु या षष्ठी शिवविद्धा चतुर्दशी॰ पूर्वविद्धा न कर्तव्या परविद्धा प्रशस्यते॰ स्मृत्यंतरे॰ षष्ठी
युतायां पंचम्यां श्रावण्यस्य सिते यदा॰ पूजयेत्सन्नगान्सर्पान् रम्यान् पयसादिभिः घृताक्तैर्नैव पय
सा स्नापयित्वा महोरगान्॰ अथ ऋषिपंचमी॰ भविष्योत्तरपुराणे॰ मासि भाद्रपदे शुक्ले पंचम्यां पूजयेन्
मुनीन्॰ प्रातर्नद्यां तु सुस्नातः कश्यपादींश्च सप्त वै॰ भाद्रे सिते च पूर्वाह्णे पंचमी यत्र तिष्ठति॰ ऋष्यासा
पंचमी ख्याता सर्वपापप्रणाशिनी॰ षष्ठीविद्धा पंचमी या महर्षेस्तत्र पूजनं॰ पतिपुत्रवती नारी सु स्नानी
स्वमेधसे॰ ग्रंथांतरे॰ मुहूर्त्तद्वितीयं वापि पंचमी यदि वा भवेत्॰ ऋषीणां पूजने चैव कर्तव्या व्र
तिभिः परा॰ चतुर्थीसंयुतायां तु पंचम्यां मुनिपूजनं॰ व्रतिभिर्नैव कर्तव्यं षष्ठीयुक्ता च भारत॰ ऋष्य
सा मुनिभिः प्रोक्ता सर्वपापप्रणाशिनी॰ स्कंदपंचमी॰ कश्यपः॰ शुचिः शुक्ले तु पंचम्यां त्यजेत्स्कंदं सुपो
षणं॰ पिष्टकः प्रातरान्नं कुर्याद्रात्रौ न्हृणां विधीयते॰ स्कंदषष्ठी॰ लिंगपुराणे॰ प्रसूतमपि पूजां च षष्ठ्यां
कुर्यान्मुहस्य च॰ दीपाग्निः सुसुरवी चास्या तस्मिन्नागो न वत्सरः॰ स्कांदे॰ नागविद्धा तु कर्तव्या ष

सप्तमी

स्मृतिरत्नाकर० क्षीरं तु कदाचन संयुता कार्या षष्ठी धर्मार्थचिंतकैः ब्रह्मकैवर्ते नहि षष्ठी नागविद्धा कर्तव्या तु कदाच
२२ नः नागविद्धा तु या षष्ठी शुक्लपक्षे भवेत् सप्तम्या सह कर्तव्या महत्पुण्यफलप्रदा अथातो · स्कंदे पप
सस्वीकार्य पंचमीपरसंयुता · चतुर्थीसंयुता या च न कर्तव्या कदाचन · मार्गशीर्षे तु या शुक्ला षष्ठ्यार्कवारान्वि
तका · सा चंपस्कंदषष्ठीस्या दुर्लभा पापनाशिनी · मार्गशीर्षे सिते पक्षे कर्तव्या स्कंदपूजनं · त्रिमुहू
र्तं तु यां षष्ठी परा सैवान्यथा पुरा स्कंदषष्ठी तु कर्तव्या पंचम्या सहिता बुधैः उपवासस्तु सा प्रोक्ता स्कंदस्य पूजने पुरा · सप्तम्यां
सहितायां च षष्ठ्यां स्कंदं प्रपूजयेत् · पारणं तत्र कर्तव्यं ब्राह्मणैः सह बंधुभिः । स्कंदे उपोष्य पंचमीसु
क्तां मार्गशीर्षे नराधिप · स्कंदषष्ठ्यां पूजयंति त्रीन् लोकान् जयंति ते · महाषष्ठी याषष्ठी शुक्लपक्षस्य मार्गशीर्षे विह
रिप्रिया · महाषष्ठी च विज्ञेया तस्यां दीप्तैः हुताशनैः देवद्विजसुहृद्भिश्च असीति पूर्णं तत्र दीयते · सीतस्नानं च त्रयस्मिन्
भविष्योत्तरे · योऽयं भाद्रपदे मासि षष्ठी च भरतर्षभ · स्नानं दानादिकं सर्वमस्यामक्षयमुच्यते · कपिलाषष्ठी · पुराण
समुच्चये · भाद्रमासस्यासितपक्षे भानौ चैव करस्थिते · पाले कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् · दिव्यैर्योगैः
क्तायं सूर्य पर्वशताधिकं · योगस्याद्यादि भे रात्रौ चंद्रषष्ठी सितास्मृता · तदुक्तं वाराहे · नभस्य कृष्णपक्षे तु रो
हिण्यां पातभूसुतैः युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता · व्रती पवासनियमैर्भास्करं तत्र पूजयेत् · श्रीरामः
कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेत् · अथ सप्तमी · माघे मासि सिते पक्षे सप्तमी स्याद्रथस्य तु · २२
रथा

नत्र स्नानं च दानं च तत्सर्वमक्षयं भवेत् · स्कांदे · यस्मान्मन्वंतरस्यादौ रथनाथो दिवाकरः माघमासस्य सप्तम्यां त स~
स्मात्सा रथसप्तमी · माघमासस्य कृष्णपक्षे तु सप्तमी या त्रिलोचना · जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिः सप्तमी
माघ मासस्य शुक्ला या चाष्टमीयुता · मुहूर्तमपि कर्तव्या स्नानदानव्रतादिषु · चंद्रिकायां · सूर्यग्रहणतुल्या तु शुक्ला
माघस्य सप्तमी · अरुणोदयवेलायां तत्र स्नानं महत्फलं · रविवारेण युक्तायां सप्तम्यामरुणोदये · पुन्नक्षत्रे सिते मा
घे भास्करस्य तु पूजयेत् · नरो गानं भयं तस्य नाम मन्त्युर्न चापदा · सर्वान् कामानवाप्नोति सूर्यलोकं स गच्छ
ति · गव्येन पयसान्नेन गृहीणां सम्यगर्चयेत् · अरोगी श्रियमाप्नोति रोगी रोगात् प्रमुच्यते · माघमासस्य सप्त
म्यामुदयत्येव भास्करः · विधिवत्कांतिलस्नानं महापातकनाशनं · स्नानमंत्रः अद्य जन्मकृतं पापं मया सप्तसु जन्म
सु · यन्मे रोगं च शोकं च रोगं च माघ्यैकि हंतु सप्तमी · अर्घ्यमंत्रः जननी सर्वभूतानां सप्तमी माघमासके · सप्तव्याहृति
के देवी नमस्ते रविमंडले · विजयसप्तमी · शुक्लपक्षस्य सप्तम्यां सूर्यवारे भवेद्यदि · सप्तमी विजया नाम तत्र दानं
महत्फलं · महाविजयसप्तमी · भविष्योत्तरे · शुक्लपक्षस्य सप्तम्यां यदा संक्रमते रविः महाजया समाख्याता
सप्तमी भास्करप्रिया · सर्वं कोटिगुणं तत्र भास्करस्य वचो यथा · नेवली यदि सप्तम्यामादित्यदिवसे भवेत् न
दूनं ग्राम सा हस्तमिति प्राह दिवाकरः · नंदासप्तमी · स्कांदे · नंदा सा कथिता नाम्ना सर्वानंदकरी सदा · स्ना
नदानादिकं सर्वं तस्यामक्षयमुच्यते · अथ जयासप्तमी · शुक्लपक्षस्य सप्तम्यां नक्षत्रं पंचतारकं · यदा च
स्यात्तदा ज्ञेया जय नामेति सप्तमी · स्नानदानादिकं सर्वं तस्यामक्षयमुच्यते · अथ जन्माष्टमी ·

स्मृतिरत्नाकर
२३

प्रकरणे प्रत्यवायस्य स्मरणात्· स्मृतिः· गृध्रं मांसं खरं काकं श्वानं च मुनिसत्तम· मांसं वा द्विपदं
भुंक्ते यो न जन्माष्टमीदिने· भविष्योत्तरे· श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं· न करोति महाप्राज्ञ व्या
लीभवति कानने· केवलेनोपवासेन तस्मिन् जन्मदिने मम· सप्तजन्मकृतात्पापान्मुच्यते· हिरण्यमे नात्र संशयः
दिनीं गां वा वासांसि कुसुमानि च· यद्यदिष्टं समं तत्र कृष्णो मे प्रीयतामिति· विष्णुधर्मोत्तरे· रोहिण्यां सहि
ता कृष्णा मासि भाद्रपदेष्टमी· सप्तम्यामर्धरात्राधः कलयापि यदा भवेत्· आदित्यपुराणे· अर्धरा
त्रादधश्चोर्ध्वं कलयापि यदा भवेत्· जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी· वह्निपुराणे· कार्या वि
कार्याविद्धा च सप्तम्यां सहि रोहिणीसहिताष्टमी· तत्रोपवासं कुर्वीत तिथिभांते च पारणं· व्यासः· अष्टम्यां
रोहिणीयोगे मध्यरात्रे दिनद्वये· तदोत्तरैव कर्तव्या न पूर्वेत्येष निर्णयः· दिनद्वयेप्यर्धरात्रवर्तिनि
यदि चाष्टमी· पराविद्धैव कर्तव्या पूर्वविद्धां परित्यजेत्· अष्टमी मध्यरात्रिस्तु यदि न स्याद्दिनद्वये·
पूर्वविद्धां परित्यज्य परविद्धा प्रशस्यते· भृगुः· जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च· पूर्वविद्धा
तु कर्तव्या तिथिभांते च पारणं· नारदीये· तिथिनक्षत्रसंयोगादुपवासो यदा भवेत्· पारणं
नैव कर्तव्यं यावन्नैकस्य संक्षयः· यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं· तिथियामत्रयादर्वा श्रीरामः
क्तिथिभांते च पारणं· गरुडे· अन्यतिथ्यागमे रात्रौ नामसंस्ते जसोपि वा· नामस्ये पारणं कुर्या २३
न्नामसंगतिमाप्नुयात्· एतानि अष्टमीव्यतिरिक्तविषयं· तथाह· अष्टम्यामथ रोहिण्यां पर्यायः

कुर्यात्पारणं क्वचित्· हन्यात्पुराकृतं कर्म उपवासार्जितं फलं· तिथिरष्टगुणं प्रोक्तं नक्षत्रं च चतुर्गुणं· व॰
तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणं· ब्रह्मवैवर्ते· केवलाशक्तस्य तु तिथिनक्षत्रयोरपि प्रातर्देवपूजानंतरं पा
रणं नैव दुष्यति· तथा· तिथ्यंते चोत्सवांते वा व्रती कुर्वीत पारणं· अशक्तश्च तथा प्रातः पारणं नैव दुष्यति· स्कां
दे· तिथिनक्षत्रनियमे तिथिभांते च पारणं· अतोन्यथा पारणे तु व्रतभंगमवाप्नुयात्· अथ ज्येष्ठाष्टमी· मासि
भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते· यस्मिन्कस्मिन्दिने कुर्यात् ज्येष्ठायाः परिपूजनं· यस्मिन्दिने सर्वज्येष्ठा मध्या
ह्नादूर्ध्वमप्यस्तु· तस्मिन्नहनि पूजा च पुनर्नैव पूर्ववासरे· यत्राष्टम्यां यदा भानोर्वारे ज्येष्ठर्क्षसंयुते· नीलज्येष्ठेति
सा प्रोक्ता दुर्लभा बहुकालिकी· कालदर्शे· भाद्रे शुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता· महतीं कीर्तिमाप्नो
ति ज्येष्ठां देवीं प्रपूजयेत्· ज्योतिः· मैत्रविद्धा सदा कुर्याज्ज्येष्ठा कामप्रदायिनी· मूलविद्धा न कर्तव्या ज्येष्ठा
कामप्रणाशिनी· मूलविद्धा कृता ज्येष्ठा पुरा दुर्योधनेन हि· आयुः क्षीणं गतं सर्वं तस्मात्तां परिवर्जयेत्· अथ बु
धाष्टमी· भविष्योत्तरे· यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि· तदा तदा तु सा ग्राह्या बुधाष्टमीव्रतं नृप·
बुधाष्टमी तु संपूर्णा यथोक्तफलदायिनी· संध्याकाले तथा रात्रौ न कर्तव्यं व्रतं तदा· तथा· कृष्णपक्षे यदा
मासे अष्टमी बुधसंयुता· बुधाष्टमीति विख्याता संपूर्णफलदायिनी· अथ दूर्वाष्टमी· पुराणे· शुक्लाष्टमी
तिथिर्या तु मासि भाद्रपदे भवेत्· दूर्वाष्टमीति विज्ञेया नोत्तरा सा विधीयते· प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च सा

स्मृति·कर· रत· दूर्वाश्चाप्यर्चयेद्भक्त्या ज्येष्ठामूलं च वर्जयेत्· मासि भाद्रपदे शुक्ला या भवेदष्टमी नृप· दूर्वाष्टमीति सा प्रो
२८ क्ता पूर्वविद्धा प्रशस्यते· यो न पूजयते दूर्वां मोहाद्दिह्य पार्थिव· त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः।
तस्मात्संपूजनीयासा प्रतिवर्षं वधूजनैः· स्फरवसंतानजननी भर्तृसौख्यप्रदा सदा· अथ रुद्राष्टमी· लैंगे· पौ
षमासि यदा देवी शुक्लाष्टम्या विधूदये· तदा तु सा महापुण्या महारौद्रेति कीर्तिता:· तस्यां स्नानं तथा दानं
तर्पणं विप्रभोजनं· तच्छीलये परं देवी शतसाहस्त्रकं भवेत्· गोष्ठाष्टमी· कूर्मे· शुक्लाष्टमी कार्तिके च मासि गोष्ठा
ष्टमी स्मृता:· पूजां तत्र गवां कुर्यात्सर्वकामाप्तये नरः· अथ रामनवमी· चैत्रशुद्धनवम्यां तु रामजन्मदिनं तदा·
जातकर्मोत्सवं यः कुर्यात्पुण्यमवाप्नुयात्· तथा· चैत्रशुद्धनवम्यां तु रामस्य जननं भवेत्· तत्रैव मध्याह्ने एव कार्यं
सम्यक्सूद्भवान्हरेः· ज्योति:· नवमी चाष्टमीविद्धा त्याज्या रामपरायणैः· उपोषणं नवम्यां तु दशम्यामेव पारणं·
श्रीरामजन्मनवमी संपूर्णफलदा सदा· एवं उत्तरविद्धैव कर्तव्या तु विशेषतः· द्वयोर्मध्याह्नयुक्ता चेन्नोपोष्या
पूर्वसंयुता:· परविद्धैव कर्तव्या मा मध्याह्नव्यापिनी सदा· अथ महानवमी· नवम्यामाश्विने शुक्ले लक्ष्मी देवी
समर्चयेत्· सरस्वतीमायुधानि युद्धे जयमवाप्नुयात्· ऋक्षत्रये च मूलाद्यौ सप्तम्यामाश्विनी सिते· चंडिका श्रीराम:
मुपहारैश्च पूजयेद्दाष्टवधये· विधिना नवदुर्गाश्च क्रमात्सप्तदादिषु· तिथिव्यावर्तनाहेषु नवम्यंते तु पूजये २८
त्· नवम्यां तेजयेद्धोमं समाप्य विधिवद्बलीन्· यत्रावै विजयां कुर्याद्दशम्यां श्रवणेऽपि वा· बलिदान ... दृतेष्वा

पुत्र भंगं भवेद्ध्रुवं· नवम्यां तु कृते नाजन्देशराष्ट्रसुखावहं· सेवासूर्योदये· आश्विने शुक्लशुक्ल नवमी
अनंतस्य चतुर्दशी· जयायुक्ता न कर्तव्या पूर्णायुक्ता प्रनाश्यते· जयायुक्ता न कर्तव्या पुण्यायुक्ता प्रदोषव्याप्ति
जयायुक्ता न कर्तव्या संगवस्य नमते यदि· संगवस्य भवेन्न्यूनं जयायुक्ता तु कार्या तु· ग्रंथांतरे· संगवे यदि
वर्तेत नवमी यदि चेत्परा· प्रारभ्य परतश्चैव होमं तत्र समाचरेत्· अथ विजयादशमी· विश्वरूपनिर्णये·
आश्विनस्य सिते पक्षे सीमातिक्रमणोत्सवः· विजयाय सुहृत्तीयं कर्तव्यो विजयक्षणे· नवम्यासहिता प
कार्या दशम्यामाश्विने सुजे सिते· एकादश्यायुता जातु न कार्या जयकांक्षिभिः· पुराणे· नवमीशेषयुक्ता
यां दशम्यां विजयोत्सवः· कुरु राम महत्सुकृतं वसिष्ठेन महात्मनः· ईशान· पि संपु कोशातीप दशकिं च
... चिंतामणौ· दृष्टसंध्यामतिक्रांता किंचिदुद्भिन्नतारका· विजया नाम कालोयं सर्वकार्यार्थसाधकः·
व्यासः· दशमी नाम यतेः पापं दशमी तु विनाशिनी· अर्जुनस्य धनुर्धारी रामस्य प्रियदर्शिनी· कश्चि
माणयत्रायां यथाकालसुखं मया· तत्र निर्विघ्नकर्तव्यं भवश्री पाम पूजिते· शमी मध्ये नत्वेषां
त्रानि विघ्नसिद्धये· वारस्त्वादि हित्वा दिक् प्रस्थानमारभेत्· अथ दशम्यां व्रतांगनियममाह· दत्ता
त्यां एकभुक्तं च कुर्वीत नियतेंद्रियः· आचम्य दंतकाष्ठं तु रवाद्येत्तदनंतरं· अक्षारलवणाः सर्वे हविष्या
नं निषेवितः· अवनी तैलताम्बूल क्रियासंगविवर्जितः· नारदः· दशमीदिनसंप्राप्ते व्रतस्थो हि जनार्द
न· चित्रदिने देवदेवेशानिर्विघ्नं कुरु केशव· कूर्मे· कांस्यं माषं मसूरं च चलवणं कोद्रवं· ताकं मधु

स्म·क·र·
२५

पराह्नं च त्यजेदुपवत्स्यामि यं· उपवासं करिष्ये स्वयं· द्वाभ्यां सायमन्नादि वर्जनात्सैव रात्रौ
व्रतारंभसंकल्पकार्यः तदुक्तं ब्रह्मवैवर्ते· प्रातर्हरिदिने सम्यक्कृत्वा विधाय नियमं निः द्वाभ्यामुपवासस्य प्र
कुर्याद्बुद्धः व्रती· अथैकादशीनिर्णयः तत्रैकादश्यामुपवासो नुपन्नः संग्रहे· नित्यं सदा यावदायुर्न
च्छिन्नतिक्रमेत् इत्युक्तानि कर्मदोषश्रुतेर्नागरचोदनात्· फलश्रुतेर्वीप्सावचनान्नित्यामिति कौत्तिस
मिति· नित्यत्वाद् उदाहृतो गरुडपुराणे· उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति· सदा शुद्धेत्युक्तः सन
त्कुमारसंहितायां· एकादश्यां सदोपोष्यं पक्षयोः शुक्लकृष्णयोरिति· यावदायुः वृद्धोक्तेः विष्णुरहस्ये
द्वादशीं नैमित्तिक्यां यावदायुः सुवृत्तिभिरिति· अकरणे दोषमाह सनत्कुमारः नकरोति हि यो मू
ढ एकादश्यामुपोषणं· स नरो नरकं याति रौरवं तामसावृतं· एकादश्यां तु निश्चेष्टो यो भुङ्क्ते मूढचेत
नः प्रतियासं सृष्टं तेन तु किल्बिषं चादिविट्समं· निष्कृतिर्न मे धर्मस्याको धर्मशास्त्रे मनीषिभिः
एकादश्यां तु भुक्तस्य निष्कृतिः क्वापि नोदिता· मद्यपानात्सुनिश्चेष्टः पतेद्वै नरकं व्रजेत्· एकाद
श्यां न कामस्तु पितृभिः सह मज्जतीति· नारदीये· यानि कानि च पापानि ब्रह्महत्यासमा
नि च· अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे· तानि पापान्युपभुङ्क्ते संप्राप्ते हरिवास
र इति· स्कांदे· मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा· एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपीति·

श्रीरामः
२५

विष्णुरहस्ये· द्वादशीव्रतमादाय व्रतभङ्गं करोति यः द्वादशीहं न चीर्णानि निष्फलं तस्य जायते इति· तेनैव प
रमापदमापन्नेहर्वासासुपस्थिते· सूतके मृतके चैव न त्यजेद्द्वादशीव्रतमिति· तदेव नित्यत्वं सिद्धं का
म्यत्वं च साधु संतानादि फलश्रवणादवगम्यते· विष्णुरहस्ये· यदिच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः एकादश्यां न भुञ्जीत पक्षयोरुभ
योरपि· कूर्मपुराणे· यदिच्छेद्धि सकलान्भोगान्मुक्तिं चासौ तदुर्लभां एकादश्यामुपवसेत्पक्षयोरुभयोरपीति· नारदीये· एकादशीसमं किं
चित्पापत्राणं न विद्यते· स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी· कालनिर्णये· एकादशीसमुत्थेन वह्निना पातकेंधनं· भस्मतां याति
राजेन्द्र अपि जन्मशतोद्भवं· विष्णुधर्मोत्तरे· उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह· उपवासः स विज्ञेयः सर्वभोगविवर्जितः इति· ने
नैव· न जपेन जपध्यानं नक यामश्रवणादिकं· तदर्चनं चतन्नामकीर्तनश्रवणादयः· उपवासकृतां ह्येते गुणाः प्रोक्ता मनीषिभि
रिति· अग्निपुराणे· गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च· एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति· तत्त्वसागरेपि· यथा
शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा· तुल्ये ते मनुते यस्तु स वै वैष्णव उच्यते· विष्णुधर्मोत्तरे· सपुत्रश्च सभार्यश्च स्वजनैर्भक्तिसंयु
तः· एकादश्यामुपवसेत्पक्षयोरुभयोरपीति· मात्स्ये· पुत्रवांश्च सभार्यश्च बंधुयुक्तस्तथैव च· उभयोः पक्षयोः कार्यं व्रतं कुर्या
द्भुवैष्णवमिति· वैष्णवो वाथ शैवो वा कुर्यादेकादशीव्रतमिति· स्कांदे· पितृणां गतिमन्विच्छन् कृष्णायां समुपोषणमिति· सनत्कु
मारः· एकादश्यां दिवा यस्तु विशेषं कुरुते नरः· तस्याहं दूरतः स्थास्यामि यावदाभूतसंप्लवं· विष्णुपुराणे· यथा कृष्णे पूजितो गौरे
छीवा वेदविद्द्विजः· संसारपतिदातारं द्वादश्यां चासितासिते· स्कांदे· सोमसूर्यग्रहे पुण्ये तथैव मुनिभिः स्मृतो· तथा सितासि
ते पुण्ये द्वादश्योर्मुनिभिः स्मृतैः· सायं प्रातर्यथा संध्या सायं प्रातर्यथाहुतिः· सितासितौ तथा पुण्ये द्वादश्यौ परमे मते· प
थागौ नैव हंतव्यौ शुक्लाकृष्णे तथा मिति· एवमेकादशी ह्युभयपक्षयोरुभयोरपि इति· अथाधिकारी निरूप्यते· तत्र नारदः
अष्टाब्दादधिको मर्त्यो ह्यपूर्णाशीतिहायनः· एकादश्यामुपवसेत्पक्षयोरुभयोरपि· आधिभिः परिहृता नानाधिकरहारि

स्मृ॰र॰कर॰
२६

गं॰ त्रिंशद्वर्षकार्णीव साहारा दिनदोषभाक्॰ पयधान्यफलैर्मूलकन्दसाहारमुदाहृतं॰ त्रिंशद्वर्षकार्णीव साहारा दिनदोषभाक्
नवतिर्वर्षमिसर्यः॰ नवतीवर्षस्यापि भक्ति मेतामी जनेदौ प्रश्नोक्तः॰ नारदीये॰ एकादश्यां तु यो भुंक्ते शक्तिः सान्निरूपद्रवः स
रापानसमं पापं स वेतस्य नसंशयः॰ वेधलक्षणमाह नारदः॰ संपूर्णैकादशी यत्र प्रभाते पुनरेव सः॰ सर्वैरेवोत्तरे कार्या परतो द्वाद
शी यदि॰ तथा॰ शुद्धाप्येकादशी त्याज्या परतो द्वादशी यदि॰ विद्धाप्येकादशी सा त्याज्या परतो द्वादशी न चेत्॰ स्कांदे॰ प्रथमेहनि संपूर्णा
व्याप्याहोरात्रसंयुता॰ द्वादश्यां च तथा तासद्दृश्यते पुनरेव सः॰ पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभोः॰ एतत्प्रयेषु
द्वैतपक्षावधिष्य॰ एतद्व्रतानां गृहस्थानां विषये इदानीं वेधस्वागमो क प्रकारो वक्ष्यते॰ वेधद्वयं नामैकादशी शुद्धा विद्धेति
विध्येव॰ तत्र विशालक्षणं तु नारदीये॰ उदयात्प्राग्यदा नाथ चतस्रो घटिकास्तथा॰ अरुणोदयविद्धवसेता नोपवसेदिति॰
स्कांदे॰ उदयात्प्राक् च तस्रस्तु नाडिका अरुणोदयः॰ तत्र स्नानं प्रशस्तं स्यात्स हि पुण्यतमः स्मृतः॰ भविष्योत्तरे॰ अरुणोद
यवेलायां दशमीयदि दृश्यते॰ सा विद्धैकादशी तत्र पापमूलमुपोषणमिति॰ नारदीये॰ कलार्धेनापि विद्धा स्याद्दशम्यैकादशी
यदि॰ स्करया बिंदुना स्पृष्टं गंगांभः कलशे यथा॰ अशुद्धलक्षणं॰ अरुणोदयकाले तु दशमी यदि दृश्यते॰ शुद्धः॰ गारुडे॰ उदयात्प्राक्
कयाविप्र मुहूर्तद्वयसंयुता॰ सैकादशी तु संपूर्णा विद्धान्याः परिकीर्तिताः॰ उदयात्त्रिघटिका व्यापिन्येकादशी यदा॰
संकीर्णैकादशी नाम वर्जयेद्धर्मवृद्धये॰ वसिष्ठः॰ दशमीशेषसंयुक्ता यदि स्यादरुणोदये॰ नैवोपोष्यं वैष्णवानां तद्दिनेका श्रीराम
दशीव्रतं॰ अरुणोदयश्चतस्रो घटिकाः प्रातररुणोदय उच्यते॰ भविष्योत्तरे॰ नवमीपलमेकं तु दशमीसकका स्मृ २६
ताः॰ उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणं॰ उपोष्या द्वादशी चैव एकादश्याः कला अपि॰ दिनक्षयेपि सा पुण्यान
दशम्या कदाचन॰ शुद्धाप्येकादशी त्याज्या परतो द्वादशी यदि॰ विषं तु दशमी तेया मतं चैकादशीति तिथिः॰ ब्रह्मवैव
र्ते॰ दशमीशेषसंयुक्तो यः करोति विमूढधीः॰ एकादशीफलं तस्य न त्रयोदशवार्षिके॰ गोभिलः॰ एकाद

श्यां यदा ब्रह्मन् दिनक्षयतिथिर्भवेत्॰ तदाद्यैकादशी प्रोक्ता द्वादशीं समुपोषयेत्॰ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॰
कूर्मे॰ कलार्धेनापि विद्धः स्याद्दशम्यैकादशी यदा॰ तदाद्यैकादशीं मुक्त्वा द्वादशीं समुपोषयेत्॰ तत्र क्रतुशतं पुण्यं त्रयो
दश्यां तु पारणं॰ बौधायनः॰ कलाप्येकादशी यत्र परतो द्वादशी न चेत्॰ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॰ व्यासो
पि॰ दशमीमिश्रितां पूर्वां द्वादशी यदि लुप्यते॰ एकादश्यां महाराज नत्वनुपवासः कथं भवेत्॰ शुद्धे च द्वादशीराजन्नुपो
ष्यामोक्षकांक्षिभिः॰ परायणं च त्रयोदश्यां पूजयित्वा जनार्दनं॰ क्षयं वाप्यथ वा वृद्धौ संप्राप्ते वा दिनक्षये॰ उपोष्य द्वा
दशी पुण्यं पूर्वविद्धां परित्यजेत्॰ नारदः॰ एकस्मिन्नसवने चाह्नि तिथीनां त्रितयं यदा॰ तदा दिनक्षयः प्रोक्तस्तस्य सा
हस्रकं फलं॰ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॰ त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहतु॰ एवं विधः सं
पि देहं दृष्टव्यं॰ कूर्मे॰ बहुवाक्यविरोधेन संदेहो जायते यदा॰ द्वादशी तत्र ग्राह्या त्रयोदश्यां तु पारणं तथा॰ बह्वागम
विरोधेषु ब्राह्मणेषु विवादिषु॰ उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणं॰ नारदः॰ अतिरिक्ता द्वादशी चेत्संता
नोपोष्य यदि द्वि॰ द्वादश्यां द्वादशीं हंति द्वादशी चातिलंघिता॰ द्वादश्यामतिरिक्तायां यो भुंक्ते पूर्ववासरे॰ द्वादशी द्वा
दशीं हंति द्वादशीं न परित्यजेत्॰ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्॰ न तत्र विधिलोपः स्यादुभयोर्दैवतं ह
१ रिः॰ नारदीये॰ कलाद्वयं त्रयं वापि अन्हे द्वादशी यदि॰ उपवासद्वयं कुर्यादन्यथा नरकं व्रजेत्॰ एकादश्यां प्रातभागे द्वादश्यां
पूर्वमेव तु॰ हरिवासरविज्ञेयो वर्जयेत्तत्र पारणं॰ इत्येकादशीनिर्णयः॰ एकादशी दिने नियमः॰ असकृज्जलपानं
च दिवास्वापं च मैथुनं॰ तांबूलचर्वणं मांसं वर्जयेद्धरिवासरे इति॰ ब्रह्मपुराणे॰ एकादश्यां शुभे पक्षे निराहारैः समा
हितः॰ स्नात्वा सम्यक् विधानेन सोपवासो जितेंद्रियः॰ एकादश्यां महीपाल नात्र संभवस्यागमि भवेन्नरः॰ दशाजन्मस
त्रपापान्मुच्यते नात्र संशयः॰ कूर्मे॰ बहिर्ग्रामांत्यजांश्च सूतिं पतितां च रजस्वलां॰ न स्पृशेन्नाभिभाषेत नेक्षेत व्रत

स्म०र०क० वासने · स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि · निष्पंदते ब्रह्मचर्यं न दारेष्वृतुसंगमात् · गात्राभ्यंगं शिरोभ्यंगं तांबूलं
२० चानुलेपनं · व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतिः ब्रह्मपुराणे · देवस्योत्थापनं कुर्वन्कृत्वाद्भुयासुसमाहितः नानापुष्पै
मुनिश्रेष्ठ विचित्रं पुष्पमंडपं · कृत्वा चावरणं पश्चाज्जागरं कारयेन्निशि · पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि
उपचारैर्बहुविधैर्जपहोमप्रदक्षिणैः स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः दंडवत्प्रणिपातैश्च जयशब्दैस्त
एनं थोत्तमैः संपूज्य विधिवद्रात्रौ कृत्वा जागरणं · यांति विष्णोः परं स्थानं नरा नास्त्यत्र संशयः पुराणे · संप्राप्ते वासरे वि
ष्णोर्ये न कुर्वंति जागरं · न युज्यते सुकृतं तेषां वेष्टमानाश्च निद्रया · मत्स्ये कोन हरेः कुर्यात् जागरं पापमोहितः व्यर्थं तस्य
नं तस्य न पूज्यं नैतद्व्रतं इति · सूतकादौ तु दानार्चनरहितं समुपोषणं कुर्यात् · वाराहे · सूतके च नरः स्नात्वा प्रणम्य
मनसा हरिं · एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते · सूतकेपि न भुंजीत एकादश्यां सदा नरः द्वादश्यां तु ततः सम्यक्
पारणं स्नात्वा विष्णुं प्रणम्य च · स्त्रीणां रजोदर्शनेपि न व्रतत्यागः पुलस्त्यः एकादश्यां न भुंजीत नारी दृष्टे
रजस्वलेति · कश्यपश्लोकेपि · संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमिति · यदा त्रयोदश्यां द्वादश्याः कालद्वयं
त्रयं वापि द्वयाद्युपरि संभवेति न द्वादश्यैकिकाएव पारणं कुर्यात् · तदुक्तं नारदीये · एकादश्या कलाद्यं काद्वादश्य
कलाद्वयं द्वादश्यां नार्हति त्रयोदश्यां तु पारणमिति · तथा · कलाद्वयं त्रयं वा द्वादशी न त्वतीक्रमेत्तु पारणे
का मननेन्नरूणं नास्ति पिस्ताक कालिकी स्मृतेति · कलानाथ उदयापनेषु हीनं द्वादशी यदि · द्वादश्या द्वादशाहं ते द्वादशीं चा
तिलंघितेति · नारदीये · अल्पायामपि विप्रेंद्र द्वादश्यामरुणोदये · स्नानार्चनः क्रियाः कार्या दानहोमादिकं श्रीरामः
दिकं · गारुडेपि · यदा स्वल्पा द्वादशी स्यादुपकर्षे भुजेत् भवेत् · प्रातर्मध्याह्निकस्यापि तत्र स्यादुपकर्षणमि २७
ति · तत्र पारणासंभवे · अद्भिस्तु पारणं कुर्यात् · तथा कात्यायनः संध्यादिकं भवेन्नित्यं पारणं तु निमित्ततः अद्भिस्तु पारयित्वाथ ने

अस्तके वर्ते · त्रयोदशी प्रकर्तव्या द्वादशीसहिता मुने · भूतविद्धा न कर्तव्या दर्शपूर्णा करा बनेति · कृष्णपक्षत्रयोदश्यां परविद्धा निगमे · अष्टमी नमावास्यां कृष्णप
क्षे त्रयोदशी · एताः परयुता पूज्याः पराः पूर्वयुतास्तथेति · अनंगत्रयोदशी तु पूर्वविद्धा सर्वतः कृष्णाष्टमी रत्नहत्या सावित्री वटपैतृकी · अनंगत्रयोदशी रंभा
पोष्याः पूर्वसंयुता · अथ नृसिंहजयंति · नृसिंहपुराणे · वैशाखमासे प्रथमचतुर्दश्यां केसरी · स्तंभादुद्भवोयस्स्वयं ... महोत्सवं · शुक्लपक्षे चतुर्दश्यां मासि तस्य
माधवसंज्ञके · प्रादुर्भूतान् पंचास्य तस्मात्तां समुपोषयेत् · वैशाखमासे सितपक्षे चतुर्दश्यां शुभे दिने · सायंकाले मंदवारे स्वातीयुक्ते स्वयं हरिः अनंग
न समायुक्ता न सोपोष्या चतुर्दशी पूर्णायुक्ता तु ता कुर्यान्नारसिंहस्य तुष्टये · यः करोति नरो मोहात्कामविद्धां चतुर्दशीं धनापत्ये विपुत्रे ततस्मात्तां
परिवर्जयेत् · चतुर्दशी न वर्तेत सायंकाले दिनद्वये · परे व वर्तते वापि कर्तव्या सा तथैव तु · सस्य रोसरदिने चेत्सायंकाले चतुर्दशी · कर्तव्या सा न
पापूर्वा नारसिंहप्रियं तिथिः अथानंतचतुर्दशी · पुराणे · मासि भाद्रपदे शुक्ले चतुर्दश्यां द्विजोत्तम · अनंतं पूजयेद्भक्त्या दानं दद्याच्च शक्तितः · चतुर्दश्यु
नरा मुक्ता पूर्वा कर्त्तव्या चतुर्दशी · उदये त्रिमुहूर्तापि ग्राह्यानंतव्रते तिथिः · जाबालिः · संगवस्पृग्यया चैव अनंतस्य चतुर्दशी · तस्मिन्नहनि
पूजा च न चेत्स वै परेहनि · निर्णयामृतेपि · माध्याह्नव्यापिनी या च भाद्रशुक्लचतुर्दशी · सैवानंतव्रते ग्राह्या पूर्णायुक्ता विशेषतः कर्तव्या
पौर्णिमायुक्ता पुरुषैः पुण्यकांक्षिभिः · व्रतेऽत्र योदशीमुक्ते ... · जया योगिनयः कुर्वीत ... पूजनं हरेः · वर्षपूजाफलं तस्य
क्र के भागमिष्यति · तथा · जयायुक्ता न कर्तव्या नानंतस्य चतुर्दशी · पूर्णायुक्ता प्रकर्तव्या सर्वदा शुभकांक्षिभिः · स्कांदे · उदये त्रिमुहूर्तापि
ग्राह्यानंतव्रते तिथिः · परविद्धैव कर्तव्या पूर्वविद्धा न कर्हिचित् · अतो मुहूर्तमात्रापि पौर्णिमायां चतुर्दशी · तस्यामभ्यर्चनं कुर्यादनंतस्य विशेष
तः · व्रते च तस्य संप्राप्ते संदेहे तस्य संस्थिते · मुहूर्तमपि या प्रोक्ता तस्यां संपूजयेद्धरिं · तथा · मुहूर्तमपि लभ्येत पौर्णिमायां चतुर्दशी · सम्पूर्णा
सापि दृश्यतः पूजयेद्विष्णुमव्ययं · अथ दोरनष्टप्रायश्चित्तं · दोरनष्टे महादोषः संभवेद्दुष्पातकं · तस्मात्तद्दोषनाशार्थं प्रायश्चित्तं विधी
यते · कार्यश्चाथ दोरश्च पूर्ववद्ग्रंथिसंयुतः · पूजयित्वा प्रयत्नेन पश्चाद्धोमं समाचरेत् · हव्यवाहं प्रतिष्ठाप्य आज्यसंस्कारयेद्बुधः · विष्णुरुद्र
स्तथा सूर्यः सहस्राक्षः पितामहः · इंद्रः पिनाकी विश्वेशः स्कंदः सोमस्तथैव च · इंद्रः पवनपृथिवी वसवोऽश्विदेवताः · अष्टोत्तरशतं हुत्वा जुहुयात्
वेति मंत्रतः · नाममंत्रेण हुत्वाथ केशवादिक्रमात्ततः · अनंतं कामरूपं च जिष्णुं विष्णुं हरिं शिवं · ब्रह्माणं भास्करं शेषं सर्वव्यापिनमीश्वरं · विश्वरू
पं महाकायं सृष्टिसंहारकारकं · हुत्वैतानि वा नामान्ययो बध्नीयात् दोरकं · अथ शिवरात्रिः · अथ वैकुंठचतुर्दशी · कार्तिकशुक्लचतुर्दशी

स्मृ·र·कौ· २९ वैकुंठसंज्ञासानिशीथव्यापिनीग्राह्या· दिनद्वयेतद्व्याप्तौनिशीथप्रदोषव्याप्यव्यापिनीग्राह्या· तदुक्तंहेमाद्रौभविष्ये· कार्तिकस्यासितेपक्षेचतुर्द
श्यांनिराधिप· सोपवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियइति· अस्यामेवविश्वेश्वरप्रतिष्ठादिनत्वात्तस्मीसर्वैरुपवासादिक्रियतेतराणेपि
यव्यापिनीग्राह्या· तदुक्तंत्रिस्थलीसेतौसनत्कुमारसंहितायां· वर्षेचहेमलंबाख्येमासिश्रीमतिकार्तिके· शुक्लपक्षेचतुर्दश्यामरुणाभ्यु
दयंप्रति· महादेवतिथौब्राह्मेमुहूर्तेमणिकर्णिके· स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयदिति· तत्पूर्वदिनेचोपवासःकार्यः· स्कांदे·
माघस्यकृष्णपक्षेयस्तिथिश्चैवचतुर्दशी· तस्यारात्रिसमाख्याताशिवरात्रिःशिवप्रिया· शिवरात्रिव्रतंनामसर्वपापप्रणाशनं· आचांडाल
मनुष्याणांभुक्तिमुक्तिप्रदायकं· नारदीये· अर्धरात्रियुतायत्रमाघकृष्णचतुर्दशी· शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथा·
पुराणे· अर्धरात्रात्रिपर्यंतंभवेद्यदिचतुर्दशी· सूर्योदयंसमारभ्यसैवोपोष्यासदाबुधैः· अर्धरात्रियदानस्यान्माघासि
तचतुर्दशी· त्रयोदश्यायुताकार्यानरैःशिवपरायणैः· स्कांदे· प्रवेधत्रत्रयोदश्याभूतव्याप्तामहानिशा· शिवरात्रिव्रतंतत्रकु
र्याज्जागरणंनिशि· दिनद्वयेप्यर्धरात्रेवर्ततेचचतुर्दशी· परेद्युस्ताप्रकर्तव्यानचपूर्वाकदाचन· दिनद्वयेयदानस्या
न्मध्यरात्रेचतुर्दशी· तदापूर्वापरित्यज्यकर्तव्यासानरैःपरा· तिथीनामेवसर्वासामुपवासव्रतादिषु· तिथ्यंतेपारणंकुर्याद्विनाशि
वचतुर्दशी· मासशिवरात्रिः प्रतिमासेपिकर्तव्यामासकृष्णचतुर्दशी· प्रदोषव्यापिनीचेत्पूर्वान्यायदिवापरा· त्रयोदश्यास्तु
मेस्पर्शेचतस्मोवाष्टनाडिषु· व्रतविद्वान्यातत्रशिवरात्रिव्रतंचरेत्· दिनद्वयेयदासाम्यंशिवरात्रिचतुर्दशी· प्रदोषयदि
वर्तेतकर्तव्यासापरैवतु· मदनरत्नमाह· ज्योतिःप्रकाशे· त्रिमुहूर्तप्रदोषस्याद्रवावस्तंगतेसति· महानिशानिशी
थस्तत्रमध्यस्थघटिकाद्वयं· ज्योतिर्निबंधेपि· महानिशाद्वेघटिकेरात्रेर्मध्यमयामयोः· अथहोलिकानिर्णयः· फाल्गुनेसितपक्षस्यपू श्रीराम
र्णसहितेनंदाचरिक्ता· विनाभद्राचेत्प्रतिपद्भेनक्षत्रांकसहितेहितानिशा· धैंगलेचांडालाद्गृहवह्निपश्चिमदिग्भजतो २९
स्यपूजांतदाआवाह्यादिषुमंत्रेषुक्तविधिनावर्षेषुवर्णपात्रमादौ· तथाः· तपस्यामासियद्दिष्टाकृष्णपक्षेचतुर्दशीयात्तिर्भिवा
धरात्रौ·गृहीतचांडालगृहेन्द्रवह्निनाहुताग्निनैमन्मथनर्तवर्षे· फाल्गुनेशुक्लपक्षेचचतुर्दश्यार्धरात्रके· अनंगदाहनंप्रोक्तं

हे तंचपनेहति· मौनिदूरीचवेळायांप्रभूतायांफाल्गुनेसिते· कामदाहनकंकर्मशांतिमारोग्यवर्धनं· फाल्गुनेमासिपुण्याचचतुर्दशी त
चपौर्णिमा· पूर्वविद्धाचकर्तव्याहोलिकायांबुधैर्जनैः· कुलाचारानीचपूर्णापूर्वविध्याचकानयेत्· होलिकायांतुकर्तव्यंसंतोष म
यतमेवयं· भविष्योत्तरे· तपसेपौर्णिमास्यांतुरजन्यांहोलिकोत्सवः· कर्तव्योनदिवानिष्टांनिताप्रतिपद्यपि·
विद्याविनोदे· नंदायांमरणंघोरंभद्रायांदेशनाशनं· दुर्भिक्षंचचतुर्दश्यांकरोत्येवकृतानलं· नारदः· प्रतिपद्भू
तभद्रासुयार्चिताहोलिकादिवा· संवत्सरंचतद्राष्ट्रंपुरंदहतिसाद्भुतं· प्रदोषव्यापिनीग्राह्यापूर्णिमाव्यापिनीसदा·
तस्यांभद्रामुखंत्यक्त्वापूज्याहोलिकानिशामुखे· प्रदोषव्यापिनीनास्यात्तदापूर्वदिनेभवेत्· भद्रामुखंवर्जयित्वाहोलि
कार्याप्रदीपना· भविष्योत्तरे· सार्धयामत्रयंवास्याद्द्वितीयदिवसेयदा· प्रतिपद्वर्धमानाहितदासाहोलिका
स्मृता· चंद्रोदयेयदानस्यात्पौर्णिमाफाल्गुनेतदा· पूर्वेद्युर्मध्यगेचंद्रेकर्तव्याहोलिकार्चनं· चिंतामणौ·
चांडालसूतिकागेहाच्छिशुहारितवह्निना· भद्रांत्यंकरवेपरित्यज्यहोलिकादीपनंशुभं· ज्येष्ठपौर्णिमा· ज्येष्ठ
मासिहिमेंस्तुमूलसहितेऽर्केन्दुमिश्रेनचेत्पूर्वाह्णेत्यकुलीरसिंहमिथुनेलग्नेविशुध्यंतिगे· वारुण्यायमवाजि
तेत्यभिमुखेदाष्टकेनयोगिनीजीवेशुक्रदानिमेलेषुगगनेनड्वाहपूजाविधेत्· नोहियथानलसांमिश्रंसुक्तापज्येष्ठ
मूलयोः गजस्कंधमनड्वाहंतुकाम्यामविनवपति· अथदीपावली· आश्विनस्यासितेपक्षेलक्ष्मीर्विंशतिमुंच
ति· साचदीपावलीप्रोक्तासर्वकल्याणरूपिणी· भविष्योत्तरे· आश्विनस्यासितेपक्षेचतुर्दश्यांविधूदये·
स्नातव्यातिलतैलेननरैर्नरकभीरुभिः· त्रयोदश्यांयुतायावैचतुर्दश्यानिशासिते· विधूदयेनरःस्नाया

स्मृति·कौ·

८

स

यान्नरकंनैवपश्यति·त्रयोदशीयुतायत्रदृश्यासि नचतुर्दशी· तैलाभ्यंगंचकर्तव्यंत्यजेद्दर्शेचमिश्रितं·
विधूयेत्त्रयोदश्यांमभवेद्यदिभवेद्यादिचतुर्दशी·नरकीतिचसाप्रोक्ताह्याश्विनस्यासितेबुधैः स्नातव्यंतिल
तैलेननारकावैननोत्तमैःमुमुक्षुभिःसकामैश्चैवैरपिमहात्मने·इंदुक्षयेपिसंक्रांतौनारपातिदिनक्षये·तत्रा
भ्यंगमदोषस्यात् प्रातःपापनत्वतये·इषेकृष्णेचतुर्दश्यामिंदुक्षयदिनेपिवा·ऊर्ज्यादौस्वातिसंयुक्तोवात
दादीपावळीभवेत्·इषभूतेचनेष्टेदरःकार्तिक्यांप्रथमेदिने·नात्रौचतुर्थयामेवास्वातीसुक्तेनिशा
कने·तदादीपावळीस्नानंतैलाभ्यंगसुभावहं·ऊर्ज्यादौस्वातिसंयुक्ते प्रतिषद्दर्कदर्शने·सोनदी
पावळीत्येतिप्रसिद्धाभानुभेयुते·उदयात्प्राकृद्विघटिकास्वात्यादौसंयुतेविधौ· तदादीपाव
ळीस्नानंभागीनिष्ठ्यावगाहनं·पुनःस्नानंनकर्तव्यंग्रहणेप्यत्रवर्जितं·पूर्वस्नानंत्रैवारस्नानं
प्रदासंतिइतिगार्ग्यसुनिश्चितं·तैलेलक्ष्मीजलेगंगादीपावळीतिथौवसेत्·अलक्ष्मीपरि
हारार्थंअभ्यंगस्नानमाचरेत्·उषस्याभ्यंजनंदायास्नात्वानीराजनंततःकुर्यात्सकलमेनचदीपोत्स
वदिनत्रयं:आश्विनेमासिभूतादितिथयःकीर्तितास्त्रयःदीपदानादिकृत्येषुकर्तव्याःपूर्व श्रीरामः
संयुताः कालनिर्णये· वत्सरादौवसंतादौबलिराज्यतथैवच·प्रतिपत्पूर्वविद्धानोकर्तव्या
तुकथंचन· वसिष्ठः मुहूर्तंवर्ततेदर्शोमांगल्यंतद्दिनेभवेत्· पितापत्यकळत्रादितस्य

वैनश्यति ध्रुवं· आश्विनेमासिदर्शेतुनारीनीराजनंयदि·नारीणांतत्रवैधव्यंप्रजानांमरणं
ध्रुवं·नंदासंवत्सरादौतुदूर्वाविधानकानयेत्·बलेःप्रतिपदंचैवसर्वश्रेयोविनश्यति·मुहूर्तम
पिवर्तेत प्रतिपत्कार्तिकेसिते·उत्सवादिकृत्येषुकर्तव्याशुभकांक्षिभिः प्रतिपत्स्वल्पमत्यापिय ६२
दिनस्यात्तुपरेहनि·पूर्वविद्धातदाकार्यासितेपक्षेचकार्तिके· अभ्यंगस्नानंकुर्वंतियदिनास्नाति
निमित्तकं· नमांगल्यंभवेत्तेषांयावद्वस्याद्वत्सरंध्रुवं· नंदायांसुद्देप्यभ्यंगंकृत्वानीराजनंततःसु
वेषःसत्कथागीतैर्दानैश्चदिवसंवसेत्· भागवते· योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर
हर्षदैन्यादिरूपेणतस्यतद्धर्षंप्रयातिहि· अथाश्विनप्रतिपदानिर्णयः अमायुक्तानकर्त
व्याप्रतिपत्पूजनेमम·मुहूर्ताहिप्रकर्तव्याकर्तव्याःपरिसंयुताःस्वल्पापिप्रतिपद्ग्राह्याचित्रावै
धृतिवर्जिताःचित्रायामथवादर्शे वैधृत्यांचापिवायदि·देवीसंस्थापनंकुर्यात् ध्रुवंतस्यकु
लक्षयःस्वल्पाचैद्वैधृतिश्चित्राप्रतिपत्सर्वाधिकायदि·कलशस्थापनंकुर्याद्धित्वाचित्रांचवै
धृतिं· वामनपुराणे· वैधृतिश्चतथाचित्रासमयंप्रतिपद्यदि·प्रभातेप्रतिपन्नास्तितथाका ५२
र्यंतथैवतु· तथा· प्रतिपत्स्वल्पमल्यापियद्दिनस्याप्स्परेहनि·अमायुक्तातदाकार्यात्य

स्म० कं०

३३

त्काषोडशनाडिकाः॰ चित्रावैधृतिषु त्याज्ये प्रतिपद्द्वितीयान्विताः अमायुक्ता तदा ग्राह्या कलशस्था
पनं ततः अष्टभागे विप्र कर्तव्या प्रतिपच्चोर्ध्वगामिनि॰ आद्यास्तु नाडिकाः स्वस्य काषोडशाद्याद्दत्त्रो
पि च॰ कलशस्थापनं तत्र कर्तव्यं लुप्तकांक्षिभिः॰ मत्स्यसूक्ते॰ आद्यास्तु षोडश त्रो नाड्या [illegible]
स्य त्काये कुरुते नरः कलशस्थापनं तत्र ह्यभिचारं जायते ध्रुवं॰ ग्रंथांतरे॰ कलशस्थापने ग्राह्या प्रतिपद्द्वी प०
सं युतः हस्तनक्षत्रसंयोगे विपरीता तु हानदाः स्वकापि प्रतिपदा पश्चे कुरुते न्यत्र वा यदि॰ तस्य राष्ट्रापत्ति
वैदत्वा भस्मदोषकनोस्यहं॰ वृद्धौ समाप्ति नष्टम्याक्षये मा प्रतिपन्निति॰ प्रभाते न वर्चंडाक्ष्मन वरा
त्रं भवेत्तदा॰ तथा॰ कार्यसमाप्तिरष्टम्यां प्रतिपद्दूर्ध्वतो यदि॰ क्षीयते माप्युत्तायावा नवरात्रं भवे
त्तदा॰ अथ संक्रांतिषु पुण्यकालः॰ शातातपः॰ संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः
तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि॰ रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः सप्तजन्म
गी० सु रोगी स्याद्दुःखभोगी च जायते॰ नैनयाया: पुण्यतमा नाड्यस्ताताः पुण्यत्वमाद्दति॰ श्रुतमेकैव तैः
त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकः भविष्यत्ययने पुण्या अतीते चोत्तरायणे॰ अत्र
चत्वारिंशदुत्तरायणे॰ पश्चादपि चत्वारिंशत्पुण्यतमा इति दर्शितं॰ बृहस्पतिरपि॰ अयने
त्रिंशतिः पूर्वा मकरे विंशतिः पराः वर्तमाने तुलामेषे नाड्यस्तूभयतो दश॰ रात्रौ संक्रमणे तु

श्रीरामः

३३

सिष्ठः॰ रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रियाः ऊर्ध्वं संक्रमणे
चोर्ध्वमुदयात्प्रहरद्वयमिति॰ वृद्धवसिष्ठः॰ संक्रमस्तु निशीथस्याष्यामपूर्वपश्चिमाः संक्रांतिकालवि
ज्ञेयास्तत्र स्नानादिकं चरेत्॰ ज्योतिर्वसिष्ठोपि॰ पूर्णं चेदर्धरात्रे तु यदा संक्रमते रविः॰ तदा दिनद्वयं पुण्य
मुक्त्वा मकरकर्कटाविति॰ मकरकर्कटयोस्तु विशेषः॰ वृद्धगार्ग्यः॰ कर्के पूर्वं दिनं ग्राह्यं मकरे तु परे दिने॰
स्मृतिः॰ मिथुने कर्कसंक्रांतिर्यदि स्यादंशुमालिनः प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः कार्मुकं तु
परित्यज्य दोष संक्रमते रविः प्रदोषे वार्धरात्रे वा स्नानदानं परेहनि॰ आसन्नसंक्रौ मितिमकरकर्कटयो
र्व्यतिरिक्तं॰ कार्मुकं तु इति मकर कर्कटविषयो तत्॰ बहवो निर्बंधा एवं धर्माण॰ अत्रापि रात्रिभाग वा०
स्यासंनिहितत्वात् पुण्यत्वं॰ याज्ञवल्क्यः॰ राहुदर्शनसंक्रांति विवाहात्ययवृद्धिषु॰ स्नानदा
नादिकं कुर्यान्निशि काम्यव्रतेषु च॰ पाराशरः॰ पुत्रजन्मनि यज्ञे च तथा संक्रमते र
वेः राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि॰ सुमंतुः पुत्रोत्सवे विवाहे च संक्रांत्यां
ग्रहणेपि च॰ शर्वर्यां स्नानमित्थं तेन सर्वत्र विधिर्भवेत्॰ स्तद्बाधितो तरायणमि
मिति॰ संग्रहे॰ ग्रहणायनयोः पुत्रजन्मन्युद्वाहकर्मणि॰ निश्यपि स्नानमुक्तं स्यात्
छायामदोषतः॰ ग्रंथांतरे॰ कुलीर [illegible] मृगसंक्रांतौ स्नातो ग्रहते ग्रहे॰ जातकर्मणि चोद्वाहे नात्रौ स्नानं स नि०

स्मृ० कौ०
३२

माचरेत् । अतीते नागते काले स्नानहोमादिपतत्कृतं । उक्तेनैवापि यद्दानं तद्दद्यादापि निष्फलं । सकाले यानि
दातव्यमस्यः पितरो मनः तेसर्वे तृप्तिमायांति सि तृणादत्तमक्षयं । कालविवेके । निवृत्तिप्राक् ग्रहराहु र्ध्वंय
दिसौम्यायनं भवेत् । तदास्मिन्दिने पुण्यं परतश्चेत्परेहनि । दानं । तिलदानमहायोगी सर्वभोगविवर्जितो होमं
च भक्षणं कुर्याद्दिने पुत्तरायणे । अथाधिमासोत्पत्तिः । वसिष्ठसिद्धांते । द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभि
स्तथा । घटिकानां चतुष्केण पतति ह्यधिमासकः । पानाद्यनः यो मासः सूर्यसंक्रांतिरहितः सोधिमासकः
संक्रांतिद्वयमन्यारव्यसुभकर्मणि गर्हितः । अथक्षयमासः । नन्वेकस्मिन्वत्सरे शुद्धामासावधिकोसदा
तदापूर्वस्तु संसर्गः परतः स्त्वधिको भवेत् । ज्योतिःसिद्धांते । असंक्रांतिमासोधिमासः स्फुटं स्या
द्विसंक्रांतिमासः क्षयाख्यः कदाचित् । क्षयः कार्तिकादित्रये नान्यथास्यात्तदा वर्षमध्ये धिमासद्वयं च । ज्यो
तिःशास्त्रे । यद्वर्षमध्येधिमासयुग्मं तत्कार्तिकादित्रयं क्षयाख्यैः मासैस्त्रयं त्याज्यमिदं प्रयत्नाद्धि
वाये तेसवमंगलादिषु । मंगलकर्मासिकार्याकार्यः गौतमः सीमंतं सवेश्माद्यं वृयातिकं जातकमेव च पुंस्
श्राद्धं द्वितीयोप्यहरह श्राद्धमूनादिसिकं । ग्रहणे नाम कर्मेव धिमासे विवर्जयेत् । वर्ज्यानि ज्योतिःसारसारेः श्रीनामः
अग्न्याधानं प्रतिष्ठां च यज्ञदानव्रतानि च । वेदव्रतवृषोत्सर्गचूडा [illegible] मेखलाः मांगल्यमभि ३२

करण

मित्यांतस्तु जिर्भवेदिति । द्वयोरपि संकटे विष्णुप्रोमे द्वादश्यां पारणं कथं । अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदि
ति । संकटस्थले [illegible] श्राद्धादैश्च न दोषदृति । संकादृश्यां प्रातेनित्यमाह्निकमेव च । तत्राद्भिः पारणं कृत्वा सवकालेवा
रु३ हिकं चरेत् । इतिवाक्याते संनिर्णस्त । दानखंडे । अल्पायामपि विप्रेंद्र द्वादश्यामनु पोद्ययेत् । आमध्यांद्विगः क्रियाः सर्वा
क४ र्तव्यां दृष्टु त्नासनादिति । श्राद्धानियुक्तैर्विप्रैस्तु द्वादशीपरिपालितः तत्फलं श्राद्धकर्तॄ स्नात्तत्र व्रतलंघये
न यतिनिरास्वभर्तुपारणेनैवनारीणांपावनंभवेत् । पतिव्रतानां नारीणामेव न व्रतलंघनं । अग्निरस्कंतुय
स्नानं पर्युषितभोजनं । द्वादशीलंघनं चालुकुलस्त्रीणां न दुष्यति । उदकपारणमंत्रः असितानसितापस्मादापोवितृहृद्गीहितः
अंभसाकेवलेनैव करिष्ये द्वतपारणमितिसाधापः पिबेत् । पारणं तु नैवेद्यं तुलसीमिश्रितं कुर्यात् । नतु तां स्कांदे कृत्वाचैवोप
वासं तु यो भुंक्ति [illegible] द्वादशीदिने । नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनमिति । एकादशीदिने तु सा वर्ज्या । तुल
सीमिश्रितं तीर्थमेकादश्यां तु वर्जयेत् । वैष्णवानां विशेषेण व्रतीनामेव सर्वदेति । द्वादशीदिने नियमः श्लोके
कांस्यमाषं च क्षौद्रं च लोभं वितथभाषणं । व्यायामं च प्रवासं च दिवास्वापमथांजनं । तिलपिष्टमसूरांश्च द्वादशीनाति
वैष्णवैः द्वादश्यां वर्जयेन्नित्ये सर्वपापैः प्रमुच्यते । दिवानिद्रा परान्नं च पुनर्भोजनमैथुनं । परान्नं कांस्यतांबुललेपं निर्माल्यलंघनं ।
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् । कात्यायनः प्रातःस्नात्वा हरिं पूज्य उपवासं समर्पयेत् । अज्ञानतिमिरांधस्य व्रतेनानेन
अतीद केशव [illegible] सुमुखो नाथ ज्ञानदृष्टिप्रदो भव । मंत्रेजपित्वाहरये निवेद्योपवासव्रती । द्वादश्यां पारणं कुर्याद्वर्जयित्वाहः पादकमिति
बृहस्पतिः असंभाष्यानि संभाष्य तुलस्यां तासि काजलं । आमलक्याफलं वापि पारणेप्राप्य शुध्यति । अथ श्रवणद्वादशीनिर्णयः
यदा द्वादश्यां श्रवणनक्षत्रं भवेत्तदा द्वादश्यामुपवसेत् । नारदीये शुक्ला वायदि वा कृष्णा द्वादशी श्रवणान्विता । तयोनैवोपवास

स्मृ०र०कार० अत्रयोदश्यां तु पारणमिति। तथा द्वादशी श्रवणोपेता यो नोपोष्यति मंदधीः। पंचसंवत्सरं पुण्यं कृतं तस्य विनश्यति। एकादशीमुपो
२८ ष्यैव द्वादशीमप्युपोषयेत्। नक्षत्रविप्लोपस्यादुभयोर्दिनताहरः। स्मृतिरत्नावल्यां। माध्याह्नव्यापिनी श्रोणा द्वादश्यां वर्धयेद्व च। त
व्या द्वादशीमप्युपोषयेत्। नभस्यमासद्वादश्यां शुक्लायां माघे च फाल्गुने। माध्याह्नव्यापिनी श्रोणा सौम्यधर्मदिने रवौ च
बहुरात्रेगमे देवांमध्याह्नादूर्ध्वमप्यणु। नभस्यमासद्वादश्यां कुर्यात्तत्रैव पारणं। उत्तराषाढमिलितं श्रवणं द्वादशीयदि। पुरावि श्रा
दश्यं वाप्ययोगोस्तितिथिनक्षत्रसंयुतं। आमध्याह्नोनविघस्ताकुर्यात्तत्रैव पारणं। उत्तराषाढमिलितं श्रवणं द्वादशीयदि। सुरावि
पंचद० दुनास्पृष्टातीर्थे बहुसमयोर्भवेत्। प्रसंगाद्विष्णुनिर्णयः उदयास्पर्शिनी दर्शा पौर्णमास्यां तु यामिका। माध्याह्नव्यापिनी श्रोणा तु पोष्या
दिष्णुतत्सनः एकादश्यं च पौर्णे च अमायां श्रवणं यदि। पूर्णं तिथिं दूषयंति परे हनि व्रतं चरेत्। वैष्णवे श्रवणस्त्वर्के पक्षांतेमूलसं
युते। पूर्वविद्धानकर्तव्या परेहनि व्रतं चरेत्। चतुर्दशीविमिश्रं ये नोपोष्या पर्वणीत्यभो। उत्तराषाढमिश्रं तु नोपोष्या श्रवणा बुधैः। च
तुर्दश्यापि संस्पृष्टा परेद्युर्यामशेषितः। उपोष्या पौर्णिमा तत्र सर्वसंपत्प्रदायिनि। पर्वदर्शोदयादूर्ध्वस्पर्शिनी भविता यदि। परेद्यु
पवासस्यात् सर्वा चतुष्कुलनाशिनी। एवं श्रोणोदयादूर्ध्वस्पर्शिनी भविता यदि। परेद्युर्वा परेद्युर्वा नैवोपोष्यार्थहानिदः। उत्तराषाढमिश्र
परेद्युः सायदा पुनः। माध्याह्नव्यापिनी साह्यात्स्नानमोक्षफलप्रदा। नभस्यशुक्लपक्षे तु दद्यात् श्रवणे यदि। तदारभ्य व्रतं कुर्यान्मार्गशी
र्षे चवान्पप मार्गशीर्षे चवा कुर्याद्देकादश्यां सितेशुभे। हीनायां विष्णुसेनापि व्रतमेतत्समाचरेत्। दशमी श्रवणे जह्येत्तु आयाप्यत्र यथोच
ते। द्वादश्यादिविधाने न सर्वतिथ्येषु निर्णयः सर्वधर्मेषु कः श्रेयान्विष्णुधर्मेषु योधिकः। वृद्धावायेक्षये ब्रह्मा समेसौरमतः परं नऊ
नात्र विमुक्तिविमुक्तेन संदेहो जायते यदि। एकादशी परित्यज्य द्वादश्यां समुपोषयेत्। एकादशीमहिमा पुराणे। एकादशेंद्रियैः पापं यत्कृतं भवति
मनो। एकादश्युपवासेन तत्सर्वं विलयं नयेत्। एकादशीदिने श्राद्धनिर्णयः श्राद्धकालातीतदोषमाह। स्मृत्यंतरे। पिंडतो लाजिनो वा
पि मूर्खो वा योषितमेव वा। योस्तताहमतिक्रम्य चांडालाः कोटिजन्मसु। यदा सूतककार्ये कादाशिग्रहणविरोधो भवेत्स्तताहमतिक्रम २८
णं वे चरादोषः अन्यथा दोषो न स्यात्। तथा च बृहस्पतिः ग्रस्तास्तमितमलं ये यथा श्राद्धं परे हनि। तथैवैकादशी श्राद्धं द्वादश्या ८
मेव कारयेत्। सूतकादौ यथा श्राद्धं सूतकांते समाप्यते। तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत्। मलं ... एकादश्यां रवेगो
धिरा मृताहो यदि वा भवेत्। तद्दिनं तु परित्यज्य द्वादश्यामेव कारयेत्। अथ त्रयोदशी। तत्र शुक्लपक्षत्रयोदशी पूर्वविद्धा ग्राह्या।

षेकं च मं गलमासि विवर्जयेत्। उरुशुक्रास्तिकार्याकार्याणि। गोदावर्यां गयायां च श्रीशैल्ये ग्रहणेयि। अयने विषुवे चैव ६९
वचातुर्मास्यव्रते शुचः उत्सवे षु च सर्वेषु सीमंते च उज्जन्मसु। सुनासुते ज्ययोश्चैव मौढ्यदोषो न विद्यते। पुण्यधिमासि। भाति शुक्रः। ए
कयामे पुरे वापि दुर्भिक्षे राष्ट्रदक्षिणे। धनधान्यपूष्ट स्के सर्वनाशपुरुक्षिते। गुर्विणी सा च वासेन व धूभ्रमपमेव च। यमिकं नवे गके ८२
संमुखे दक्षिणे सति। पतिवेश्म गतानां नारी सूतिं तत्र सा यदि। न गंतव्यं गृहं भर्तुः सार्वकाले ... फ गौ। गर्भः पोष्या गुरवे४
दि वक्षि सोतेव यावत्तिष्ठति चंद्रमाः तावद् धोप्सवेष्ठुक्तः प्रवेशे निर्गमे शुभ्रः रत्नकोशेव कश्यपेषु वसिष्ठेषु भृग्व
त्र्ये गिरसेषु च। भरद्वाजेषु वत्सेषु जातिभुक्तो न विद्यते। अथ ग्रहणनिर्णयः गंगास्नानं प्रकुर्वीत ग्रहणे चं
द्रसूर्ययोः सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः सर्वभूमिसमं दानं ग्रहणे चंद्रसूर्ययोः सर्वस्वे
नापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात् पंके गौरिव सीदति। चंद्रसूर्यग्रहे यस्तु श्रा
द्धं तु विधिवच्चरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे। सूतके पि च संप्राप्ते यदि स्याद्राहु सूतके।
न सूतकं भवेत्तावद्यावच्चंद्रार्कमोक्षणं। सूतके मृतके चैव दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्याव ९५
न्मुक्तिर्न दृश्यते। ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दानं मुक्ते स्नानं विधी
यते। स्पर्शे स्नानं तथा श्राद्धं जपहोमसुरार्चनं। मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते। स्नाया
त्सूर्यग्रहात्पूर्वं मह्नि सायं च रात्रिग्रहात्। ग्रहकाले न चाश्नीयात् स्नात्वाश्नीयाच्च मुक्तयोः। मुक्ते
शशिनि भुंजीत यदि न स्यान्महानिशा। शातातपः अहोरात्रं तु नाश्नीयाच्चंद्रसूर्यग्रहे य

स्मृ॰ क॰ दा॰ मुक्तिं दृष्ट्वा तु भुंजीत स्नानं कृत्वा विधानतः मार्कंडेयः ग्रहणं प्रथमे यामाद्धि प्रथमयामाद्
२२ र्ध्वमित्यर्थः आवर्तनमध्यं दिन अनेन याम्यपाद्यामे ग्रहणं ततः पूर्वयामत्रयं परिहाराय भुंजीत सु
कं भवति॰ ग्रहणं तु भवेद्दिवा प्रथमादधियाम ततः भुंजीत वर्तनात्पूर्वं प्रथमे प्रथमादधः सूर्यग्रह
चनात्क्लीयात पूर्वं यामचतुष्टयं चंद्रग्रहे च यामांस्त्रीन्बालवृद्धातुन विना॰ मत्स्यः अपराह्णे न
मध्याह्ने मध्याह्ने न तु संगवे॰ भुंजीत संगवे चेत्स्यान्न पूर्वं भुंजीत कदाचरेत्॰ इत्यनात्मकविषयं॰ मू॰
सर्वग्रासभवेदिंदोरर्धरात्रादधस्तने॰ दिवा चैव न भोक्तव्यं माहि तु परिभोजनं॰ तथा॰ पूर्वं नि
शीथग्रहणं यदा चेन्दुस्य वे भवेत्॰ तदा दिवा न कर्तव्यं भोजनं शिखिवाहन॰ स्कांदे॰ यदा चंद्रस्य गृ
स्तानि निशीथात्परतो भवेत्॰ भोक्तव्यं तत्र पूर्वाह्णे न पराह्णे कथंचन॰ ग्रहे स्नायाद्दुदक्यापि तीर्थे
ड्डुधृत्य वारिणः अन्नं पक्वमिह त्यज्य यौषधं वसनं गृहे॰ वारितक्रा न नालादि तैलदर्भैर्न दुष्यति॰ ग्रहे स्नाया
दुदक्यापि तीर्थे ड्डुधृत्य वारिणः अन्नं पक्वमिह त्यज्य यौषधं वसनं गृहे॰ वारितक्रा न नालादि तैलदर्भै
र्न दुष्यति॰ आरनालं पयः तक्रं दधि स्नेहाज्य पाचितं॰ माणिकं स्यादकं चैव न दुष्येद्राहुसूतके॰ य श्रीनामः
स्तसन्यदिवा भानुरस्तं याति ग्रहेण तु॰ सर्वे ते दोषवासं तु कुर्युरेवं वदंति हि॰ वेधः त्रिषट्दशायो
पगतं ३।६।१०।११। नराणां शुभप्रदं स्यात् ग्रहणं निंदोद्दिः सप्तनंदेषु॰ २।७।१।५। च मेध्यमं स्या २२

द्वेषांशु निष्टं मुनयो वदंति॰ स्नानदानहिरण्येन श्राद्धहोमजपादिकं॰ सूतकेऽपि प्रकर्तव्यमिति मन्वादयो जगुः स्व
र्णपाट्टं जुनं वापि भूर्जपत्रे थवालिखेत्॰ तस्य मूर्ध्नि विनिक्षिप्य स्नपयेद्द्विजोत्तमः मंत्रः इंद्रोऽनलो दंड
धरः ऋक्षपापाशायुधो वायुधनेशरुद्रः मज्जन्मऋक्षोममराशिसंस्थान्कुर्वंतु सर्वे ग्रहदोषशांति॰ सौ
दे सौवर्णनिर्मितं नागं सतिलं ताम्रभाजनं॰ सदक्षिणं सवस्त्रं च श्रोत्रियाय निवेदयेत्॰ दानमंत्रः
तमोमय महाभीम सोमसूर्यविमर्दन॰ हेमनागप्रदानेन मम शांतिकरो भव॰ अथ नवग्रहपूजनं
याज्ञवल्क्यः सोमः सूर्यो महीपुत्रः सोमपुत्रो बृहस्पतिः शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः स्म
त्युक्ते॰ अधिप्रत्यधिदेवानां मंत्राश्चर्ष्यादिसंयुतान्॰ तत्तन्मूर्तिश्च जानीयाद्द्रोष्यन्नं चैव ग्रहान्बुधः
नवरत्नानि॰ माणिक्यं मौक्तिकं वैडूर्यं मरकतः पुष्परागकं॰ वज्रं नीलं च गोमेदं दूर्यं नवग्रहान्क्रमात्॰ वै॰ ८
समिधानि॰ अर्कः पालाशः खादिरमपामार्गस्तथैव च॰ अश्वत्थोदुंबरं शम्याः दूर्वाः कुशाः समित्क्रमा
त्॰ दक्षिणा॰ धेनुः शंखं तथानड्वान्हेम वासो हयस्तथा॰ कृष्णगौरा यसं सीसं कांस्यं वै दक्षिणाः क्रमात्
स्थापितप्रतिमानि॰ ताम्रे रजतसौवर्णं हेमस्वर्णं च राजतं॰ लोहं सीसं तमः कांस्यं प्रतिमाश्च ग्रहक्रमा
त्॰ ग्रहदिग्मंडले देव्याग्नौ त्वंवर्णमुखं क्रमात्॰ अधिप्रत्यधिदेवानां तत्तन्मंत्रेण पूजयेत्॰ स्थाप्यप्रति
दिशांमुखानि॰ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यौ उदङ्मुखौ॰ प्रत्यङ्मुखः शनिः सोमस्तेषां दक्षिणतो मु
खाः॰ अथावाहनं॰ आदित्यं मध्ये वर्तुलकमंडले कलिंगदेशं काश्यपगोत्रं रक्तवर्णं पूर्वमुखमग्न्यापि
दैवतं रुद्रप्रत्यधिदेवतमादित्यमावाहयामि॰ चंद्रायाग्नेये चतुरस्रमंडले आत्रेयगोत्रं श्वेतवर्णं मत्स

ग्र॰ शां॰ उन्मुखं आपमधिदेवतंगौरीप्रत्यधिदेवतंसोममावा॰ अंगारकंदक्षिणेग्निकोणमंडले अवंतिदेशं भारद्वा
२४ जगोत्रंरक्तवर्णं दक्षिणामुखंरथिन्या अधिदैवतंस्कंदप्रत्यधिदेवतंअंगारकमावा॰ बुधमीशानेबाणाकारमधिम
रमंडलेमागधदेशमात्रेयगोत्रंपीतवर्णमुदङ्मुखं विष्णुअधिदेवतंपुरुषप्रत्यधिदेवतंबुधमावा॰ बृह
स्पतेरुत्तरदीर्घचतुरस्रमंडलेसिंधुदेशमांगिरसगोत्रंस्वर्णवर्णंउदङ्मुखंइंद्राधिदैवतं ब्रह्मणस्पतिप्र
त्यधिदेवतंबृहस्पतिमावा॰ शुक्रः पूर्वपंचकोणमंडलेभोजकटदेशंभार्गवगोत्रंश्वेतवर्णंपूर्वमुखंइंद्राण्य
धिदैवतमिंद्रप्रत्यधिदेवतंशुक्रमावा॰ शनैश्चरंपश्चिमेधनुराकारंमंडलेसौराष्ट्रदेशंकाश्यपगोत्रंनील
वर्णंपश्चिममुखंप्रजापत्यधिदेवतंयमप्रत्यधिदेवतंशनैश्चरमावा॰ राहुंनैरृत्येशूर्पाकारमंडलेबर्बर
देशंपैठीनसिगोत्रंकृष्णवर्णंदक्षिणामुखंसर्पराज्ञी अधिदेवतंमृत्युप्रत्यधिदेवतंराहुमा॰ केतु
वायव्येध्वजाकारमंडलेअंतर्वेदिदेशंजैमिनसगोत्रंधूम्रवर्णंदक्षिणामुखं ब्रह्माधिदैवतंचित्र
गुप्तप्रत्यधिदैवतंकेतुमावाहयामि॰ दुर्गांगणपतिंक्षेत्रपालंमरुतंजयरुद्रादीन्लोकपालाना
वाहनादिषोडशोपचारान्पूजयेत्॰ ततः होमकुंडलक्षणं॰ तत्रांगुलप्रमाणं॰ तिर्यग्यवोद
रान्यष्टौऊर्ध्वावाव्रीहयस्त्रयः॰ प्रमाणमंगुलस्योक्तंवितस्तिर्द्वादशांगुलं॰ एकोनविंशतिरत्नि श्रीराम॰
ररत्निस्त्वेकविंशतिः॰ चतुर्विंशांगुलोहस्तःप्रमाणंपरिकीर्तितं॰ होमपरिमाणं॰ रत्न २४
मात्रंशतार्धंस्यात्शते चारत्निमात्रकं॰ सहस्रेहस्तमेकंचचतुर्विंशांगुलंमितं॰ अयु

तंतुद्विहस्तस्यचतुस्त्रिंशत्तथांगुलं॰ अर्धलक्षेत्रिहस्तंचद्विचत्वारिंशदंगुलं॰ लक्षहोमेचतुर्हस्तंऊनपंचदशांगुलं॰ को
टिहोमेबुधैश्चैवअष्टहस्तंतुनाधिकं॰ न्यूनाधिकंनकर्तव्यंकुंडंकर्मविनाशनं॰ अधिकंचभवेद्रोगीहीनंधेनुधनक्षयं॰ व
क्रंतुंडेचसंतापोमरणंछिन्नमेखले॰ मेखलारहितेशोकोयोनिहीनेस्त्रिनाशनः मेखलात्रयसंयुक्तंपञ्चाङ्गुलं॰
एकहस्तमितेकुंडेवेदाग्निर्नयनांगुलः मेखलायास्मतास्तिस्रोमेखलाचत्रयोमयः कोष्ठादूर्ध्वंकुंडेरसवेदगुणां
गुलः कुंडेचतुःकरेकार्याअष्टषट्चतुरंगुलं॰ मेखलामध्यतोयोनिंकुंडंत्र्यंशेनविस्तृतः अष्टोत्तरंतुसाहस्रंशतम
ष्टाधिकंतथा॰ कुं अष्टाविंशतिरष्टौवाएकैकस्यतुहोमयेत्॰ संकल्प॰ स्थंडिलाद्यात्मभागांतंकृत्वाप्रधानाहुतीं॰
त्वास्विष्टकृत्पूर्णाहुतींकृत्वाबलिदानं॰ ग्रहशांतिर्गडशांतिवास्तुहोमस्तथैवच॰ वारुणेचंडिकाहोमेबलिपूजा
विधीयते॰ होमशेषंसमाप्यैवंसम्यक्विप्रान्प्रपूजयेत्॰ श्रेयोदानजलेनैवसिंचेयुर्दंपतीव्रतौ॰ ग्रहदानानि॰
धेनुःशंखोवृषस्वर्णवस्त्रवाजिचगौस्तथा॰ दद्यादायसछागोपिसर्वेषांप्रीतिहेतवे॰ गोदानमंत्रः गवामंगेषुतिष्ठंति॰
॰ शंखदानमंत्रः शंखस्त्वंपुण्यशंखानांमंगलानांचमंगलं॰ विष्णुनाविधृतोनित्यमतःशांतिंप्रयच्छमे॰ वृषदानम॰

स्म॰ क॰ धर्मस्त्वंरक्षणाय जगदानंदकारकः अष्टमूर्तेरधिष्ठानमतःशां॰ हिरण्यदानमंत्रः हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॰ वस्त्र
३५ दानं॰ वस्त्रयुग्मंस्तुभयमावासुदेवस्यवल्लभः प्रदानात्तुष्यतोविष्णुरतः शांतिं॰ हयदानमंत्रः उच्चैःश्रवससमस्त्वाना
त्रोतोविजयकारकः श्रीसूर्यवाहनंयस्मादतःशांतिप्रयच्छमे॰ कलधेनुः यस्मात्वंपृथिवीसर्वाधेनुकेकस्यसन्निभे॰
सर्वपापहरानित्यमतःशांतिं॰ आयसः यस्मादायसकर्माणिभवदीयानिसर्वदा॰ हलागिहलायुधादीनि तस्मा
शांतिंप्र॰ छागः यस्मात्वंसर्वयज्ञानांमंगत्वेनव्यवस्थितः यानंविभावसोनित्यमतःशांति॰ ज्योतिःप्रकाशः॰ गुडा
न्नक्षीरकानारंसुक्रान्नंदधिभक्षणं॰ घृतान्नंकृसरोमांसंचित्रान्नंसर्पतः क्रमात्॰ सर्वदानमंत्रः सदानं॰ सर्वस
स्याश्रयाभूमिर्वराहेणासमुद्धृता॰ अनंतसस्यफलदामतः शांतिंप्रयच्छ॰ तिलमंत्रः तिलाःपापहरानित्यंविष्णोर्देह
समुद्भवः तिलदानाच्चसर्वंमेपापंनाशंकरोमव॰ सात्वं॰ कामधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितं॰ देवाज्या
हारसततमतःशांतिंप्र॰ वस्त्रं॰ शीतवासोद्भवसंत्राणंलज्जायारक्षणंपरं॰ देहालंकारणंयस्मादततःशांतिंप्रय॰ श्रीराम:
धान्यं॰ धान्यंकरोषिदातारमिहलोकेपरत्रच॰ यस्मात्वमुच्यतेधान्यमतःशांतिं॰ गुडः सामवेदस्तुवेदा ३५

नांमहादेवस्तुयोगिनां॰ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा॰ तथारसानांप्रवरःसदैवेक्षुरसोमतः तस्मान्ममपनाकु
क्ष्मींददस्वगुडसर्वदा॰ शर्करा॰ अमृतस्यांतरसोत्पन्नाइक्षुधेनोतुशर्करा॰ मनोभवधनुर्मध्यातुधृताशर्करयाधुना॰ सूर्यप्रि
यकरानित्यमतःशांतिं॰ तैलं॰ नराणांमंगलार्थायब्रह्मणानिर्मितंपुरा॰ तैलदानेनमेपापंविलयंयातुसर्वदा॰ लवणं॰ य
स्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना॰ रसानामग्रजंश्रेष्ठंलवणंबलवर्धनं॰ ब्रह्मणानिर्मितंस अतःशांतिं॰ रौप्यं पि
तृणांवल्लभंयस्मिन्विष्णोर्विष्णोर्देहसमुद्भवः नजतंपाहियस्मात्त्वंःकोत्रासंतापसागरात्॰ गोधूमः॰ धान्यचूडामणीजं
बूद्वीपेगोधूमसंस्थितः गोवर्धनदंसौम्यमतःशांतिं॰ मुद्गः मुद्गबीजानिवैयस्मात्प्रियाणिपरमेष्ठिनः तस्मान्मुद्गप्रदाने
प्रीतिसिद्ध्यतुमेसदा॰ गोवर्धनगिरिर्भा समर्पेहरिभक्तितः चणकासर्वपापघ्नामतःशांतिं॰ आढकः॰ आढकान्
नन्नणाभव्यानाग्निपिहिजसत्तम॰ ग्रहाणांतारकप्रीत्यैसर्वारिष्टप्रशांतये॰ कुलित्थः॰ अग्निगर्भोद्भवासौम्याबकरो
ग्ययदाःप्रदः कुलित्थसर्वपापघ्नमतःशांतिं॰ तंदुल॰ प्राणिनांजीविनोपायंसोमेनाराधितपुरा॰ तस्मादेषांप्रदाने
नमेस्त्वाव्याहतंफलं॰ मसूरिका॰ आदित्यतेजसोत्पन्नाःसर्वमंगलदायकः॰ मसूरिकाप्रपापघ्नामतःशांतिं॰
शाकदानं॰ शाकंशोकविनाशायपुत्रपौत्रप्रवर्धनं॰ तस्माच्छाकप्रदानेनप्रीतोभवजनार्दन॰ फलं॰ फलंमनोरथफलंप्र
ददातिसदानृणां॰ पुत्रपौत्रादिवृद्धिंचतस्मात्कांतिंप्रयच्छति॰ तांबूलं॰ तांबूलंश्रीकरंभद्रंब्रह्मास्त्वाविष्णुन्निवात्म
कं॰ तस्मादस्यप्रदानेनमेमेस्तुविकलंफलं॰ पीतवस्त्रं॰ पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभं॰ यस्मादनंनमया

यमरव्यद्रुमसंभवं॰ पवित्रं सर्वदा यस्मादतः शांतिं॰ मुद्रिका॰ हिरण्यमुद्रिकादानं सौवर्णं चांगुलीयकं॰ सर्वप्रदं प्रयच्छ ४८

स्मृति॰कौ॰ देव मम पापं व्यपोहतु॰ रक्तवस्त्रं॰ रक्तवस्त्रं सुगंधं यस्मात्सदादित्यस्य वल्लभे॰ प्रदानादस्य मे भानुः शांतिं यच्छतु सर्वदा॰ कृष्णवस्त्रं
३६ मनोहरं कृष्णवस्त्रं बलभद्रप्रियं सदा॰ आयुर्वर्धयते नित्यं ब्रह्मणा निर्मितं पुरा॰ चित्रवस्त्रं॰ षण्मुखस्य प्रियं नित्यं चित्रवस्त्रं
मनोहरं॰ तस्मादस्य प्रदानेन शांतिरस्तु सदा मम॰ चंदनं॰ गंधर्वचंदनं यस्मात्सर्वदेवप्रियं सदा॰ यस्मादस्य प्रदानेन त्री
यतां मधुसूदनः॰ ह्लादयंति सुमनुष्याणां देवानामपि वल्लभः यक्षकर्दमदानेन सुखं कुर्वंतु मे सदा॰ कांस्यपात्रं॰ कांस्यब्र
ह्मादिनः साक्षात्कांस्यमेव विभावसुः॰ कांस्यं विष्णुमयं यस्मादतः शांतिं प्रयच्छ मे॰ ताम्रपात्रं॰ यानि पापान्यनेकानि कामा
कामाकृतानि च॰ ताम्रपात्रप्रदानेन तानि नश्यंतु मे सदा॰ लोहदानं॰ यस्माद्यमस्य कर्माणि ताम्रदानानि सर्वदा॰ लांगला
द्यायुधादीनि तस्माच्छांतिं॰ कार्पासदानं॰ त्वमेव वारणं यस्माल्लोकानामिह सर्वदा॰ यस्मात्कार्पासमेसद्यः पापं प्रणाशमेनो
व॰ कंबलस्योर्णप्रवारणं रम्यं सीतवातभयापहं॰ यस्मात्सुख निवारित्वमतः शांतिं॰ तनसस्य॰ कीटजंतरसंदिंमिश्रीणान्तुकमलो
पत्तिः॰ गृहदानं॰ इदं गृहं गृहाण त्वं सर्वोपस्कर संयुतं॰ तव विप्र प्रसादेन ममास्त्वाभिगतं फलं॰ शालग्राम॰ शालग्रामशिलां शुद्धां
स्निग्धां वक्रादिसंयुतां॰ विष्णुप्रीतिकरं दानं मम पापं व्यपोहतु॰ चक्रदानं॰ चक्रांकित नमस्तुभ्यं सदा द्वारावतीप्रियः तस्मा
त्तव प्रदानेन मम पापं व्यपोहतु॰ शंखदानं॰ शंख॰ अघकरो नित्यं सर्वमंगलदायकः॰ तस्मात्तस्य प्रदानेन शांतिरस्तु सदा म
म॰ घंटादानं॰ घंटासुलक्षणं पुण्यं शुभध्वनिसमायुतं॰ इष्टकामप्रदा स्यामि ददामि पुरुषोत्तम॰ पुस्तकदानं॰ सरस्वती नमस्तु
भ्यं जगज्जाड्यापहारिणी॰ पुस्तकं प्रयच्छामि भारती वसदा मयि॰ महिषीदानं॰ महिषासुरस्य जननी या सा लक्ष्मीर्वरदा मम॰ वै
वस्वतप्रियादेवी सर्वरोगविनाशिनी॰ अपमृत्युभयेभ्यो मां महिषी यातु सर्वदा॰ उक्तदेशप्रदातव्य मम पीडां व्यपोहतु॰ उ
भयमुखी॰ अथोभयमुखवाद्धान्यं मंत्रेणानेन संयमि॰ गृहाणोभयमुखीं भवत्राता ममास्तु वै॰ मम वंशविशुद्धये॰ श्रीरामः ३६

३७ धर्मसंस्थस्तिकरोभव॰ गोदानं॰ यज्ञसाधनभूता या विश्वस्याघौघनाशिनी॰ विश्वरूपधरो देवः प्रीयतामनया गवा॰ संग्रहे॰ धेनुं
छकरे कन्यां दासीके शाकूयः श्रुतौ॰ गृहस्तंभे वृषं स्कंधे जंगे दंते प्यजस्तने॰ शोवाणि सर्वदानानि करे विप्रस्य दक्षिणे॰ दक्षिणे
समर्थे विषान् द्वाक्यानुसारतः॰ योदद्याद् क्तिपूर्वेण तद्दानं वटबीजवत्॰ याज्ञवल्क्यः॰ न्यग्रोधस्य यथा बीजं स्तोकं सुक्षेत्रबीजं॰ ब
हुविस्तीर्णतां याति तद्दानं स्कृपात्रगं॰ कृष्माण्डदानं॰ देवदेव जगन्नाथ सर्वलोकमहेश्वर॰ नाहि मां पुंडरीकाक्ष शरणागतवत्सल॰
ब्रह्महत्यानिवृत्त्यर्थं ब्रह्मणा निर्मितं पुरा॰ कृष्माण्डं कुबीजाढ्यमतः शांतिं॰ इति सर्वदानानि॰ अथ तीर्थयात्राविधिः॰ स्कांदे॰ चित्तम
न्तर्गतं दुष्टं न तीर्थफलमश्नुते॰ शतशोपि जलैर्धौतं सुराभांडमिवाशुचिः॰ ज्ञानपूते ध्यानजले रागद्वेषमलापहे॰ यः स्नाति मानसे
तीर्थे स याति परमां गतिं॰ यथोक्तफलदं तीर्थं भवेच्छुद्धात्मना नृणां॰ काम क्रोधेन लभते यः पनार्थेन गच्छति॰ अयं तीर्थफलं तस्य प्र
सगेनापि गच्छति॰ यद्विधौ तीर्थप्राप्तिः स्यात् दाक्षिपूर्ववासरे॰ उपवासस्तु कर्तव्यं प्राप्ते न्हि श्राद्धदो भवेत्॰ वपेत्केशान्सिन्नस्य
पिन खान्यपि निकृंत॰ धौत॰ विधि यत्र कृते तीर्थं षण्मासस्यांतरे यदि॰ प्रसंगाच्च पुनः प्राप्तिं कुर्यान्मुंडनादिकं॰ गंगायां भा
स्यपित्रोः॰ क्षेत्रे तु भास्करस्य च॰ निषिद्धतिथिवारादि नाति नदोषः होमः॰ मी॰ न जीवपितृकः कुर्यात्तीर्थादिस्युपोषणं॰ अत्रा
कर्म च स्थितापस्य गंतुं तीर्थं न वाक्यतः॰ कुर्याज्जीवपितृकोपि तीर्थं कं पितुराज्ञया॰ सिंहस्थो गुरुः॰ ब्रह्माडपुराणे॰ सिंहराशिग
ते यस्मिन्दिने स्कृ गुरुर्भवेत्॰ तस्मिंस्तु गोतमस्नानं कोटिजन्माघनाशनं॰ धर्मपत्न्या च गर्भिण्यां गोमत्यां परिवाकृते॰ व
पनं श्राद्धं स च्चर्या गोतम्यां सिंहगे गुरौ॰ चौलकर्मोपनयनं विवाहं वास्तुकर्म च॰ अन्यानि शुभकर्माणि न कुर्यात्सिंहगे गुरौ॰ गोदावर्युं
त्तरे वर्ज्जः सिंहराशिगते जीवे गोतम्याश्चैव दक्षिणे॰ न तं चौलं विवाहादि कुर्यादिं महर्षयः॰ संग्रहे॰ सिंहगुरगे गोतमी लक्ष्वेण्यांतसे
वकन्यागते देव॰ वृषपूज्ये॰ तत्रैव यात्रापि हि गुर्विणी नां विवाहकर्तृवपनं प्रवासं॰ चातुर्मास्यव्रतानि॰ हेमाद्रौ॰ स्कांदे॰
रमातु गृह्णीयात्संक्रांतौ कर्कटस्य तु॰ आषाढादौ न रोभक्त्या चातुर्मास्यव्रतः क्रिया॰ प्रथमे मासि कर्तव्यं शाक व्रतमनुत्तमं॰

स्त्र० क० ४७ पयोव्रतं तृतीये तु चतुर्थे तु निरामयं। द्विदलं बहुबीजं च वर्जयेत् कुंडमिकक: तथा। श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा। आश्विने मो
वर्जयेत् क्षीरं कार्तिक्यां द्विदलादिकं। शाकं दशविधं प्रोक्तं वर्जयित्वा तु प्रयत्नतः। पत्रं पुष्पं फलं नालं मूलकं मलमेव च निर्निपिंडय
तुवांश्चकंत्राकं चामिषं तथा। माषमुद्गमसूरांश्च चणकांश्च कुलित्थकाः। निष्पावराजमाषांश्च आषाढकादिकास्तथा। नालीफकं बहु
बीजं च कुबीजं द्विजोत्तमाः। बहुबीजं त्रिदिव्याकुष्पत्रे किरातकं तथा। सूतकेव्रतनिर्णयः विष्णुरहस्ये। पूर्वसंकल्पितयच्च व्रतं यन्नि
यत व्रती। तत्कर्तव्यं नरैश्चशूद्रदानार्चनविवर्जितं। काम्योपवासे प्रक्रांतेत्वंतरा मृतसूतके। अत्रकाम्य व्रतं कुर्याद्दानार्चनविवर्जितं। आर्तवसूतके ४८
वास्याद्युपक्रांते व्रतं यदि। व्रतोक्तमन्नं मम्रीयाद्दंत्रौ चांतर्जनादिकं। कूष्माण्डबदरीधात्रीवृंताकं चैव तिंत्रिणी। पटोलं कोद्रवं चेक्षुहरो सुस्तेनभक्ष
व्र० ७ येत्। विलोमः नैधात्रीं च बदरीं कूष्माण्डं तिंत्रिणीफलं। हंसेसु तेन भुंजीयाद्यावत् सूर्यमी दूरतः। कलिंगानि पटोलानि वृंताकं संधितानि च तत्यजे को
पू०८ त्तिके मासि यावद्वयाभ्रजसं ... नवौदनं माहिष्यं चम्रक गुर्वाल वातिथिः खंडं च ध्येयेन तत्र चातुर्मास्ये विधानं नहिति। अथ तुलसीस ति ८
पूर्णं। ब्रह्मो वाच। अथातः संप्रवक्ष्यामि तुलसीपूजनं विधिः। चातुर्मास्ये विशेषेण पूजनं तु महाफलं। अथवाऽन्यमासे तु पूजनं तु समा
रभेत्। लक्षप्रमाणमात्रस्यात्तु मंजरी दलैर्युतं। सहस्रमयुतं वापि शतमष्टोत्तरं तु वा त्रिपत्रयुक्तसंयुक्तदलसंख्या विधीयते। दलैर्स्संयुक्तै वापि
पत्रेण संयुते यदि। त्रिमासैः संयुतैर्यत्रच देवाय परिपूजयेत्। व्रतांते विधिना भक्त्या पूजनं तुलसीदलं। सुवर्णतुलसीकार्यं रत्नमौक्तिकवेष्टये
त्। प्रवालवेष्टनं कलामालायुक्तं प्रपूजयेत्। तन्मालां ब्राह्मणे दद्याद्यथावित्तानुसारतः। गोदानं च हिरण्यं च वस्त्राच्छादनपूर्वकं। सुशीला श्रीरामः
यस्य विप्राय कृष्णप्रीतिकरं परं। गोघृतं पयसान्नं च मूलमंत्रेण होमयेत्। पौरुषेण तु सूक्तेन ... होममाचरेत्। अष्टोत्तरशतं सं ४७
ख्या तत्र पंचाधिकैरपि। शतद्वयेन वा कार्यं यथावित्तानुसारतः। होममंत्रं समाप्याथ मालादानमतः परं। प्रवालरत्नसंयुक्तं मौक्तिकं कं
मनिर्मितं। तुलसीदलसंयुक्तमतः प्रीतिं प्रयातु मे। इति तुलसीदलदानमंत्रः। यादृष्टा निखिलाघसंघशमनी स्पृष्टा वपुष्पावनी
रोगाणामभिवंदिता निरसिनी सिक्तांतकत्रासिनी। प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे वि
मुक्तिफलदा तस्यै नमः। इति प्रार्थनामंत्रः। नमस्कारं ततः कृत्वा प्रदक्षिणमतः परं। तुलसीकथनं कृत्वा ब्राह्मणान्भोजयेत्त
तुलस्यै०

उपवासस्वरूपाणि व्रतानि यानि संति वै। तानि सर्वाणि विप्रेंद्र प्रबोधिन्यां समापयेत्॥ ४८

तः सदक्षिणास्तांबूलं ब्राह्मणाय निवेदयेत्। इति वामनपुराणे ब्रह्मनारदसंवादे लक्षतुलसीसमर्पणं संपूर्णं। अथ लक्षवर्तिविधिः
नारद उवाच। नारीणां गोप्यपापानां पापानां विविधानि वै। गरदानादि जपापं गतो बंधुजनेषु वा। भ्रूणहत्यादिजं पापं गर्भस्त्रावादि
जं तथा। परपुरुषकामाद्वा रजः संकनजं तथा। नानावार्तादिरतिजं नानाविषयकांक्षितं। पुंसः पंचगुणं पापं स्त्रीणां पतनेन जायते। भ्रा
तरं पितरं पुत्रं श्वश्रुं स्वालकं तथा। योनिर्द्रवति नारीणां तेजस्पर्शाद्घृतं यथा। तस्मात्तासां गतिर्नास्ति पतिलोकं न गच्छति। पतिलोकं
पापान्मुक्तिं वद मां च पितामह। ब्रह्मोवाच। साधु चोक्तं त्वया ब्रह्मन्स्त्रीणां लोके न विद्यते। यत्नेन क्रूरतां चैव निर्दयत्वं ... च
साहसं। लोलुपत्वं गृहादौ च कथं तासां विनिष्कृतिः। तथापि वक्ष्ये विप्रेंद्र यदुक्तं हरिणा पुरा। अनायासेन मर्त्यानां नारीणां च विदूषिता
व्रतस्याचरणात्पापं गधले द्रोण विद्यते। चातुर्मास्ये तु संप्राप्ते माधवे त्रायने गते। निराजनादिकार्याणि वर्तिलक्षेषु नारद। आषाढस्यासि
ते पक्षे एकादश्यां समाचरेत्। कार्तिकस्यासिते पक्षे पौर्णमास्यां समाचरेत्। द्वादश्यां कानयेद्देवं होमं ब्राह्मणभोजनं। इति नाणि च
सर्वाणि पौर्णमास्यां समापयेत्। लक्षस्य वर्तिजैर्दीपैर्युनीराजनेनपि। प्रत्यहं तोषयेद्विष्णुं यावल्लक्षं समाप्यते। विधवानां च नारीणां
सधवानां तथैव च। गोप्यानां चैव पापानां प्रकटानां तथैव च। प्रायश्चित्तविहीनानां दुःखदानां महामुने। नीराजने महाविष्णोर्निष्कृ
तिः ... स्वायः उद्यापनं ततः कुर्यात्स्वस्तिवाचनपूर्वकं। हव्यवाहं प्रतिष्ठाप्य चक्षुष्यं तं च कारयेत्। अग्ने नयेति मंत्रेण शतमष्टोत्तरं च
हेमं त्रोषं समाप्याथ कुर्याद्ब्राह्मणभोजनं। षष्टिपलं कांस्यपात्रं घृतपूर्णं प्रकल्पयेत्। पात्रं च गुरवे दद्यात्स्वच्यतसर्वकिल्बिषः त्रि ७२
इति स्कंदपुराणोक्त लक्षवर्तिविधिः। अथ कर्मविपाकः। स्मृतिसारे प्रोच्यते कर्मविपाकः। तत्र यमः। अग्निस्तीर्णस्य
स नित्यं हि ग्रणं वर्ततेषु भुवि। पूर्वजन्मकृतं पापं व्याधिरूपेण बाध्यते। योगीश्वरः। महापातकजन्म नानरकान्प्राप्य दा
रुणं। कर्मक्षयप्रजायंते महापातकिनः सदा। ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतिकः। हेमहारी तु कुनखी दुःश्चर्मा गुरु

देवहारी

स्मृ०नि० तल्पगः कांस्यहर्ता च विभेदकु त्वीम्रूको वागपहारकः धान्यहर्तातिरिक्तांगः पिशुनः पूतिनासिकः तैलहृत्स्यामलानूमर्त्यः पूतिवक्त्रोऽद्य सूचकः य॰
५८ ब्रह्मस्वं प्रोषितां हृत्वा ब्रह्मस्व धा... पिशुनः पूतिनासिकः मपहृत्य च अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः हीनजातो प्रजायं
तेन तो जायेत सूकरः पत्रशाखादिकं हृत्वा त्रण्यवा जायते ष्टिनं काविकापुराणे ब्राह्मणोऽस्वर्णहारी स्यात् प्रमेही जायते नरः आत्तं भ४
धः पुस्तकं हर्ता चित्रवस्त्रापहारकः गलगंडी भवेन्मर्त्यो गण द्रव्यापहारकः श्वासकासान्भवेन्मर्त्यो बंदीग्रहण तौ चेत् निरीक्षण
परस्त्रीणां चक्षुरोगी सदा भवेत् यः सर्पान्वाहनं कृत्वा विसर्पि जायते नरः ब्रह्मांडे परद्रव्यापहारी च परपत्न्यापहारकः परस्य संत
तद्द्वेषी सकल कृताऽपि जायते मातापित्रोर्गुरुद्वेषी स ...कृत्रापि जायते ध्यानां च विषग्रहात् पशूनां मर्मभेदी च वातरोगी प्रजायते परस्त्री
गामिनश्चैव तपस्वीगामिनस्तथा परस्त्रीष्वनुकूलश्च जायते तिप्रमेहिनो योगी रः गुरुं त्वंकृत्य हुं कृत्वा विप्रं निर्जित्य वादतः
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः कांस्यपात्रं तु योऽहृत्वा पुरुभावि निरंतरं कार्पासलवणं हृत्वा श्वेतकुष्ठी प्रजायते मार्कंडेय :
यस्वामि निंदकश्चैव अपस्मारी प्रजायते मनुः शास्त्रोक्तेन वमार्गाणि विक तिस्यान्य मार्गकः महाव्रा... घातश्च बधिरश्चोपजा
यते वसिष्ठः देवद्रव्यापहर्ता च देवकार्यविघातकः अभक्ष्याभक्षकश्चैव पांडुरोगी प्रजायते अंडो वा जायते गोघ्नो ग्रहणी वानप
स्पृहा मनस्तापं च यः कुर्याद्ब्राह्मणानां विशेषतः ज्वरवान्जायते मर्त्यो अश्ववातबलान् भवेत् विश्वासघातकश्चैव वहा त्रिपु श्रीनामः
कोऽप्रजायते भक्ष्यहर्ता कामिनीस्याद्गृहं लंघ्र्भि र्नरः स्पृहा वापीकूपतडागादिभेदकस्तु निःसारवान् सूच नस्फुलवान्मर्त्यो ५८
विस्फोटयति निंदकः विद्धीफलहर्ता च मूको वागपहारकः निक्षेपस्य च यो हर्ता नाक वान्जायते नरः व मंडा ... रनं कृ
वात दुर्गतिजायते च्छिद्रो उदारी च भवेन्मर्त्यः स्त्रीणां गर्भनिपातनात् केशं च कर्षणं कृत्वा ब्राह्मणानां च मूढधीः असत्य
वान्स कृत्वा त्वाम... चजायते शांतिपर्वणि येनयेन तु पापेन कर्मणा पुत्र ये गतिः प्रयाति नरकैस्तथैव वक्ष्यम्यतःप घोर॰

रः गुरोर्भार्यां समाकृष्य कृत्वा चालिंगनादिकं श्वानयोनिद्वितंगत्वा सयोनिषु जायते परदाराभिमर्षश्च यथार्त राष्ट्रं प्रजायते मातृषा र्क॰
र्यां च गुर्वं ध्यायोनिं गच्छति मोहितः गर्भं द्भितं च आप्नोति तालः सर्पाभिजायते उपस्थिते विवाहे तु दानकालेऽथवा भवेत् विघ्नं करोति यो
मोहान्मृतो जायते सूकरः मूषको धान्यहारी स्याद्योनिषु ष्टवं तिपि चित्रवस्त्रं संस्तु चोरालवणहारकः मातापितरमाक्षिप्य
संकल्पं सञ्जायते ताडयित्वा तु ताव नकाक रध्रोऽप्रजायते गौतमः पापमेव परिज्ञाय तत्पापं न समाचरेत् तस्मात्सर्वप्रयत्नेन पु
नैव समाचरेत् शतिकर्मविपाकः पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते तच्छांतिरौषधैर्दानैर्जपहोमसुरार्चनैः अथ सर्वप्रायश्चि
तं तत्र सभालक्षणं चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः स धर्म इति विज्ञेयो नेतरेषां सहस्रशः सभा न च प्रवेष्टव्या वक्तव्यं वा समंज
सं अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी दीयते यद्यजानाद्वै यावाश्च न समागते तच्चपापं ततस्तथा... दातानमधिगच्छ
ति ... किंत्संच ज्योतिषं धर्मनिर्णयं विमानमस्त्रेण या... ब्रह्मघातकः पापं नव विधा महापातक १ तत्सम २
तदितिदिष्ट ३ संकलीकरणं ४ मलिनीकरण ५ जातिभ्रंशकरण ६ अपात्रीकरण ७ प्रकीर्णक ८ उपपातक ९ ब्रह्महा
मद्यपस्तेयस्तथैव गुरुतल्पगः महापातकिनस्त्वेते तत्संयोगी च पंचमः तत्समानि अकृष्टसाञ्छितो वापि धनैर्वापि प्रयोजितः यस्तु
हि न्यत्यजेत्प्राणं तमाहुर्ब्रह्मघातकः तदतिदिष्टः जनन्यां च भगिन्यां च स्वसुतायां तथैव च स्नुषायां गमनं चैव विज्ञेयाऽतिपा
तकं सुरापानं गौडी माध्वी तथा पैष्टी विज्ञेया त्रिविधा सुराः मद्यसमानि छत्राकं विड्वराहं च लशुनं ग्राम्यकुक्कुटं पलांडुं गृंजनं
चैव मत्याजं ध्यायते द्विजः स्वर्णस्तेयः अपहृत्य सुवर्णस्य षोडशमाष मात्रकः सुवर्णपरिमितं सुवर्णस्तेयः तत्समानि
हरस्य च नरमुष्ट स्त्री भू धेनु हरिणं तथा निक्षेपस्य च सर्वं हि सुवर्णस्तेय संमितः गुरुतल्पगः पितृष्वसुर्मातुश्च मातुला
निस्नुषामपि मातुलानी भगिनी आचार्यतनया तथा आचार्यपत्नी स्वसुतां गच्छन्गुरुतल्पगः तत्समानि सखिभार्यां कुमारीषु स्त्रिय
निम्नस्य जातिषु सगोत्रासु सुतस्त्रीषु गमनं गुरुतल्पवत् तत्संयोगः योयेन पतितेनैषां संसर्गं याति मानवाः स तस्यैव च

स्मृ० कौ०
३९

तं कुर्यात् सर्वे विशुद्धये॥ उपपातकं॥ गोवधः स्त्रीशूद्र...त्यादीनि अन्यानि विविधानि च॥ संकरीकरणादीनि प्रत्येकमुपपातकं॥ ख
राश्वोष्ट्रमृगेभानामजाविकवधस्तथा॥ संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च॥ कृमिकीटादिहननं मद्यानुगतभोजनं॥ फलैधःकुसुमाथे
यं तन्मलीकनवंगतं॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः॥ येवायः पुंसि मैथुनं जातिभ्रंशकरं स्मृतं॥ निंदितेभ्यो धनादानं वा
णिज्यं शूद्रसेवनं॥ अपात्रीकरणं ज्ञेयमसत्येन प्रभाषणं॥ अन्यानिमित्तं यत्तत्प्रकीर्णकमुच्यते॥ अथ ब्रह्महत्यादिप्रायश्चि
त्तं॥ आंगिराः॥ यः कामतो महापापं नरः कुर्यात्कथंचन॥ न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते॥ महापातकानां तु प्रायश्चित्तं स्यादि मरणांति
कत्वात्॥ तथा॥ ...॥ अज्ञानेन तु प्रायश्चित्तं द्विनैः कलकपाली च ...जनान् भिक्षुकर्म वदेयतः॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नु
यात्॥ सुरापानप्रायश्चित्तं॥ मनुः॥ सुरां वा घृतं गोमूत्रं पयसामग्निसन्निभं॥ सुरापोन्यः समं पीत्वा मरणाच्छुद्धिमाप्नुयात्॥ अकामतः
अज्ञानेन तु सुरां पीत्वा रेतो विण्मूत्रमेव वा॥ पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः॥ स्वर्णस्तेयप्रायश्चित्तं॥ ब्राह्मणः सुवर्ण
हारी तु राज्ञे मुसलमर्पयेत्॥ स्वकर्म ख्यापयंस्तेन हतो मुक्तोपि वा शुचिः॥ कामतः स्तेयकर्ता ... सुवर्णहरणे कृते॥
पश्चात्तापेन दानं च यतस्मै एकादश...धिकं॥ गुरुतल्पप्रायश्चित्तं॥ गुरुतल्पाभिमाप्येनां तप्ते सुप्यात् अयोमये॥ सूर्मीं ज्व
लंतीं वा श्लिष्येन्मृत्युना च विशुध्यति॥ स्वयं वा शिश्नवृषणावुत्कृत्य धार्यं चांजलौ॥ निर्ऋतिं दिशमातिष्ठेदानिपातात्॥ ...गः पितु
र्भार्यां तु विज्ञेयं सवर्णायाधिगच्छति॥ जननीयाप्य विज्ञानं स्नात्वा शुद्धिमवाप्नुयात्॥ रेतः सिक्तादवाङ्कृत्वा न गुरुतल्पगः॥
गोवधप्रायश्चित्तं॥ कामतः कृच्छ्रसंतापनं कुर्यात् प्राजापत्यं च लोष्ठके॥ तप्तकृच्छ्रं तु पाषाणेनास्त्रे चाप्यति
कृच्छ्रकं॥ एकवर्षहते वत्से पादकृच्छ्रो विधीयते॥ अबुद्धिपूर्वं पुंसस्य द्विपादस्तु द्विहायने॥ त्रिहायने त्रिपादः स्यात्प्रा
जापत्यमतः परं॥ रहस्यप्रायश्चित्तं॥ रहस्यं यत्कृतं पापं तत्कृतं चोपपातकं॥ ब्रह्महत्यासुरापानं यं गुर्वंगना
गमः तस्य योगं तथा कृत्वा सामर्थ्यं चैव वा तदि दृष्टकं॥ षडब्देन विशुध्येत नरो निर्मुक्तमत्सरः॥ रहस्योपपातक
प्रायश्चित्तं॥ जन्मप्रभृति पापानि बहूनि विविधानि च॥ कृत्वा वा ब्रह्महत्याया षडब्दं कृच्छ्रमाचरेत्॥ व

हरिः
श्रीरामः
स्मृ० ३९

सिष्ठः॥ जन्मप्रभृति यत्पापं मत्वा चोपपातकं॥ षडब्देन तु शुध्येत महतः पातकादृते॥ अथ जातिभ्रंशकरादीनां प्रायश्चित्तं॥
जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया॥ चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया॥ अन्यत्र सर्वं ... न संबध्यते॥ अशीति
र्यस्य वर्षाणि बालो वाप्यूनषोडशः॥ प्रायश्चित्तार्धमर्हंति स्त्रियो व्याधित एव वा स्पंगिनः स्मरणात्॥ अर्वाक् षोडशवर्षाणि अ
वतिरूर्ध्वमेव वा॥ अधर्मी विभवेत्तस्य सांतरीयं तत्र योषितां॥ द्वारव॥ ऊनैकादशवर्षस्य पंचवर्षात्परस्य च॥ प्रायश्चि
त्तं चरेद्भ्राता पिता वान्यसुहृज्जनाः॥ मद्यमांसशरीराणां भक्ष्ययेनास्ति कश्चन॥ दोषः स्यात्पंचवर्षादूर्ध्वं पित्रोः सुत
फुनोः॥ अतो बालतनस्यापि नापराधो न पातकं॥ अथ नानाप्रायश्चित्तं॥ भोजने हवने दाने विण्मूत्रोत्सर्जनेपि च॥ वि
नात्विडुपवीतं तु प्राणायामत्रयं जपेत्॥ घृतहीनं तु यो भुंक्ते नन्नाद्रुतिपंचकं॥ पश्चाद्घृतेन यो नयो भुंक्ते प्राणायामश
तं जपेत्॥ द्विजः चांद्रायणं चरेत्॥ ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेपि वा॥ गायत्र्याष्टसहस्रेण प्राणायामेन शु
ध्यति॥ पादेन ब्राह्मणं हत्वा प्रायश्चित्तं कथं तदा॥ त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत्॥ अथ निमित्तप्रायश्चित्तं॥
बालाद्दासीकृतायनुग्मैकृच्छ्रं चांडालदस्युभिः॥ अन्यधर्मकारितं येन गवादिप्राणहिंसनं॥ उच्छिष्टमार्जनं चैव तथा तस्यैव
भोजनं॥ खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणं॥ स्त्रीणां च तथा संगं ताभिश्च सहभोजनं॥ मासोषिते द्विजातीनां हि
प्राजापत्यं विशोधनं॥ चांद्रायणं पराकं च चरेत्संवत्सरोषितः॥ ऊर्ध्वं संवत्सरात्कल्पं कालानुसारेण प्रदेशं प्राजाप
४७२ त्यं द्विजोत्तमे॥ प्रथमे मासि प्राजापत्यं॥ संवत्सरे चांद्रायणं पराकं॥ ऊर्ध्वं संवत्सरात्कल्पं कालानुसारेण प्राप्त संवत्सर
मावर्तनीयं॥ सकृत्तके रोतु यत्प्रोक्तं त्रिगुणं तत्त्रिभिर्दिनैः॥ संवत्सरैस्त्रिभिश्चैव तद्भावं सानिगच्छति॥ अथा
गम्यागमनप्रायश्चित्तं॥ रेतः सिक्तः कुमारीषु स्वयोनिषु अंत्यजासु च॥ सपिंडापत्यदारेषु प्राणत्यागो विधीयते॥

स्मृ० कौ० अकामतस्तु चांडालीं पुंश्चलीं म्लेच्छीं स्नुषां च भगिनीं सखीं । मातापित्रोः स्वसारं च निक्षिप्तां शरणागतां । मातुलानीं प्रव्रजितां
सगोत्रामन्यपत्नीं च शिष्यभार्यां गुरोर्भार्यां भ्रातृभार्यां तथैव च । पितृव्यपत्नीं तनयां धात्रीं चैव गतस्य च । असंगत्वा दि
४० जो नेहाप्यत्र कृच्छ्रव्रतमाचरेत् । कामतश्चेत् सकृद्गत्वा द्वादशाब्दं व्रतं चरेत् । द्वितीये द्विगुणं प्रोक्तं तृतीये त्रिगुणं स्मृ
तं । ज्ञात्वा तु कालेः स्वात्मानं इंद्रियं निकृंतयेत् । अभ्यासात्कामतो गत्वा निष्कृतिर्न विधीयते । व्रतस्थां च विधवां
गत्वा चाज्ञात्वा व्रतमाचरेत् । गुरोर्दुहितरं गत्वा तथैव मुनयोऽब्रुवन् । चांडालीं स्वस्त्रियो गत्वा भुक्त्वा च प्रतिगृ
ह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति । कामतः म्लेच्छीं नटीं चर्मकारीं रजकीं बुरुडीं तथा ।
एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रायणद्वयं । रजस्वलां द्विजो गत्वा त्र्यहं कृच्छ्रं समाचरेत् । ब्राह्मणीं ब्राह्म
णो गत्वा त्र्यहं कृच्छ्रेण शुध्यति । पशुवेश्यादिगमने प्राजापत्यं समाचरेत् । शूद्रीं शयनमारोप्य ब्राह्मणो
यात्यधोगतिः । तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते । कामतः शूद्रसंपर्के हंसजे वा तथैव च ।
प्रविशेत् प्रदीप्ते ग्नौ मृत्युना च विशुध्यति । कथंचिद्ब्राह्मणीं क्षत्रियो वैश्य एव च । चतुरब्दं कृच्छ्रं चरेत् प्रा श्रीराम:
यश्चित्तं विशुद्धये । गुह्ये त्वकामतः कुर्याद् द्वितस्य स्वदनं भुवि । सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः स
ह । इत्यगम्यागमनप्रायश्चित्तं । अथ क्रयविक्रयप्रायश्चित्तं । रसलवणमद्यानां लाक्षाक्षीर ४०
स्य विक्रयं । लाक्षायाश्चैव मांसस्य तिलानां घृतस्य च । विक्रेता प्राणिनां चैव कुर्यात्कृच्छ्रं महाव्रतं ।

अथ कन्यादूषणं । हत्वा त्र्यहं उपवासेन शुध्यति राजन्य शूद्र । अभक्ष्य प्राशनेन … प्राणायामेन शुध्यति । अभि ॥

तैलमध्वासीमानां चैव चांद्रायणव्रतं दद्यात् … स्यैव … आदि विक्रये । [redacted]
सर्वेषां स्नेहपक्वानां प्राजापत्यं समाचरेत् । गोविक्रयं द्विजः कुर्यात् प्राजापत्यं समाचरेत् । अपनानां प्रायश्चित्तं । स्त्रियः क्षीरं स
कृत्पीत्वा कथंचिद्यदि मोहितः पुनः संस्कृत्य चात्मानं प्राजापत्यं चरेत्ततः । लशुनं गृंजनं जग्ध्वा पलांडुं च तथा स्तनाः । उष्ट्रमानुष्यके
भाश्वरासभीक्षीरभोजनात् । उपायनं ततः कुर्यात्तप्तकृच्छ्रं चरेन्मुदा । अर्कादिपर्वरात्रौ च चतुर्दश्यष्टमी दिवा । एकादश्यामहो
रात्रं भुक्त्वा चांद्रायणं चरेत् । आत्मनो द्विगुणीकायां यद्वा संतिष्ठते रवौ । असौ नक्तं विजानीयादन्ननक्तं निशि भोजनं । छत्राकं
विड्वराहं च लशुनं ग्रामकुक्कुटं । पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद् द्विजः । अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् । सं
सर्गदुष्टं यच्चान्नं क्रियादुष्टं अकामतः भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत् । शूद्रवेश्मनि येऽभुक्ते पानीयं वापि वे
कांचित् । अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति । अथ प्राणिवधप्रायश्चित्तं । क्षत्रियस्य वधं कृत्वा षडब्दं व्रतमा
चरेत् । त्र्यब्दं वैश्यवधे त्र्यहं वा शूद्रे संचरेत् । अदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत् । हस्तिनं तुरगं गां च महिषं उष्ट्रं कपीं
तथा । मृगं चरो हि पिणं हत्वा चरेच्चांद्रायणद्वयं । अजाविकखरश्वानं शृगालं सूकरं तथा । मार्जारं नकुलं हत्वा प्राजाप
त्येन शुध्यति । सिंहव्याघ्रवृकोदाम्बु दुष्टदैत्याश्च दंष्ट्रिणः सर्पान् सरीसृपादींश्च हत्वा दिनमभोजनं । संबुकं मत्स्यां
श्चैव द्विजो हत्वा मंडूकं कर्कटं तथा नकुलं । उपोष्य निर्यतो भूत्वा पंचगव्येन शुध्यति । काकगृध्रं च श्येनं च युक्तं वधो
विप्रः किंचिद्यद्यपि तिष्ठति । अष्टमुष्टिर्भवेत्किंचिदित्यादि । लघुदोषे घनादिष्टं प्राजापत्यं समाचरेत् । ज्ञात्वा स वधे दोषेषु
कृच्छ्रं चांद्रायणं स्मृतं । वेदाभ्यासरतं क्षांतं महायज्ञक्रियाः परा । नस्यंतीह पापानि महापातकिनां विना । अथ कृच्छ्रचां
द्रायणादिलक्षणं । एकभुक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैकेन पादकृच्छ्रं प्रकीर्तितः । यत्राकथं
चित्त्रिगुणं प्राजापत्यं यदुच्यते । सायं द्वात्रिंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा । अयाचितः षोडशाष्टावन्नात्के चतुर्दाततः

स्मृ॰कौ॰ ४१

ग्रास॰ प्रमाणं॰ कुक्कुटांड प्रमाणं तु मयूरांड प्रमाणकं॰ ग्रासप्रमाणविज्ञेयाययास्ये चाविकारेण सुखं॰ एकैकं वर्ध
येत्कृष्णे शुक्ले कृष्णे च ह्रासयेत्॰ इंदुक्षये न भुंजीत एव चांद्रायणे विधिः॰ अथ सांतापनं॰ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कु
शोदकं॰ प्राश्यापरेद्युरुपवसेत्कृच्छ्रं सांतपनं चरेत्॰ प्राजापत्यत्यशक्तस्य गां दद्यात् शुभलक्षणां॰ तदभावे तु निष्कं स्यात्तदर्धं
पादमेव वा॰ अथ धेनुलक्षणं॰ हिरण्यं धान्यमन्नं च स्नानं समुद्रगास्तु च॰ चतुर्विधानामेतेषां मत्कृसंख्या प्रवक्ष्यते॰
सालंकृतं तु गोदानं तन्मूल्यं निष्क एव हि॰ हेमकृच्छ्रं भवेत् त्रिंशद् द्वस्त्वेक उदाहृतः॰ द्वादशाढक धान्यस्य
स्य कृच्छ्र इत्यभिधीयते॰ त्रिंशत्तत्कृच्छ्र एवास्तु कथितो द्वैधेरपि॰ द्वादशी द्विजभोज्यं च कृच्छ्रस्त्वे
क उदाहृतः॰ त्रिंशद्दिनाहिते कृच्छ्रस्त्वेकाह्नः परिकीर्तितः॰ समुद्रगानदीस्नानं द्वादश॰ कृच्छ्र ए
व हि॰ कृच्छ्रास्ते त्रिंशद्देवाव्दः कथ्यते मुनिभिस्तथा॰ पश्चात्तते॰ पंचगुंजासुवर्णेन कृच्छ्रमीरितं॰ आढक
कस्यामितं धान्यं स्नानं द्वादशसंख्यया॰ द्वादशं विप्रभोज्यं च कृच्छ्रस्त्वेक उदाहृतः॰ आढकलक्षणं॰ श्रीरामः
पलद्वयं तु प्रसृतं द्विगुणं कुडपं मतं॰ चतुर्भिः कुडपैः प्रस्थः प्रस्थाश्चत्वार आढकः॰ आढकस्तैश्चतुर्भिश्च द्रोण ४१
स्तु कथितो बुधैः॰ संग्रहे॰ कायक्लेशो हिरण्यं च धान्यं भूमिस्तथैव च॰ जपहोमं च तीर्थं च सत्सेवा नीहनिष्कृतिः॰

प्रकारः कृच्छ्रे देव्यासुनं चैव प्राणायामशतद्वयं॰ तिलहोमसहस्रं तु सामान्यात्कुर्मनीषिणः॰ सुवर्ण
स्तेयकृद्धि प्रोक्तं ब्रह्महा गुरुतल्पगः॰ सुरापश्च विशुद्ध्यंति लक्षं जाप्येन संशयः॰ उपपातकप्रायश्चि
त्तं॰ प्राणायामशतं कार्यं सर्वपापापनुत्तये॰ उपपातकपापानामनादिष्टस्य चैव हि॰ पंचगव्ये॰
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॰ देवता वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः॰ दधिवा
युसमुद्दिष्टं सोमः क्षीरे घृते रविः॰ प्रणवेन॰ इरावती॰ इदं विष्णुः॰ विश्वेतुकं॰ मानस्तोके॰
व्याहृतयः॰ प्राशनमंत्रः॰ त्वग्मांसास्थिगतं पापं देहे तिष्ठति मामके॰ प्राशनात्पंचगव्यस्य द
हत्वग्निरिवेंधनं॰ अथ सूतकनिर्णयः॰ संक्षेपेणात्र वक्ष्येहमाशौचं स्व
ल्पमेव हि॰ यत्किंचिदन्यदाशौचं जानीयात्स्मृतिनीन्यतः॰ जातकं मृतकं चैव द्विधं सूतकं वि
स्मृतं॰ स्रावः पातः प्रसूतिश्च त्रिविधं जातकस्य तु॰ आचतुर्थ्याद्भवेत्स्रावो पात पंचमषष्ठयोः॰
अतऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत्॰ त्रिदिनं त्रिषु मासेषु चतुर्थे तु चतुर्दिनं॰ स्रावे तु मातु
रेवास्यान्न स्नातिनां न वै पितुः॰ पाते मातुर्यथामासं पित्रादीनां दिनत्रयं॰ नालच्छेदनतः पूर्वं पि
त्रोः प्रेतेतु सूतकं॰ मातुः पूर्णमथान्येषां पितुश्च त्रिदिनं समं॰ मृतस्य प्रसवे चैव नाभिच्छेदनतः

परं॰ मातुः पितुश्च सर्वेषां ज्ञातीनां पूर्णसूतकं॰ मातु पूर्णमथान्येषां पितुश्च त्रिदिनं समं॰ मृतस्य प्रसवे चैव यावन्ना
छिद्यते नालं तावन्नाप्नोति सूतकं॰ छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते॰ आशौचे तु समुत्पन्ने पुत्रजन्म
यदा भवेत्॰ कर्तुस्तात्कालिकी शुद्धिः पूर्वशौचेन शुध्यति॰ दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः शावाशौचं
शा न कर्तव्यं सूत्याशौचं विधीयते॰ देहं द्वादशाहं च पक्षं मासमतिक्रमात्॰ ब्रह्मक्षत्रियविट्शूद्रवर्णानां पूर्णसू
तकं॰ सूतिमध्ये यदा सूतिं पूर्वा न धिक मापयेत्॰ तत्र पूर्वेण शुद्धिः स्यादधिकं तु स्वकालतः॰ तुल्यं तुल्येन
शुद्धिः स्यादल्पं चैवाधिकेन तु॰ शुद्धिरल्पेनाधिकस्य न भवेत्तु कदाचन॰ तथा॰ शावाशौचे समुत्पन्ने सूत
कं तु यदा भवेत्॰ शावेन शुध्यते सूतिर्न सूतिः शावशोधनी॰ जाताशौचस्य मध्ये तु ततो न्यून मृते पतेत्॰
जाताशौचेन शुद्धिः स्यान्मृतके नैव शुध्यति॰ स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि॰ न पूर्वे
नैव शुद्धिः स्यात्स्वकालेनैव शुध्यति॰ स्वभाव बहुसूतिस्तु न्यूनं शावविरोधिनि॰ बहुसंख्यादिनं यत्तु न
स्वभावबहूच्यते॰ दशाहास्तमयाद्वाक् द्वितीयं सूतकं यदि॰ पूर्वाशौचेनैव द्वितीयं तु विशुध्य
ति॰ रात्रौ चेत्प्रथमे यामे द्वितीयं सूतकं भवेत्॰ ऊर्ध्वं दिनद्वयं प्रोक्तं मर्धरात्राद्धोपि च॰ तृतीयप्र
२ हरे वापि यदि स्यात्सूतकं पुनः॰ तदा त्रिरात्रमाशौचं सर्वेषामेव निश्चितं॰ पूर्वाशौचेन या शुद्धिः सूती

श्रीरामः
७२

नां मृतिनां च सा॰ सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि॰ पूर्वेण चापरेणापि पुत्रे शावेन हीनं तु॰
आशौचं शुद्धिमायांति न पित्रोः शावमन्यतः॰ मात्राशौचस्य मध्ये चेत्पिता प्रेतत्वमिच्छति॰ पितुर्मरणमारभ्य पुत्रा
णां दशरात्रकं॰ पित्राशौचस्य मध्ये तु यदि माता प्रमीयते॰ दशाहात्सैत्तकादूर्ध्वं मातृकं पक्षिणीं भवेत्॰ मृ
तपतिमनुव्रज्य पत्नी चेज्ज्वलनं गताः॰ न तत्र पक्षिणीं कुर्यात्सैत्तकादेव शुध्यति॰ दशाहाभ्यंतरे पित्रो
र्मरणं श्रूयते यदि॰ अवशिष्टदिनैः शुद्धा पुत्रैश्चैव वयं गतन्निणः॰ श्रवणादि दशाहांतं बहिःस्थश्च वये
मतं॰ तथा॰ पुत्राणामपि दशाशौचं म्रेताहाद्दशमात्परं॰ अनेकाह्यंतरे पि स्याच्छ्रवणादि दशादि
कं॰ पितृशौचे न मृतौ स्यात्तां दूरस्थो यदि पुत्रकः॰ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकं भवेत्॰ दूरस्थो
निर्धनं पश्चात्तुर्दशाहात्तु श्रूयते बहिः॰ भार्या कुर्याद्दशं पूर्णं भवेद्देवं विनिश्चितं॰ स्मृत्यंतरे॰ दे
शांतरेकृते पुत्रोः पुत्रेण प्रेतकर्मणि॰ एकस्मिन्नेककाले चेन्मरणं श्रूयते तथा॰ दूरस्थोप्याच
रेत्पुत्र आशौचमुभयोः समं॰ विशेषः॰ कुर्यादेकादशाहं तु तयोः श्राद्धं पृथक्पृथक्॰ पितु
र्दशाहमध्ये चेन्मरणं श्रूयते यदि॰ कालक्रियायां मातुश्च पित्राशौचेन शुध्यति॰ असंस्कृ
ताया मातुश्चेन्मरणं श्रूयते यदि॰ पितुर्दशादिनादूर्ध्वं मातृकं पक्षिणीं भवेत्॰ आदौ

स्मृ० रत्ना० कृत्वाप्रेतकर्ममातुरेवाथवैपितुः कृतक्रियायां पुत्रश्राद्धं स्यात्पितृपूर्वकं मातुर्दशाहमध्ये तु पितुश्चेत्कृतकर्मणः मरणं
४३ श्रूयते तत्र मातुः कर्मकथं भवेत् आशौचानंतरं कुर्यान्मातृकं सकलं सुतः अवशिष्टं च यत्किंचित्प्रेतकर्माथ
वैपितुः कुर्यादाब्दिकवत्श्राद्धमन्यथाकृतकर्मणः पैतृकं सकलं प्रेतकर्मकृत्वाथमातृकं आशौचं पक्षिणीमातुः
कुर्यात्पितृक्रियादिकं पित्रोर्विषयएवैवमन्यथाविषये तथा मासत्रये त्रिरात्रं स्यात्षण्मासात्पक्षिणीभवेत् अहस्तु नवमात्
वांगूर्ध्वं स्नानेनशुध्यति हानिमृतयोस्तथाशौचं दशाहान्तु बहिः श्रुतेः एकदेशाइदं प्रोक्तं स्नानाद्देशांतरे शुचिः देशकाला
दिभेदेपि मातापित्रोर्मृतिश्रुतौ श्रवणादित आहस्यान्निर्देशात्इतिस्थितिः भाषाभेदो महानद्यास्यव धानं सुनादृणां
त्रिंशद्योजनदूरं वा पृथुसेन इत्सासेदकं मातुः सपत्न्यांमृतायां यावत्संवत्सरं त्र्यहं एवमौरसपुत्रस्यापुत्रस्य चैतत्सा
दत्तकस्य विशेषवचनः पितृपत्न्यामपेतायांमातृवर्जं द्विजोत्तमः संवत्सरे अतीतेपि त्रिरात्रमशुचिर्भवेत् अतीतेपि
पित्रिरात्रमुक्तं तदपिएवच अथत्वनुपनीतस्य अन्निर्देशोरूनानतः शुचिः संदेशेशयतः शुचिः संदेशात्तथ कथ्यते यत्रोप
नयनात्पूर्वं पुत्रः प्रेतत्वमिच्छति आशौचं त्रिदिनं तस्य मातापित्रोः समं तदा अनंतजन्मनः सद्य आचूडान्नैकिर्षीस्मृताः
ति त्रिरात्रमुपनीतेप्राग्भिदस्तुगोत्रिणां चौलेन्नक्रियतेयस्यस्वकालेतन्मनाअपि चतुर्थवर्षमारभ्यत्रिदिनंगो
त्रिणांसमं तृतीयमब्देवाचौलंयदिचेदकृतंभवेत् चौलप्रभृतिसर्वेषांगोत्रिणांत्रिदिनंसमं अथ श्रीरामः
पुत्रीमृतंचैवमातापित्रोस्त्र्यहंसमं अवस्थाभेदमाश्रित्यगोत्रिणांत्वन्यथास्मृतं आशौचंकरणात्स ४३
घस्तदूर्ध्वमहरेवतु चतुर्थवर्षमारभ्यचौलाभावेप्यहस्मृतं तथा मरणंकन्यकायांस्त्रिघावद्वर्षत्रयंभवेत् सद्यःशुचिः

सपिंडानांतदूर्ध्वमहरेवतु कन्याशौचंविवाहोर्ध्वंपितृगेहेनविद्यते विवाहात्प्रागपिंडत्वत्रिपुरुषमितिस्थितिः ऊनद्विवर्षे
स्वनन्नंतदूर्ध्वंदहनक्रियाः द्विजातीनामहं धर्माविपरीतोह्यधोगतिः इतिसगोत्रशौचं दत्तानामपि पितुर्गेहेस्तु
येनाथमृतेथवा सवंधवर्गस्तेनाथैस्तु चिस्तज्ज्ञनकस्त्रिभिः यत्रचोढाहिताकन्यापितृगेहेप्रमीयते पित्रो
स्त्रिदिनमन्येषामहनित्यंकउच्यते पितृगेहेदहनतोयादिकन्याप्रमीयते पित्रोस्त्रिदिनमन्येषामहनि
त्यकउच्यते पितृगेहेदहनतोयादिकन्याप्रमीयते पक्षिणीतत्रपित्रोस्त्वन्येषामितिनिश्चयः पुत्री
गेहेथवान्यत्रपितरौप्रमृतौयदि पुत्रीयास्त्रिदिनाशौचंदशाहाभ्यंतरेभवेत् भगिनीयुक्तयोर्मातागश्चेन्मृ त
तकंतथा भगिन्यास्त्रिदिनंप्रोक्तंनतुस्याद्भगिनीपतेः एवंभ्रातृगृहेयस्यभगिनीवाविपद्यते भ्रातुस्त्रिदिन
माशौचंभ्रातृपत्न्यास्तुनैवहि अथान्यत्रमृतोभ्राताभगिनीवाविपद्यते भगिन्याःपक्षिणीतत्रभ्रातुःश्रा
शौचमिष्यते एवंपित्रोर्भगिन्योर्यैपितामहयोस्तथा येमातामहयोश्चैवभगिन्योस्तत्प्रजास्त्वयः मातुलस्य
स्यपित्रोश्चपत्न्याश्चैषांप्रजांस्तथा मातस्वेतिसर्वेषांपक्षिणीस्वगृहेत्र्यहं स्वसृस्वश्रुरजामातृ र
११ दौहित्रविपदिस्तुतौ स्वगृहेत्रिदिनाशौचंपक्षिण्येवपरत्रतु मातामहेचतत्पत्न्यामाचार्येचाश्रिवा
स्मृ० र० सुरः ऋत्विजश्च समीपस्थाएकाहंसंनिधौत्र्यहं एकशिष्यसहाध्यायीमित्रश्रोत्रियनिगि

स्मृ॰ कौ॰ ४४ मे· दूरेहपक्षिणीकार्या समीपेश्रोत्रियेत्र्यहं· एकदेशंतुवेदस्यवेदांगान्यथवापुनः· योऽध्या
पयितस्यार्थंसउपाध्यायउच्यते· उक्तलक्षणशिष्योपितस्यैवेतिविवक्षितः· अंगिराः· गृहेयस्यमृतःकश्चिद्
सपिंडःकथंचन· तस्याशौचंतुविज्ञेयंत्रिरात्रंनात्रसंशयः· उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः· सांकल्पंस
रहस्यंचतमाचार्यंप्रचक्षते· निषेकादीनिकर्माणियःकरोतियथाविधि· संभावयतिचान्नेनसविप्रोगु
रुरुच्यते· अग्न्याधेयंपाकयज्ञमग्निष्टोमादिकान्मखान्· यःकरोतिवृतोयस्यसतस्यर्त्विगिहोच्यते·
बृहस्पतिः· दशाहेनसपिंडास्तुशुध्यंतिप्रेतसूतके· त्रिरात्रेणसकुल्यास्तुस्नात्वाशुध्यंतिगोत्रजाः· मनुः· लेप
भागाश्चतुर्थाद्याःपित्राद्याःपिंडभागिनः· पिंडदःसप्तमस्तेषांसापिंड्यंसाप्तपौरुषं· सपिंडतातुपुरुषेसप्तमेविनि
वर्तते· समानोदकभावस्तुनिवर्तेतचतुर्दशात्· मनुः· दशाहंशावमाशौचंसपिंडेषुविधीयते· ज
ननेप्येवमेवस्यान्निपुणंशुद्धिमिच्छतां· स्मृतिः· आशौचांतःकीकसाहिप्रदाहेशुद्धिःशेषात्तद्
हिश्चेत्त्रिरात्रात्· पुत्रश्चापिप्रागशौचग्रहश्चेन्नैवितुचस्याद्यसंपूर्णमाद्यं· तथाह· अंतर्दशाहदाहेतुशेषतःशु राम ४४
ध्येयुरितिकाः· बहिर्दशाहदाहेतुदाहादित्रिदिनंभवेत्· प्रागाशौचग्रहाभावेतानीनांत्रिदिनंभवेत्· प्रागग्रहेत्रिदि

नंकर्तुरन्येषांतुनविद्यते· आशौचंयस्यगृहेयेषांपूर्वंनाभूतगोत्रिणां· अनेकाब्दांतरायेपिदाहादित्रिदिनंविदुः· प्राग्गृही
तंतुनैवास्याःकर्तुस्त्वस्तितथापिच· कर्ताचतनयःपूर्वांगेहेपूर्णंतथोदितं· स्मृतिः· आशौचस्यसपिंडानामुक्तकाले
व्यतिक्रमे· अंतर्दशाहमध्येस्यादूर्ध्वंस्नानेनशुध्यति· मस्तुसंस्कारिणामेवदशाहाद्यूर्ध्वतेबहिः· शुद्धिःसद्यःसपिंडानांस्ना
नेनैवभवेत्तदा· असंस्कृतासपिंडानांस्नानेनैवभवेत्तदा· असंस्कृतासपिंडानांमरणंश्रूयतेयदि· नकुर्यात्स्नानमाशौ
चंव्यतिक्रांतेतुसूतकं· पंचत्वंयदिचेद्गच्छेदपिंडोहिसंस्कृतः· तत्रस्नानेनशुद्धिःस्यात्सकलाभ्यंतरेयदि· पुत्रै
स्वधर्मकार्येशुचिर्विज्ञानिराजतः· स्त्रीप्रसूतान्तरश्चेतिशुद्धाभवतिनान्यथा· इतिनिबंधद्वीदर्पस्मृतिरत्नाकरे
मृतकनिर्णयःसमाप्तः· अथदुर्मरणविषये· स्मृत्यंतरेप्याशौचनिषेधः· अंगिराः· चांडालादुदकात्स
र्पाद्विद्युतोब्राह्मणादपि· दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां· उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते· नोपति
ष्ठतितत्सर्वमंतरिक्षेविनश्यति· इत्यनेनापीठापूर्वकमात्महननविषयं· तदुक्तंब्रह्मपुराणे· पाषाणपतितानां
चचांडालाद्यैर्हतस्यच· शृंगिदंष्ट्र्यग्निसर्पाद्यैर्मृतानांबुद्धिपूर्वकान्· नकुर्याद्दाहनाशौचंकृतंचैनोपतिष्ठति· इच्छा
पूर्वकमृतानांसपिंडानामाशौचादिकंनकार्यमित्यर्थः· तदुक्तं· कामतोदुर्मृतिःकश्चित्स्यात्तिलोक्लीबएववा·

स्मृ० कौ० ७५ तन्मृतात्तस्य गोत्राणामाशौचं न च सूतकं · सर्वएवात्मनं गोपयेदिति विधित्रस्तु निमित्त पिंडदानादि निषेधः · स्मृत्यंतरे · वा
ल्यादिनाहते सप्तदिने सर्पमृते यदि · तच्चैवं दुर्मरणमित्येवं पूर्वसूरयः · मताह्न्यादिनाहूर्ध्वं वह्निरास्त्रविषादिभिः · तद्
र्नित्यमृतिं कुर्यान्निमित्तस्यैव निष्कृतिः · और्ध्वदेहिकनिषेधेषु किं पुनस्तेषां कार्यमित्यपेक्षायां तत्र छागलेयामुक्तं ·
चांडालादिहतानां च संवत्सरादूर्ध्वमौर्ध्वदेहिकं कार्यं · तथा च षट्त्रिंशन्मते · गोब्राह्मणहतानां च पतितानां तथैव च ·
ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकं · वर्षादूर्ध्वं भवेत्तस्य प्रायश्चित्तं विधानतः · नारायणबलिं कृत्वा पालाशविधिना
चरेत् · प्रेतकर्म ततः कुर्यादाद्वादिसकलं हि यत् · षोडशादि सपिंडं च तदोत्तरस्यापतिष्ठतीति · संवत्सरादर्वागपि आयुष्य
अनित्यत्वेन देशकालभयाद्यापि तत्तत्रायानुसारेण द्विगुणादिकं प्रायश्चित्तं विधाय · नारायणबलिं कृत्वा ·
और्ध्वदेहिकं कार्यं · उक्तं च · देशकालभयाद्यापि सद्यः कर्तुमुपक्रमेत् · प्रायश्चित्तं द्विद्विगुणं विधायादौर्ध्व
देहिकमिति · बुद्धिपूर्वकमिति विशेषोपादानात् · प्रमादादकृते दोषो नास्तीत्येवं गंतव्यं · अथ कश्चित्प्रमादेनाग्नि
पतायुदकादिभिः · तस्याशौचं विधातव्यं कर्तव्याश्चोदकक्रियेत्युपनिरस्मरणात् · एतदबुद्धिपूर्वकविषयं · श्रीरामः
तथा ब्रह्मपुराणे · प्रमादादपि निःशंकानकस्माद्विधिचोदितं · शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः ७५
चांडालैरपि वा चौरैर्निहतो यत्र कुत्रचित् · तस्य दाहादिकं कार्यं तस्मान्नपि तितस्तु सदैति · धर्मप्रवृत्तेपि · मृत

स्यानिकयासद्यः कर्तव्याः प्रेतसत्क्रियाः · प्रायश्चित्तं विधिं कृत्वा नैवेच्छया मृतस्येति · प्रमादादिकयाद्यापि विषधेत
विषादिभिः · नारायणबलिं कृत्वा लोके गर्हाभयात्कराः · तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः · नारायणबलिं उत्त
रायणे शुक्लकृष्णैकादश्यां पुण्याहवाचनं · संकल्प्य · यजमानस्य पितुः शर्मणो गोत्रस्य वास्त्रादिमरणस्य अपम
त्युर्जनितदोषपरिहारार्थं नारायणबलिं करिष्ये · पंचकलशोपरि पंच प्रतिमा पूजयेत् · तन्मध्ये हिरण्मयेन विष्णुं १
दक्षिणाते ब्रह्मा · २ कद्रुद्रायेति रुद्रं ३ इंद्रश्रेष्ठानि इंद्रं ४ परेयिवांसमिति यमं · ५ इत्यादि
सूक्तानि जपित्वा जागरणं कुर्यात् · परेद्युः पुनः पूजां कृत्वा · ततः होमं संकल्प्य · स्थंडिलादि वेदिकं कृत्वा
त्वा · समित्तिलव्रीहिचरुमध्वाज्यलाजाद्रव्येण पुरुषसूक्तेन षोडशार्चेन हुत्वा · श्रीमहापुरुषाय इदं न मम ·
केशवादि द्वादशनाम्ना हुतीर्हुत्वा · पितृदेवतायस्वाहा · पितामहायदेवतायस्वाहा · सर्वायदेवताय
रामायस्वा · स्वाहा · ताओ होमं · अनंतायस्वा · कालात्मने · अपमृत्यवेस्वा · दुरिष्टाय · निर्ऋताय · विश्व
रूपायस्वा · पुरुषोत्तमाय · सर्वरूपाय · प्रत्येकं शताहुतिं हुत्वा · महाव्याहृतिभिः स्विष्टकृतादि
होमशेषं समाप्य · केशवादि द्वादशब्राह्मणान्भोजयित्वा · संकल्प्य · नारायणबलितदंगपिंडप्र
दानं करिष्ये · तत्तन्मंत्रेण · विष्णवे पिंडं ददामि · ब्रह्मणे पिंडं · रुद्राय पिंडं · इंद्राय · यमाय पिंडं ·

स्र० रत्ना० कार्य ४६

पित्रे नामिणे गोत्राय पिंडं॰ ततः संकल्पः॰ केशवादिद्वादशनामतर्पणं॰ महाविष्णुं तर्पयामि॰ ब्राह्मणं रुदंत॰ इदं॰ यमं
तर्प आशीर्वादं लभे॰ ततो दहनमिसाह॰ भगवान्बोधायनः॰ अथ पालाशविधिः॰ शिरसि ४० ग्रीवायां १० बाह्वोः प्रत्येकं पंचा
शत॰ १०० करांगुलीषु सर्वासु दश १० उरसि विंशतिः २० शिश्ने चत्वारि ४ अंडयोस्त्रयं त्रयं ६ ऊर्वोः प्रत्येकं पंचाशत॰ १०० अंडकोशिषु ३०
जंघोतः पादतलयोः पादयोः प्रत्येकं पंचदश ३० सर्वासु पादांगुलीषु दश १० एवं षष्ट्यधिकशतत्रयमिते नैः शरीरं निर्मा
यऊर्णासूत्रेण शरीरे सह बध्वा जलालोडितयवपिष्टेनानुलिंपेत॰ ततः शक्तौ सत्यां वक्ष्यमाणान्यपि कार्याणि॰

मूर्धस्थाने कदलीफलं॰ शिरसि नारिकेलं॰ वर्तुलं तुंबं वा॰ ललाटे कदलीपत्रं॰ दंतेषु दाडिंबीबीजानि॰ क
र्णे कंकणं॰ नेत्रयोः कपर्दकौ॰ नासिकायां तिलपुष्पं॰ नाभौ वश्रं॰ स्तनयोर्जंबीर॰ रफ हृदयं॰ दांते मनः
शिलां॰ पित्ते हरितालं॰ कफे समुद्रफेनं॰ रुधिरे मधु॰ पुरीषे गोमयं॰ मूत्रे गोमूत्रं॰ रेतसि पारदं॰ वृषण
योर्वृंताकद्वयं॰ शिश्ने गृंजरं॰ केशेषु वनसूकरकेशाः॰ लोम सूर्णा॰ मांसस्थाने माषपिष्टेन यवपिष्टे
नवालिंपेत॰ ततः पंचगव्यमंत्रैः पंचगव्येन प्रोक्षयेत॰ पुन[illegible]र्नीअसुमितिऋह वधः प्राणः स्थिरप्पू
पुनर्नो अस्तु निति आवामवेत्राभावयेत॰ यद्वा॰ यत्तेयमं वैवस्वतमितिसूक्तेन प्राणानानीय॰ शुक्रमसि ज्योतिरसीति श्रीरामः
मंत्रेण पारदं क्षिप्त्वा॰ अक्षीभ्यामिति षड्‌चेन शरीरं स्पृशेत॰ एवं नरं पालाशपर्णमयं निर्माय दग्धाः॰ त्रिरात्रमशुचि ४६
र्भवेत॰ मातापित्रोर्दशाहे स्यान्नोस्थिसंचयनं ततः॰ पालाशेष्वस्थि दाहे च सद्यः संचयनं भवेत॰ पालाशे मंत्रजापं स्याद

स्थि दाहे च संचयं॰ पुनः संस्कारकालः॰ दशाहमध्ये यस्यास्थि पुनर्दहनकर्मणि॰ तिथिवारदिनक्षत्रे दोषस्तत्र न विद्यते॥ प्रे
तस्य वत्सरादर्वाक् पुनर्दहनकर्मणि॰ न तु कालपरीक्षेत नमौढ्यं गुरुशुक्रयोः॰ ऋतुभार्गवयोर्मौढ्ये पुष्ये च वनमलिम्लुचे॰ नातीत
पितृमेधः स्याद् यागोदावरीं विना॰ देशांतरगते विप्रः प्रवासात्कालपर्ययः॰ देहनाशमनुप्राप्ते तिथिर्न ज्ञायते यदि॰ कृष्णाष्ट
मी वा मावास्या कृष्णा चैकादशी तथा॰ उदकं पिंडदानं च तत्र श्राद्धं च कारयेत॰ शोधनीयं दिनं चात्र यथासंभवमादरात॰ आशौच
स्यानिवृत्तौ चेद्यदा संस्क्रियते नरः॰ संशोध्यैव दिनं ग्राह्यमूर्ध्वं संवत्सरादपि॰ प्रेतकृत्यं व्यतीपाते वैधृतौ त्रिपदर्क्षका नः॰ धनिष्ठा
पंचके कुर्याद्दोषभाक् दहने पुनः॰ युग्मम न्वादिसंक्रांतौ दर्शे प्रेतक्रिया यदि॰ न तिथ्यर्क्षादिदोषोस्ति पुण्यतीर्थेषु सर्वदा॰ पितृमे
धाधिकारिणः॰ शंखः॰ पितुः पुत्रेण कर्तव्यं पिंडदानोदकक्रियाः पुत्राभावे तु पत्नी स्यात्पत्न्याभावे तु सोदरः॰ असंस्कृ
तेन पत्न्या चाद्यं पिंडदानं समंत्रकं॰ कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि॰ विष्णुपुराणे॰ पुत्रः पौत्रः प्रपौत्रश्च तद्वद्भ्रातृसंततिः॰
पिंडदः सोदको वापि क्रियार्हा नृप जायते॰ तेषामभावे सर्वेषां स्त्रीभिः कार्याः क्रिया नृप॰ मरणविधिः॰ म्रियमाणं नरं दृष्ट्वा श
लभूम्यां शुचिस्थले॰ उत्तानं दक्षिणग्रीवां तमुद्दिश्य गवोत्सृजेत॰ उत्क्रांतिगोदानं॰ पितुः समस्तपापक्षयार्थं सुखेन प्रा
णोत्क्रमणार्थं उत्क्रांतमहागोदानं करिष्ये॰ गवामंगेषु तिष्ठंति मंत्रं॰ यमाय धर्मराजाय पापाधिपतये विभो॰ अतुत्क्रांतो प्रवृत्तस्य सु प्रेता
खोत्क्रांतौ प्रवृत्तये॰ तुभ्यं संप्रददे नाम्नी गामुत्क्रांतं च संज्ञकां॰ अस्मै ब्राह्मणाय इमां गां विष्णुप्रीत्यर्थं तुभ्यमहं संप्रददे॰ क॰
तत आकर्ण्य मंत्रः॰ श्रीविष्णो कृपाश्च स्वर्गं नारायणसंज्ञाप्यं॰ सम्प्रति श्वेतं॰ वनाधिकारणः॰ गंगायां भास्क
रक्षेत्रे मातापित्रोर्मृते तहनि॰ आधाने यज्ञकाले च वपनं षट्सु संस्मृतं॰ प्राग्दाहाद्वपनं कृत्वा सर्वांगस्य पिवानितिः॰ स्नात्वा

स्मृ०र०का० ८७ इव स्तोमनिमान्यवित्रीमंत्रवद्दहेत्. चांडालेनापिवाग्निभ्यां गोभिर्विप्रैश्चयोहतः. नतस्यमंत्रवद्दाहं पुत्राः कुर्याच्चवापनं. केशादि
वपनं कार्यमंतर्दत्यामृतेरवौ. नकुर्याच्चेदकृत्यासर्वेस्वयं चनरकंव्रजेत्. बहुपत्नीपुत्रविषये. एकभर्तृकपत्नीनां सर्वासां
संतिवेस्सुताः. पितुर्मरणकालेतुज्येष्ठपत्नीसुतोग्रजः. सापत्नमातृविषये. एकभर्तृकपत्नीनामपुत्रानिधनंगताः. अन्य
स्याःपुत्रवत्वेतु कर्तभिर्नैकवत्रतत्. केचिद्विशेषः. सापत्नीजनीयस्यपित्रोश्चजीवितोमृताः. अपुत्राथोपदिष्टापितस्याः का
र्यौकर्थंक्रियाः. मनुः. पिताजीवतिचेद्यस्यस्वस्यमाताभृतंयदि. वपनंतेनकर्तव्यंपितृपत्नीष्वतत्समातृ. पित्रोश्चजीवि
तोर्यस्यअन्यमाताप्रमीयते. वपनंचसुतैः कार्यपैतृमेधादिकर्मच. मनुः सर्वासामेकपत्नीनामेकाचेत्पुत्रिणीभवेत्.
एकेनैवतुकर्तव्यं ज्येष्ठपत्नीसुतेनच. सापत्नीमातुःकुर्वीत पैतृमेधादिकर्मच. चकारयचतन्मासात्त्रातिसांवत्स
राद्दिकं. मृतामातरिजीवत्यांसापत्नजननीयदि. पितामह्यादिभिः कुर्यात्स्वंदंतेसपार्वणं. अथप्रयोगः. समस्त ल
संपत्. गोत्रस्यशर्मणः. और्ध्वदेहिकेनवपनाधिकारकर्तुसंकल्पः. गोत्रस्यशर्मणः समस्तपापक्षयार्थंआ
त्मशुध्यर्थंपितृदोषपरिहारार्थंसर्वप्रायश्चित्तार्थंकेशान्श्मश्रूरोमनखाभिसंहरणंकरिष्ये. आत्मनःशुद्धिकामोवापि
तॄणांमुक्तिहेतवे. वपनंकारयिष्यामिपितृतीर्थेस्मितेहनि. यानिकानिच. वपनंप्रायश्चित्तं. समस्तसं
पत्. गोत्रस्यशर्मणः जन्मप्रभृतेतत्क्षणपर्यंतंप्रमादकृतानांप्रमादारभ्यस्तानांअज्ञानतःसंस्कृतानां श्रीरामः ८७
मज्ञानतोमज्ञानतोभ्यस्तानांअत्यंताभ्यस्तानांज्ञानतःसकृतंकृतानां ज्ञानाभ्यस्तानांवलात्कलौमापदिकृतान
नौ

पतिनीकरण

महापातकव्यतिरिक्तोपपातकानां संकलीकरणंअपात्रीकरणजातिभ्रंशकरप्रकीर्णकानांऊर्ध्वोच्छिष्टउभयोच्छिष्ट
नांअस्नानमरणादीनां पापानां ममपनोदायऔर्ध्वदेहिकेक्रियाधिकारप्राप्त्यर्थं प्रायश्चित्तंउक्तप्रसीदंतुभवंतः. पु
नःसंकल्पः. पूर्वकपूर्वदुच्चार्यसर्वप्रायश्चित्तंतदुक्तंएवंकृच्छ्रयथासंभवंचतुर्विधस्कवर्णधान्यअन्नतीर्थकृच्छ्ररूप
णषडब्दकृच्छ्रंआचरिष्ये. षडब्दकृच्छ्रमध्येषडुक्तप्राजापत्यप्रत्याम्नायत्वेनएकैकस्यप्राजापत्यकृच्छ्रस्यव्यवहारिक
निष्कपादात्मस्यस्कवर्णप्रतिपाद्ययथाशक्तिसुवर्णकृच्छ्राणिपापानिवृत्तिकामःश्रीविष्णुप्रीत्यर्थंअस्येपरिदेनमः. पूर्व प
वदुच्चार्यप्राजापत्यकृच्छ्रस्यआढकद्वादशपरिमितधान्यंद्वादशब्राह्मणभोजनंपरि. अन्नकृच्छ्राण्याच
रिष्ये. अवशिष्टानितीर्थकृच्छ्राणिद्वादशस्नानरूपेणाचरिष्ये. भद्रेचभूमिदानंस्यात्रिपाद्दर्शेहिरण्यदः. वा
रोवासाधिदेवत्यावासदानंविधीयते. पंचकेमृतकेचैवदहेत्पुत्तलिकेसह. तद्दोषपरिहारार्थंस्वर्णदानंसमाच
रेत्. खननेप्येवमेवास्यातद्दोषस्यप्रशांतये. संकल्पः. त्रिपाद्दोषनक्षत्रपरिहारार्थंसर्वेषांज्ञातीनांअप नक्षत्र
मृत्युपरिहारार्थंस्वर्णदानंकरिष्ये. स्वर्णंपवित्रमतुलंस्वर्णंपापविनाशनं. स्वर्णंहिप्रीकरोयस्मादतःशांति
प्रयच्छमे. पंचकेकांस्यं. कांस्यंब्रह्म. वारदोषवासः भद्रातिथिर्भूमिः. सर्वसस्याश्रया० तिलपा सीतवासः
त्रं. तिलाःकांचनसंभूतातिलाःपर्वतमेवच. तिलाःकांचनदानेनसमेविष्णुःप्रसीदतु. अथाग्निनिर्ण
यः. याज्ञवल्क्यः. अनग्निकोब्रह्मचारिविधवायाःकपालजाः. गृह्याग्निनागृहस्थस्यइतिरेलौकिकाग्नयः

स्मृ०रत्ना० ४८

तथा· दहनं ब्रह्मचारिणां मृतानां त्यक्तवह्निनां· विधुराणां यतीनां च विधवायां च योषितां· कपालवह्निना दाह
स्वशाखोक्तविधानतः· अथाग्निविभागः· भार्ययोरग्निसंयोगे जाते ज्येष्ठकनिष्ठयोः· यदि काचिन्मृता भार्या दाहस्त
स्याः कथं भवेत्· संसृष्टाग्निं विभज्याथ दक्षिणोत्तरयोरपि· ज्येष्ठाया दक्षिणो भागः कनिष्ठायास्तथोत्तरे· बह्व
यदि भार्याश्चेद्भागस्तु स्ता ह्रस्वा अपि· यस्या एव यथाभागस्तत्र द्वौ गानि योजयेत्· दाहादि कर्म कुर्वीत मन्त्रं स
र्वेत्र मेधिकं· कारिकायां· यस्मिन्देशे स्थितो वह्निस्ततोन्यत्र मृतो यदि· चतुःपथि कृतः कार्यं पूर्णाहु
तिरथापि वा· पूर्णाहुतिलक्षणमाह· आज्यं द्वादशाकृत्वा तु गृहीत्वा स्रुचि येत्तु वं· ततश्चाज्याहुतिर्हु
संपूर्णाहुतिरिष्यते· दूरे भर्तरि तीवह्निः पत्नी यदि मृता भवेत्· सद्य एवाग्निदहेद्देहात्तु ते वा यदि वोत्तरा· अनुपनीतविषये·
ऊनद्विवार्षिकं प्रेतं न दहेदग्निं खनेद्भुवि· पूर्णे द्विवर्षिकं प्रेतं दहेदित्याह कश्यपः· एकाहमपि न्यूनं स्याद्द्विवर्षस्यतु वैय
दि· निक्षेपे द्भुवि तं प्रेतं न दाहो नोदकक्रिया· मृतश्चानुपनीतश्चेत्त्रिरात्रानन्तरं यदि· ब्राह्मणं विद्धमुद्दिश्य पच
तुर्थेहनि भोजयेत्· अथ प्रयोगः· औपासनान्तरितदोषप्रायश्चित्तार्थं कृच्छ्रदानं स्रुवेणाभिघार्य प्रजा
पतये स्वाहेति हुत्वा· औपासनपक्षान्तं शावं दाज्येन स्नापयित्वा· अथाग्निनाशे· ग्रामान्तरगतानयो
ध्ये विगते सूतकाग्निं केचन· पुनरग्निं प्रतिष्ठाप्य प्रेताहुतिपुरःसरं· अथाग्निदानाधिकारः· मात्स्ये· श्रीरामः ४८
प्रेतस्य पुत्रो दाहादि दद्याद्दौरसःसुतः· बहुत्वे च गुणी दद्यात्समे तु ज्येष्ठ एव च· मरीचिः· अविभक्तभ्रा

तृमध्ये ज्येष्ठो यदि विपद्यते· विद्यमानेपि तस्मिंश्चेत्संकुर्यादनुजोग्रजः· दंपत्योर्मिथो पासे दग्नाह्यभ्यंतरे यदि· ज्येष्ठेन
वनु कर्तव्या माता पित्रोस्तु सा क्रिया· अन्यकोशोप्यग्निदः पुत्रः शेषमन्येन कारयेत्· वसिष्ठोपि· ज्येष्ठे संनिहि
ते चार्तेवर्तमाने क्रियान्तरे· पित्रोः पुत्रेण कर्तव्यं द्वितीयेनानुजेन वा· व्यासः· अग्निकारेषु पुत्रेण भवे
देकस्य कर्मणः· विपत्तादनुजः कुर्यात्तेषां ज्येष्ठक्रमेण तु· अथ प्रयोगः· कर्ता प्राणानायम्य मन्त्रकं संकल्पः·
गोत्रस्य संज्ञकप्रेतस्य पैतृमेधकर्मणा संस्करिष्ये· ज्ञातस्यैचानो नोजानु मात्रमन्यं कर्ता कर्तव्यं ज्ञात्वा तत्र दौवा
लोदकं अप आसिच्य· उपसर्पेति संकुशिकाः पितृमेधर्दीक्ष· भूमिप्रार्थने· एतोन्विन्द्रं· शुचीवो हव्या
इत्येतैर्मन्त्रैः शमीशाखयोदकेन भूमिं प्रोक्ष्य· अपेतवीतेति येनः पितरस्मि छंदः· भूमिप्रोक्षणे वि० अनेन ग
र्तांत्रिः प्रोक्ष्य त्रिः प्रदक्षिणीकृत्य तन्मध्ये दक्षिणापवर्गं यतीत्रयं खात्वा· तेषु गर्तेषु प्रत्येकं स्त्रीं स्ति लांजलि
दक्षिणापवर्गं नासिंचति· यमाय दहनपतये चोल्लिखामीति मध्ये· कालाय दहनपतये चोल्लिकौ खामीत्युत्तरः
मृत्यवे दहनपतये चोल्लिखामीति दक्षिणतः· इति मंत्रत्रयेण लेखात्रयमायसेनोल्लिखेत्· यमाय दहनपत
ये पितृभ्यः स्वधा नमः· इति मध्ये· कालाय दहनपतये पितृभ्यः स्वधा नमः इत्युत्तरः· मृत्यवे दहनपतये
पितृभ्यः स्वधा नमः इति दक्षिणतः· ततः खातेन तीत्रये हिरण्यशकलानि तिलांश्च प्रक्षिप्य तिलोदकं क्षि
पेत्· समस्तसंपत्· गोत्रस्य प्रेतस्य सर्वेषां महाजनानां चितिमासाद्य· पुनःसंकल्प्य· गोत्रस्य· क्रव्याद

स्म०र०कर० मग्निं प्रतिष्ठापनं करिष्ये· क्रव्यादमिति यमोग्निस्त्रिष्टुप्· क्रव्यादमग्निं प्रतिष्ठा० प्रेतस्य वायव्ये क्रव्यादम
४९ मग्निं प्रतिष्ठाप्य· तत्रान्वाधानं· अग्निं· कामं· लोकं· अनुमतिं· एताः प्रधानदेवताः पृषदाज्यद्रव्येण चितिनि
धानं शावो देहहविः सद्यो यक्ष्ये· परिसमूहनपरिस्तरणं चितिं शवसहितं अप्रदक्षिणा कार्यं पात्रासादनं अग्नेरु
त्तरतः चमसपात्रं कुशाच्छेदनं आज्यं निधाय· शवदोरच्छेदनं· धनुर्हस्तादित्यस्य संकुशिकः पितृमेध
वी त्रिष्टुप्· दोरच्छेदने वि० अग्नेर्वर्मेत्यस्य दमनोग्निस्त्रिष्टुप्· अनेन चितौ शवं निधाय· प्रेतस्योत्तरतः पत्नीं
चितिमारोहयेत्· उदीर्ष्व नारीत्यस्य संकुशिकः पितृमेधावौ त्रिष्टुप्· चित्यारोहणे वि० तिलान्घृताभ्यक्तं प्रेत
स्य नवद्वारे· चक्षुःश्रोत्रं चेति मंत्रेण क्षिपेत्· इममग्ने चमसमिति दमनोग्निस्त्रिष्टुप्· चमसपात्रं गोत्राय प्रेता
य इदं चमसपात्रमुपतिष्ठतामिति दद्यात्· होमकाले तूष्णीमाज्यमुत्पूय स्रुवसंमार्जनं स्रुवेणाज्यमादाय· ॐ
अग्नये स्वाहा· अग्नय० कामाय स्वा० कामायेदं० लोकाय स्वा० लोकायेदं० अनुमतये स्वा· अनुमतय इदं०
प्रेतत्व इदं० अस्माद्वै त्वमजायथा अयं त्वमधिजायतां· असौ स्वर्गाय लोकाय स्वाहा· प्रचेताः· स्नानं प्रेतस्य
पुत्राद्यैर्बान्धवैः पूजनं तथा· नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजेत्· क्रव्यादमिति मंत्रेणाग्निं गृहीत्वा· श्रीरामः
योऽअग्निरित्यस्य यमोग्निस्त्रिष्टुप्· अग्निप्रदाने विनियो० गोत्राय प्रेताय अयं क्रव्यादमग्निमुपतिष्ठत्विति दद्या ४९
त्· अथाग्निं प्रज्वाल्य· अनुमंत्रणं· कृतीसंकल्प· गोत्रस्य प्रेताय प्रेतसंस्कारार्थं प्रेतानुमंत्रणं करिष्ये· प्रे

हि चेहि दद्योर्यमः पितरस्त्रिष्टुप्· दह्यमानप्रेतानुमंत्रणे विनियोगः अतिद्रवेति मंत्रद्वयस्य यमधानौ त्रिष्टुप्· द
ह्यमाने प्रेतानुमंत्रणे० मैनमग्ने इति षण्णां दमनोग्निस्त्रिष्टुप्· दह्यमान· पूषात्वेत इति तिसृणां देवश्रवा पूषा त्रि
ष्टुप्· दह्य० उपसर्प इति चतसृणां संकुशिकः पितरो आद्या त्रिष्टुप्· द्वितीया प्रस्तारपंक्तिः· तृतीया त्रिष्टुप्· चतु
र्थी जगती· दह्य० सोम एक इति पंचानां भाववृत्तो यमोऽनुष्टुप्· दह्य० उपासावित्येकस्य यमध्वानौ त्रिष्टुप्· दह्य
माने० एतान्निसृष्टान्प्रानुमंत्रयेत्· प्रेतोपरि तिलानुत्क्षिपेत्· ततः कर्ता उदकुंभं सव्ये संगृहीत्वाऽस्फुटितं
स्कन्धे कृत्वाऽश्मनापृष्ठभागे छिद्रं कृत्वा प्रेतस्य पाददेशाद प्रदक्षिणं त्रिः परिव्रजञ्जपेत्· ओं नानासैवं
तुपधिपुपयां धमनः सुखा गात्र सुखा तुलोमाः· त्वचः सुखा मांस सुखा अस्थि सौख्यावहंतु तां मरुतः सुख
तायां यत्र लोकाः· इमा आपो मधुमत्यो अस्मिंस्ते लोके उपदुह्यतां भक्षीमाणाः स्वधानमः· इत्येकवारं परिक्रम्य पा
ददेशे एव स्थित्वाऽश्मनाकलशे द्वितीयं छिद्रं कृत्वा व्रजञ्जपेत्· इमा आपो मधुमत्यो अंतरिक्षे लोके उ
पदुह्यतां भक्षीयमाणाः स्वधानमः· इमा आपो मधुमत्यः स्वर्गे लोके उपदुह्यतां भक्षीयमाणाः स्वधानमः·
पुनः तथैव तृतीयं छिद्रं कृत्वा व्रजञ्जपेत्· एवं परिक्रमणं सर्वेषां सगोत्राणां मौनेन अप्रदक्षिणीकृ ते
त्य प्रेतस्य शिरोदेशे कुंभं स्फोटयित्वा पृष्ठतो अनवेक्ष्यमाणाः सव्यमावृत्य कनिष्ठपूर्वकां निर्गच्छेयुः· इ

मेजीवाइति संकुश्मिको मृत्युस्त्रिष्टुप्· सव्यमावृत्य गमनेवि० इमं जीवेभ्य इति इति मंत्राभ्यां तोरणच्छेदनं कुर्यात्·
सचैलं स्नात्वा चतुं श्रपयित्वा वाससं धृत्वा· समस्तसंपत्· गोत्रस्यन्नामेणः प्रेताय तुष्ट्यर्थं मरणादिनादार
भ्य प्रथमेहनिदहनजनिततापोपशमनार्थं त्रिवारमृत्तिका स्नानं तृषोपशमनार्थं तिलांजलिदानं क्षुदुपश
मन द्वारा मुखं मूर्ध्नि निष्पत्त्यर्थं पिंडप्रदानं वीर्यनिष्पत्त्यर्थं दक्षिणादानं· कर्तुः प्राणायामम मंत्रकं· संकल्पः·
नस्नानं
गोत्रस्य प्रथमेहनि तापोपशम नार्थं करिष्ये· कारिका· सकृदुन्मज्जनं सर्वे एकैकमुदतांजलीन्· स्नानानंतरं संक
ल्प्य· गोत्रस्य प्रथमेहनिदहजनिततापोपशमनार्थं त्रिवारस्नानं करिष्ये· शुक्लपक्षे केचनादि· कृष्णपक्षे संवर्च
णादि· संकल्प्य· गोत्रस्य प्रथमेहनिदहजनिततृषोपशमनार्थं तिलांजलिदानं करिष्ये· गोत्रस्य प्रेतासनुष्ट्यर्थं
प्रथमेहनिदहजनिततृषोपशमनार्थं एतत्तिलोदकमुपतिष्ठतु· १० संकल्प्य· गोत्रस्य प्रेताय प्रथमेहनिदहनज
नितक्षुदुपशमनद्वारा मुखं मूर्ध्नि निष्पत्त्यर्थं पिंडप्रदानं करिष्ये· गोत्रस्य शर्मणे प्रेताय पिंडप्रदाने एतद्दर्भासनमुप
तिष्ठतु· पिंडस्योपरि तिलोदकमुपतिष्ठतु· गोत्रस्य प्रेताय प्रेततुष्ट्यर्थं मरणादिनाद्यारभ्य प्रथमेहनि क्षुदुपशमनद्वा
रा मुखं मूर्ध्नि निष्पादकोयं पिंडः प्रथमेहमुपतिष्ठतां· प्रेतस्य मुखं निष्पाद्यतां· पिंडस्यार्थं अंजनाभ्यंजनमुपतिष्ठ

तु· पिंडस्योपरि तिलोदकमुपतिष्ठतु· नैवेद्यमुपतिष्ठतु· वीर्यनिष्पत्त्यर्थं दक्षिणावर्तमानं· गोत्रं प्रेतं उद्दिश्य क्रियमाणोयं
प्रथमेहनिदहनजनित पापोपशमनार्थं स्नानेन तृषोपशमनार्थं तिलांजलिदानेन क्षुदुपशमनद्वारा मुखं मूर्ध्नि निष्पत्त्यर्थं पिंडप्रदा
नेन वीर्यनिष्पत्त्यर्थं दक्षिणादानं गोत्रस्य प्रेताय तुष्ट्यर्थं मरणादिनादारभ्य दहनजनित पापोपशमनमुखं मूर्ध्नि निष्पत्तिश्चा
स्त्विति भंतो ब्रुवंतु· तथास्तु· नारायणं नमस्तस्तु· एवं दशाहपर्यंतं कुर्यात्· अथावयवनिष्पत्तिक्रमः· प्रथमदिने मुखं मू
र्ध्निः· द्वितीये कर्णाक्षिनासः· तृतीये भुजौ वक्षस्तनग्रीवा· चतुर्थे नाभिकटिलिंगगुदः· पंचमे ऊरुजानुजंघः· षष्ठे स
र्वमर्मः· सप्तमे सर्वशिराः· अष्टमे दंतरोमः· नवमे वीर्यः· दशमे क्षुत्पिपासः· त्रिरात्राशौचविषये· पारस्करः· त्रिरा
त्राशौचं तु कुर्युः प्रथमे त्रिंशदंजलीन्· चत्वारिंशद्द्वितीये त्रिंशद्द्यात्ततः शुचिः· तेनैव प्रथमे दिवसे द्वयोः पिंडैः स
माहितैः द्वितीये चतुरो दद्यादस्थिसंचयनं तथा· त्रिंशत्तु दद्यात्तृतीये वस्त्रादिक्षालनं ततः· पुनः तोपः· शालिनः सक्तुभि
र्वापि शाकैर्वा पिंडनिर्वपेत्· प्रथमेहनि यद्दद्यात्तदेव स्याद्दशाहिकं· दद्यात्पिंडं वायसेभ्यो वैवस्वतमनुस्मरन्· तद्
पापि रस्तस्य प्रचरंतीति हि श्रुतिः· स्पृष्ट्वा लोष्टादिभिः स्पृष्ट्वा पिंडो यद्युपहन्यते· प्राजापत्यत्रयं कृत्वा पुनः पिंडं स
माचरेत्· विष्णुः· तिलोदकं तथा पिंडं नवश्राद्धानि यानि च· रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकं· यदि रात्रौ
भवेत्तस्य समाप्तिर्दहनस्य चेत्· परेह्न्युदिते सूर्ये कार्यास्तस्योदकक्रियाः· नवश्राद्धविधिः· भविष्योत्तरे· नवश्रा
द्धं सपिंडं च षण्मासं मासिकानि च· न करोति सुतो यस्तु तस्याधः पतते गतीः· कालादर्शे· आदशाहांत मरणाद्दिषमे

स्मृति० कर० ५१

पुदिने पुष्प· नवश्राद्धान्यन्तानि षट् एकोद्दिष्टं विधानतः· समस्तसंपन्न· कर्ता संकल्पः· गोत्रस्य प्रेताय प्रथमेऽहनि प्रेतत्व
विमोक्षणार्थं नवएकोद्दिष्टश्राद्धं आमेन पार्वणविधानायुष्मदनुज्ञया सद्यः करिष्ये· गोत्रस्य शर्मणः इदं तेक्षणमुपतिष्ठ
तथैव पाद्यं· प्रक्षालितं गोत्रस्य प्रेताय आसनं क्षणोऽर्घ्यं· इह लोकं परित्यज्य गतोऽसि परमां गतिं· मनसा वायुरूपेण कुशेष्वाहं नियो
जयेत्· अर्चनं गंधपुष्पाच्छादनं दक्षिणासहितं सोपस्करमामं पुरतो निधाय· विच्छेद्य दं आमं रक्षस्व ~~आमं रक्षस्व~~ आमं
जपेत्· अर्चनं गंधपुष्पाच्छादनं दक्षिणासहितं सोपस्करमामं पुरतो निधाय· विच्छेद्य इदं वर्तमाने गोत्रं प्रेतं उद्दिश्य मयाक्रि
सोपस्करं सदक्षिणाकं सोऽकुंभं गोत्रस्य प्रेताय प्रेत तृप्तिचोपतिष्ठतामिति दद्यात्· वर्तमाने गोत्रं प्रेतं उद्दिश्य मयाक्रि
यमाणे प्रथमेऽहनि नव एकोद्दिष्टश्राद्धे गोत्रस्य प्रेताय प्रेततृप्तिरस्त्विति भवंतो ब्रुवंतु· संकल्पः· गोत्रस्य प्रथमेऽह
निनवश्राद्धं तदंगपिंडप्रदानं करिष्ये· पिंडस्थाने दर्भासनः तिलोदकः गोत्रस्य प्रेताय नवश्राद्धे पिंडमुपतिष्ठ
तु· अथ नग्नप्रच्छादनश्राद्धं· संग्रहे· नग्नप्रच्छादनश्राद्धं स्नानांते तु मृतेऽहनि· घटे तंडुलसंपूर्णवाससा परि
वेष्टिते· निधाय कांस्यपात्रेण नवस्मिन्नाज्यं विक्षिप्त· हिरण्यं तत्र निक्षिप्य यथाविभवसारतः· संकल्पः·
गोत्रस्य शर्मणः प्रेताय· अंधत्वनग्नत्वमूकत्वबधिरत्वपैशाचत्वपरिहारार्थं नग्नप्रच्छादनश्राद्धं करिष्ये·
प्रेतोद्देशेन ब्राह्मणपादप्रक्षालनं गंधादिपूजां कुर्यात्· आमं सोपस्करं सवस्त्रं सदक्षिणं दद्यात्· वस्त्रदा
नं· शीतवातः· वर्तमाने गोत्रं प्रेतं उद्दिश्य मया कृतेन नग्नप्रच्छादनदानेन गोत्रस्य प्रेताय नग्नप्रच्छाद
नेन अंधत्वनग्नत्वमूकत्वबधिरत्वपैशाचत्वपरिहारोऽस्त्विति भवंतो ब्रुवंतु· विदिनस्य निंबपत्राणि भयत श्रीरामः ५३

दारवेश्मनः· आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्· पिंडोदकशिलादिना गोभिलः· यदि नष्टो हृतो वापि पाषाणं
प्रथमोद्भिक्तः· पाषाणमन्यमादाय पूर्ववद्दत्तांजलीन्क्षिपेत्· उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये· पिंडोदकं नवश्राद्धं पु
नः कुर्याद्यथाविधिः तथा· दशाहमध्ये पाषाणं नष्टो यदि शिलांतरं· पूर्वदत्तांजलीं दद्यात्पिंडान पिसमर्पयेत्· नष्टे शिलायदि ह
तामन्यमादाय कर्मकृत्· पूर्वदत्तांजली वै उभयोश्चापि लोपलीन्· यत्र प्रथमदिवसे कृत्यं कृतं तत्रैव दशाहपर्यंतं समा
पनीयं· आद्यस्थाने न्यस्ते तु प्रेत पिंडो भवेद्यदि· पूर्वदत्तांजलीन्पिंडान्दद्यादित्याह गौतमः· दशाहमध्ये तिलोद
कादिभिः· दाहादिकर्मणि यदा परिवर्तमाने मध्ये भवेद्यदि निवृत्तिं तथांते धांतराय· दाहं विना बालकोऽक
र्मतिलोदकादि संवत्सरेऽपि विगते करणीयमेतत्· तथा· उदकं पिंडदानं च दशाहाभ्यंतरे यदि· अतिक्रमे दशाहांते
सर्वं पूर्ववदाचरेत्· दहनास्थिसंचयनं नग्नप्रच्छादनव्यतिरिक्तं सर्वं पुनः करणीयत्वात्· यदा पुत्रमात्राभावः पत्न्यासत्त्व
पिंडादिकृतौ संकरोति· तदा दशाहांतर्मध्ये पुत्रसान्निध्येऽपि स एव दशाहं समापयेत्· मैथिल्यः· पित्रोर्मरणकाले तु न चेत्स्या
त्संनिधौ सुतः· अन्यः कुर्याद्दशाहांतं न तु सर्वं कदाचन· दशाहमध्ये पुत्राद्यागमनेऽपि प्रथमदिवसो पक्रांतेनैव दशापिंडा
दातव्याः· पुत्रादिनैव कार्याः· गृह्यपरिशिष्टे· असगोत्रो वा यदि स्त्री यदि वा पुमान्· प्रथमेऽहनि यो दद्यात्स दशाहं स
मापयेत्· विशेषः· अस्थिसंचयनादूर्ध्वं मागतो यदि चाग्रजः· प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्· पित्रोः संस्का

अथास्थिसंचयनं अमायां पौर्णिमा चैव भ अंगार छ हस्ततो अस्थिसंचयनं कुर्यात् कुलक्षयकृतं भवेत् १

स्मृ॰ कौ॰ कर॰ रेत्येष्टएकतो॰ मरीचिः॰ सर्वैरनुमतं कुर्याज्येष्ठेनैव तु यत्कृतं॰ द्रव्येण वाविभक्तेन सर्वेनैव कृतं भवेत्॰ नवश्राद्धं सपिं
५२ डत्वं श्राद्धान्यपि च षोडश॰ एकेनैव तु कार्याणि संविभक्तधनेष्वपि॰ सपिंडीकरणादेव न सांवत्सरिकादपि॰ सहगमने॰ एकचितां
समारूढौ दंपती निधनं गतौ॰ एकोद्दिष्टं षोडशं च भर्तरेकादशेऽहनि॰ द्वादशेऽहनि संप्राप्ते पिंडमेकं तु योक्षिपेत्॰ पितामह
हादिपिंडेषु तं पिंडं विनियोजयेत्॰ एकचित्यां समारूढौ दंपती निधनं गतौ॰ त्रिलोकाच प्रकुर्वीत पिंडदानं पृथक् पृथक्॰
गर्भिणीमरणे॰ मृता गर्भयुता नारी षण्मासाभ्यंतरे यदि॰ सहैव दहनं कुर्याद्गर्भछेदं न कारयेत्॰ षण्मासादूर्ध्वं॰
नीत्वाश्मशानं षण्मासात्तदूर्ध्वं सव्यमूलिखेत्॰ उदरं चाव्रणं कृत्वा पृथक् दाज्येन पूरयेत्॰ स्नाप्य धान्यवासेन पितृमेधेन ...त्वी
दहयेत्॰ स्त्रीशौ तु मरणे प्राप्ते तत्रैव निरवने कुर्वि॰ सूतिकारजस्वला मरणे॰ रजस्वला सूतिका वे म्रियते च
ततः कथं॰ आपो हि ष्ठेति तिसृभिरभिमंत्र्य जलैः सह॰ पंचगव्यैः स्नापयित्वा श्मशानमानुत्रपातदा॰ अन्यद्वस्त्रप
रीधाय पितृमेधेन दाहयेत्॰ पूर्वान्न यमघारौ द्वमूकेतु रथ्यायाम्यभे॰ शून्यंगारकयोश्चैव न कुर्यादस्थिसंचयं॰ प्रथमे
द्वितीये तृतीये द्वि सप्तमे नवमे तथा॰ अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह॰ द्वितीये च तृतीये चतुर्थे पंचमे तथा॰ सप्त च
मे नवमे चैव अस्थिसंचयनं दिने॰ धनिष्ठापंचके चैके चैव सप्तमी चत्रयोदशी॰ मंदार्क... भौमेषु नंभद्रा ए
विवर्जिताः॰ स्वाती श्रवणरोहिण्यां मैत्र ज्येष्ठा विनीषुचे॰ अस्थिसंचयनं कार्यं न दोषः परिकीर्तितः॰ गोमूत्र श्रीरामः
गोमय क्षीरं आज्य तिल कुश हरिद्रा क्षतकार्पास पंचरत्न कृष्णाजिन पंचगव्य भांड तंडुल चूर्ण एतानि संगृह्य॰ ५२
दहनदेशं गत्वा स्नानं नवश्राद्धं पिंड पूर्ववत्कृत्वा॰ चरुद्रव्येण वलिदानं॰ समस्त संपत्॰ गोत्रस्य ततो

यह निऽस्थिसंचनं करिष्ये॰ गोत्रस्य प्रेतायत्तती यह निश्च क्षुदुपशमनार्थं क्रव्यादप्रमुखेभ्यो देवेभ्यः इदमन्नं पानीयं चो
पतिष्ठतु॰ तेन प्रेतस्यागानि नोदत्वा॰ इत्युच्चार्य बलिं दत्वा॰ त्रिरश्मशान स मिलितक्षीरोदकसहितम् अपसव्यं त्रिः प्रदक्षिणं चि
तिं प्रोक्षेत्॰ शीतिके शीतिके मनो ह्लादिनि इष्टुपू॰ अस्थिप्रोक्षणे विं॰ शीतिके शीतिका वतिनी मंत्रेण दक्षिणाभिमुखो भूत्वा
त्वा वस्यपाद देशो त्रिरेखा लिखित्वा॰ गायत्र्या प्रोक्ष्य॰ ह्रदतरे एक भिनि सूक्तेन संचयनं कृत्वा॰ पंचगव्यं ततत्मंत्रेण
गायत्र्या आपो हि ष्ठा इत्यादि प्रोक्ष्य॰ कुंभमध्ये पूरयेत्॰ ततो मध्ये वेदिकायां कृत्वा॰ त्रिकोणां दक्षिणाभिमुखां॰ गो
त्रस्य ततीये श्मशानवासिनयोः॰ मध्ये प्रेतराजाय॰ उत्तरपार्श्वे रुद्राय दक्षिणपार्श्वे यमाय त्रिदेवताप्रीत्यर्थं पू
जां करिष्ये॰ केवादि मंत्रेण त्रिशिलास्थानं दक्षिणामुख वेदिको परि आत्माभिमुखत्रिशिलास्थाप्य॰ गोत्रस्य प्रेता
पर्व यत्तती हविर्दुच्चार्य प्रत्येक शिलावाहनादि पूजां स्नानकार्यासवस्त्रउपवीतं गंध पुष्प नैवेद्य दक्षिणामुपतिष्ठ
तु॰ गोत्राय पूर्वदुच्चार्य श्मशानवासिने यो मध्ये प्रेतराजाय कटकं निहरणार्थं ... पतिष्ठतु॰ तथैव पादुका मुप॰
गोत्रस्य प्रे... स्येकक्षुदुपशमनार्थं पिंडदानं करिष्ये॰ गोत्रस्य ...क्षुदुपशमनार्थं एष पिंड उप॰ प्रत्येकं
पिंड तिलोदकं॰ अंजनाभ्यंजनं नैवेद्य दक्षिणामुप॰ गोत्रस्य शर्मणः तृषोपशमनार्थं तिलमिश्रोदकुंभमुप॰
तंतु॰ अष्टदिग्बलिमंत्रः॰ ये श्मशाने देवतास्तु भगवंतः सनातनः॰ तस्मात्सकाशात् [illegible] बलिमष्टांग
मक्षयं॰ इति मंत्रेण बलिं दद्यात्॰ वर्तमानं गोत्रं प्रेत मुद्दिश्य मया क्रियमाणे त्रिदेवताप्रजापिंडप्रदाने न्यू...
रुद्राय पादुका मु॰ यमाय पादुकां उ॰ गोत्रस्य प्रेताय प्रसेकं आतपनिर्हरणार्थं छत्रमुप॰ ५

स्मृतिं कर॰ ५३

कंटकनिर्हरणार्थं पादुकादानेन आतपनिर्हरणार्थं छत्रदानेन क्षुदुपशमनार्थं पिंडप्रदानेन तृषोपशमनार्थं उदकुंभदानेन
गोत्रस्य प्रेतायश्मशानवासिनयोर्मध्ये प्रेतराजाय दद्याद् यमाय कंटकनिर्हरणआतपनिर्हरणक्षुदुपशमनतृषोपशमन
मस्त्विति भवंतो ब्रुवंतु॰ प्रार्थनमंत्रः॰ प्रेतस्यास्य भ्रातृकामयकेति हिताभ्यतान्॰ अस्माकमायुरारो
ग्यं दिशंतु सुखमुत्तमं॰ ततः अस्थिनिक्षेपः॰ गोत्रस्य शर्मणः अस्थिनिक्षेपणार्थं भूमिशुद्धिं करिष्ये॰ गाय
त्र्या प्रोक्षेय॰ उपसर्पेति भूमिं खात्वा॰ उपसर्पेति संकुसुकः पृथिवी मृत्युः पितरो वा त्रिष्टुप्॰ अस्थिकुंभस्यग
र्त्ते प्रोक्षणे॰ उच्छ्वंचस्वेति संकुशिको मृत्युः पृथिवी प्रस्तारपंक्तिः॰ पांसुप्रक्षेपणे॰ उच्छ्वंचमानेति मृत्युः पितरो
जगती॰ अस्थिसमीपे जपे॰ उत्ते स्तभ्नामीति संकुशिकः पृथिवी मृत्युः त्रिष्टुप्॰ कपालेन घटस्य पिधानेवि॰
सहिरण्यानीति रत्नानि क्षिप्य॰ अश्वमेधमेति॰ अथ सप्तावरणाः॰ अजिनं कंबलं दर्भा गोकेशा न्यं
श्चपत्रकं॰ मांजिष्ठं पट्टसूत्रं च अस्थिनाऽऽसप्तवेष्टयेत्॰ देशांतरे रोगके स्यूनि यतो नियतादानः॰ अजिना
विकवस्त्रेश्च क्षौमकौशेयपर्णकैः॰ केशेषु नदृढं बध्वा पूर्वोक्तविधिनाक्षिपेत्॰ दशाहाभ्यंतरे वास्थिगं
गायां स्थापितं यदि॰ अर्घोदकमृते यान् फलं तावद्वाप्नुयात्॰ नवश्राद्धं॰ आशौचमध्येद श्रीरामः ५३
र्शपातः॰ आशौचमंतरे दर्शो यदि स्यात्सावधं दिनः॰ समाप्तिं प्रेततंत्रं कुर्यादित्याह गौतमः॰ प्र
स्मा

तिपन्निश्रिता दर्शस्य प्रेतार्थसंगवं यदि॰ आदशाहाः क्रियाः सर्वाः समाप्ता भिनि निश्चयः॰ सर्वागासंगवादर्शो द्वित्रिनाडी
भवेद्यदि॰ तदासा भूतयुक्तारव्यं दशाहां न समापयेत्॰ असमापने दोषमाह॰ आद्ये दर्शे वा कर्तव्याः प्रेतपिंडोदकक्रियाः॰
द्वितीयं वतुकर्वीणः पुनः स्नानं समश्नुते॰ चतुर्दशीककामात्र तिथौ यस्य मृतिर्भवेत्॰ नातिक्रम्य सिनीवालीं कुर्यान्त
स्योदकक्रियाः॰ चतुर्दशीक्षयन्तत्स्नातः प्रमोत्यमति धिः॰ तिलोदकं तथा पिंडान् समाप्य दशमेहनि॰ एतानि वचनानि
मातापितृव्यतिरिक्तविषयाणि॰ द्विचंद्रदर्शने दोषो मातापित्रोर्न विद्यते॰ अन्येषां च सपिंडानां दर्शे चैव समापयेत्॰ चं
द्रिकायां॰ यथादिति सपिंडानां समानोदीकानां तथा॰ द्विचंद्रदर्शनात्सद्यः कृतं कर्म विनश्यति॰ केचिद्विशेषः॰
ब्रह्मांडे॰ दर्शो दशाहमध्ये स्यादूर्ध्वं तंत्रं समापयेत्॰ त्रिरात्राद्युत्तरं पित्रोः संक्रमेऽप्येवमेव हि॰ ब
तथा गालवः॰ पित्रो रात्रो च मध्ये तु यदि दर्शं समापयेत्॰ तावद्देवोत्तरं तंत्रं पर्यवसेत्त्र्यहात्॰ एतदौरसपुत्रव्यतिरिक्तविषयं॰
तदुक्तं॰ दशाहमध्ये यदि दर्श आगतेद्युर्दशाहेति लवारि पिंडान्॰ पुत्री सुतो औरसपुत्रक आदेशान्सुतास्तत्र समा स
पयेतत्॰ औरसो धर्मपत्नीजः स्तत्समः पुत्रिकासुत इति वचनात्॰ गौतमः॰ अंतर्दशाहे यद्य॰॰॰तत्र सर्वं स
मा चरेत्॰ पुत्रोऽस्तु यावदाशौचं दद्यात्पिंडान् तिलांजलीन्॰ तथा॰ दर्शो दशाहमध्ये स्यादूर्ध्वं तंत्रं समापयेत्॰ न सप
त्नीनपुत्रश्च वेदिकांतं समापयेत्॰ गर्गः॰ दशाहमध्ये दर्शश्चेत्सांगः संक्रांतिनेवच॰ मातापित्रोर्विनान्येषां सद

ती . जलतीरंगत्वा

स्मृति० कर० ८७ सद्दशाहं समापयेत् । दशाहे निष्प्रयोगः । तिलदर्भ आमलक हरिद्रा कार्पास तंडुलादि गृहीत्वा । यथाविधि नित्य तिलां
जलिपिंड प्रदानं कुर्यात् । ततः पूर्ववद्वेदिकापूजा । संकल्पः । गोत्रस्य प्रेताय दशमेहनि तीर्थवासिनयोः मध्ये प्रेतराजाय ।
उत्तरपार्श्वे रुद्राय । दक्षिणपार्श्वे यमाय । त्रिदैवता आवाहनादि पूजां करिष्ये । प्रत्येक गोत्र नाम स्थान गंध पुष्पने
वेद्यादि पूर्वसाद्गुकोष्ठ त्रपनाकां दत्वा । त्रिदैवता पूजां कपिंड प्रदानं करिष्ये । प्रत्येक पिंड त्रयमुपतिष्ठतु । बलिदानं । येतीर्थ
वासिने गोत्रस्य तृषोपशमनार्थं उदकुंभमुपतिष्ठतु । तत्तु । स्थप । वर्तमानं गोत्रं प्रेतं उद्दिश्य क्रियमाणो कं टकनिर्हार्यार्थं पा
दुकादानेन आतपनिर्हार्यार्थं पाताकादानेन क्षुदुपशमनार्थं पिंडदानेन तृषोपशमनार्थं उदकुंभदानेन गोत्रस्य प्रेताय कं
आतपनिर्हरण टकनिर्हार्यो वायुनिर्हरण क्षुदुपशमन तृषोपशमनमस्त्विति भवंतो ब्रुवंतु । प्रार्थना । येतीर्थवासिनो धर्मोदकैः
समस्तसंपात् । गोत्रस्य प्रेताय दशमेहनि तृषोपशम नार्थ सर्वेषां महाजनानां भवद्गुरिरावोधने युष्मा
भिर्धर्मोदकं दीयतां । ततः आमलक स्नानं । जीवत्पितृकस्य तिलोदक निषेधः । ज्ञातीनां मरणे ब्रह्मचारी
णां नास्त्याशौचं पितृव्यामपि तैन स्याद्द्वयमेव तिलोदकं । ज्ञातिभिः सह संगाहं तैश्च साकं तिलोदकं । न जीवत्पितृकः कु
र्याज्ज्येष्ठ भ्रातृमृते विना । दशाहाभ्यंतरे स्त्री रजस्वला विषये । यदि नारी विदेशस्थ अशौचे वा रजस्वला । अथ कुर्वंकु
र्यीद्धकसूत्रं विमोचयेत् । तथा । मृताभर्तरि या नारी अशौचे वा रजस्वलाः । श्रीनितु प्रकुर्वीत स्नात्वा सूत्रं विमो श्रीरामः ८४
चयेत् । संग्रहे । मृते पत्यौ दशाहे स्त्री सूयते वा रजस्वलाः । भूत्वा शुद्धा यथाकाले स्नात्वा सूत्रं विमोचयेत् । विशे

षः । मृते पत्यौ यदा हेतु यादपत्नी रजस्वलाः । पुत्रः कुर्यात्तेन कार्पंसकलंघोडशादिकं । शुद्धा नारी चतुर्थेह्नि वाससा जलमाविशे
त् । कुंकुमांगलसूत्रं च कर्णौ कंचुकं त्यजेत् । ग्रंथांतरे । दशमेहन्यपुत्रा चेद्भवेद्यदि रजस्वलाः । पत्नीस्युत्तस्य वैक
मेथं कुर्स्यादिति संशयः । स्नात्वा नारी चतुर्थेह्नि शुद्धा भवति पंचमेऽशाहं विनाकृतं कर्मपुनः कुर्याद्यथाविधिः । एतदपुत्र
स्त्रीविषयं । दशाहंतत्र यदि चेद्रतीतेतदागते ज्येष्ठसुतः प्रकुर्यात् । पित्रोत्तरी यदृषदनं नं च पिंडान्नवस्त्राद्यदशाहि कंन
हि । तथा । दशाहे वेदिकातीते यदि ज्येष्ठ तदागते तिलादिकं न कुर्वीत कुशगंधयो तिलांजलीन् । दशाहमध्ये देशां
तरस्थित पुत्रागमने प्रमादात्तिलोदकादिकं तं चेत्तदा यस्मिन्कस्मिंश्चिद्दिने दातांजलिदत्तपिंडान्दद्यात् । मंत्राग्निनाविद
ग्धस्यापिंडदानोदकक्रियाः । न कर्तास्तु प्रमादश्चे दशाहाभ्यंतरे यदि । अथैकस्मिन्दिने कर्मं यदा कर्तुं तु पक्केनेदं
पिंडोदक क्रियायामश्मा नौचं दहनं विना । एकादशी विषये । पद्मसंहितायां । पितुर्दशाहमध्ये तु संप्राप्ते हरि
वासरे । पिंडदानं न कर्तव्यं न तिलोदकसत्क्रियाः । एकादश्यां तु यो भैक्ष न्त्रास्त्रणो क्षिपते यदि । तदानीकाष्ठवद्द
ग्धा परेद्युर्मंत्रवद्दहेत् । चेताकृतिं न होतव्यं न पिंडा न तिलांजलीन् । कुर्यात्सर्वं परदिने दोषस्तत्र न विद्यते । अ
स्थिदाहे ततः कुर्यादौपासनपुरः सरं । मरणो द्विप्रभृत्यंते संप्राप्ते हरिवासरे । न तत्र वेदिकापूजां कुर्यात्पूर्वेद्वि
संमतः । दशाहतंत्रे न तु तंत्रवेदिकापूजापदानं न परेक्षि कारयेत् । नवश्राद्धिपिंडान्दजलिसर्वकर्मणा दास्तितिचो

क्तो नव भेद्भिः रोभुना॰ उत्तरीयविषये॰ अतोपि तृत्व माप न्नेसपिंडीकरणे कृते॰ सपिंडीकरणादूर्ध्वं वासस्त्यागो विधीयते॰ उत्तरीयं वि
नाश्राद्धं हादशाहे करोति ह॰ तत्कर्म नाशमाप्नोति प्रेतत्वं नैव हीयते॰ इति द्वादशाह पर्यंतं निर्णयः॰ अथैकादशेहनि॰ स्नानानंतरं
पुण्याहवाचनं संकल्पः॰ गोत्रस्य प्रेत त्व विमुक्त्यर्थं एकादशेहनि समस्त पापक्षयार्थं रुद्र भांडस्थ ध्यार्थं स्वस्ति पुण्याहवाच
नं करिष्ये॰ कलशस्य॰ आद्यादि सर्वषोडशा मासिकानिकरिष्यमाणास्तदा दौशुध्यर्थं वासो ध्यंते समुद्र ज्येष्ठा स्वचीवाहव्या॰
एतोन्विंद्रं॰ इत्येतैर्द्रव्याणां प्रोक्षणं॰ संकल्पः॰ गोत्रस्य एकादशेहनि आद्यादि षोडशैकोद्दिष्ट श्राद्धं सद्यः करिष्ये॰ गोत्रस्य प्रेताय
नमुपतिष्ठतु॰ वृषोत्सर्गे॰ संग्रहे॰ स्वगृहे वापि तीर्थादौ देहत्यागो भवेद्यदि॰ प्रेतकर्माणि तत्रैव कुर्यादन्यत्र वै भवतु॰ त्र
लोके॰ एकादशाह्नि संप्राप्ते तया स्वर्गगामि कर्तौ॰ वृषमेकं समुत्सृज्य श्राद्धे विप्रांश्च भोजयेत्॰ एकादशाह्नि प्रेत
स्य यस्य नोत्सृज्यते वृषः॰ प्रेतलोकं परित्यज्य देवलोकं स गच्छति॰ कात्यायनः॰ एकादशाह्नि संप्राप्ते यस्य नोत्सृ
ज्यते वृषः॰ पैशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॰ यदि पुत्रवती नारी पतुर्ये मृता यदि॰ वृषोत्सर्गं न कुर्वत तथे
नुं दद्यात्स्य पयस्विनीं॰ पतिपुत्रवती नारी म्रता चेज्जीवभर्तृका॰ पतिवृत्तेन यैल्लोकं वृषहीनं न गच्छति॰ व्यासः॰ पति
व्रता बंधुमती पुत्रिणी सुभगा मृता॰ नोत्सृजेद्वृषमेकं तु सहगामुत्सृजेद्वृषं॰ प्रयोगः॰ संकल्पः॰ गोत्रस्य एका
दशेहनि पैशाचत्व परिहारार्थं विष्णुलोक प्राप्त्यर्थं वृषोत्सर्गाख्य हवनं करिष्ये॰ तदंगगो वृषपूजां करिष्ये॰ कल

धार॰ ऋषभं मा॰ मंत्रै आवाहनादि पूज्यां॰ आपोहिष्ठा ऋग्भिस्त्रिभेन॰ कयानश्चित्रा न वर्चनेन मार्जनं कृत्वा वस्त्रादि
पूजा होमसंकल्प्य॰ पूर्ववत्॰ अग्निप्रतिष्ठापनादि पूर्णपात्र निधानांतं कृत्वा निर्वाप प्रोक्षणांतं अन्वाधानं॰ चक्षुषी
आज्येन॰ रुद्रं सोमं इंद्रं॰ एता चरुणा पायस पावक इष्ठेया स्विष्टकृतादि॰ सद्यो यक्ष्ये॰ चरु पात्रय पात्रं कं आज्य संस्का
राघारा ज्यभागांतं कृत्वा॰ कद्रुद्राय कण्वो रुद्रो गायत्री॰ प्रधान चरु होमे विनियोगः॰ आप्यायस्य गोतमः सोमो
 गायत्री॰ वृषोत्सर्ग होमे विनियोगः॰ इंद्रं वो मधुछंदा इंद्रो गायत्री॰ इंद्र पावक होमे विनियोगः॰ स्विष्टकृता
दि होम शेषं समापयेत्॰ ततो गो वृष पूर्वदिशां कृत्वा प्रार्थन सूक्तं॰ ऋषभं मा समानानां॰ कद्रुद्राय वर्महर्यं
एतं युवानं परिवोददामि तेन क्रीडंतीश्चरति प्रियेण॰ मा नः शाप्त जनुषा सुभगा रायस्पोषेण समिषा म
देम॰ शांता पृथिवी॰ सर्वतो व्रजस्व॰ सगो वृषभराजन् पूर्वदिशं गच्छ त्वं भक्षजलं पिब गोवृषैः सह सुखे
न क्रीडस्व॰ गोत्रस्य एकादशेहनि पैशाचत्व परिहारार्थं विष्णुलोक प्राप्तिरस्त्विति भवंतो ब्रुवंतु॰ दक्षिणा
दिशि ऋषभं मा॰ इमा रुद्राय तवसे कपर्दिने पूर्ववत्॰ पश्चिमे॰ आ ते पितर् इति वर्गत्रयं॰ उत्तरे॰ इ
मा रुद्राय स्थिरधन्वने वर्गी॰ प्रार्थना मंत्रः॰ तृण्योदकाद्येषु नतेषु संभवः क्रीडंति गावः सवृषाः स
वत्साः॰ क्षीरं जसुं स्रवंतु सुखं तु सीता तापत्रय व्याधि विमुक्ताः॰ लिंग मध्ये लिखित्वा॰ त्वन्दहनदो

स्मृ० रत्ना०
५६

षपरिहारार्थं तिलानुदकुंभं गां वासो दानं कुर्यात् ॥ शौनकः ॥ ब्राह्मणं भोजयेदाद्ये होतव्यमनलेपि वा ॥ पु
नश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ॥ एकोद्दिष्टं सुतैः कार्यं मृतस्यैकादशेहनि ॥ यदि तत्र निवर्तेत पु
पुनः संस्कारमर्हति ॥ अद्यश्राद्धं न कुर्वीत मोहादेकादशेहनि ॥ पुनस्तिलोदकं दत्त्वा पिंडाद्यं तु क्रमेण यथा
विधिः ॥ तस्यैतानि [illegible] दत्तानि प्रेतश्राद्धानि षोडश ॥ पैतृकानि स्थिरं तस्य तथैवं श्राद्धदातरपि ॥ व्यासोपि
सूतकांते नरः कुर्यादेकोद्दिष्टं द्वयं बुधः ॥ सूतके पतिते वापि स्वतंत्रं नातिलंघयेत् ॥ शंखस्मृतिः ॥
आद्यश्राद्धमशुद्धोपि कुर्यादेकादशेहनि ॥ कर्तुस्तात्कालिकी शुद्धिः पुनरेव सः ॥ पैठीनसिः ॥ एकादशेद्वि — नेशुद्धि
यश्राद्धं तत्सामान्यमुदाहृतं ॥ चतुर्णामपि वर्णानां सूतकं च पृथक्पृथक् ॥ इति नविरोधाच्च ॥ प्रयोगः ॥
समस्तसंपत् ॥ गोत्रस्य प्रेतत्वविमुक्त्यर्थं एकादशेहनि श्राद्धाभावे आद्यावेकोद्दिष्टश्राद्धं कर्तुं संकल्पः ॥
गोत्रस्य आद्यावेकोद्दिष्टश्राद्धं सद्यः करिष्ये ॥ अग्नौकरिष्ये ॥ प्रेताय मुक्यमाय स्वाहा ॥ सक्तपृथिवी ते पा
त्रं ॥ विष्णो अन्नं रक्षस्व ॥ गोत्र आद्यावेकोद्दिष्टश्राद्धे एतत्ते अन्नं गोत्रस्य श्राद्धे इदमन्नं सतिलोदकं — श्रीरामः
सोदकुंभं सदक्षिणाकं प्रेत तृप्तिं चोपतिष्ठतां ॥ वर्तमानं गोत्रं गोत्रस्य श्राद्ध इदमन्नं सतिलोदकं सोद — ५६

वर्तमानं गोत्रं क्रियमाणेन ब्राह्मणाभावे आद्यावेकोद्दिष्टश्राद्धमिदं द्रव्येण पार्वणविधानेन गोत्रस्य प्रे — ५८
तत्वविमुक्तिसाधनमस्त्विति भवंतो ब्रुवंतु ॥ अस्तु ॥ उदीरतामिति स्पृष्ट्वैनं प्रस्थे वंचयंतु वीरं कृत्वा ॥
दृदं न ममेति वर्जयेत् ॥ तृप्ति रस्त्विति पिंडप्रदानं करिष्ये ॥ गोत्रस्य प्रेताय श्राद्धे एष पिंडः ॥ अंजनादि
वर्तमानं पूर्ववत् ॥ स्नानानंतरं ॥ समस्तसंपत् ॥ गोत्रस्य प्रेताय एकादशेहनि आद्यादि षोडशैको
द्दिष्टश्राद्धं कर्तुं संकल्पः ॥ गोत्रस्य प्रेताय प्रेतत्वविमुक्त्यर्थं एकादशेहनि अग्नौकरण प्रथमाद्येको
द्दिष्टश्राद्धानंतरं ब्राह्मण आवाहनीयेकर्तव्यानि ॥ द्वितीयाद्येकोद्दिष्टश्राद्धं अन्नद्रव्येण आद्या
षोडशैकोद्दिष्टश्राद्धानि स्वे स्वे काले कर्तव्यानि देशकालविपरीततरोकयाश्च ॥ सपिंडीकरण
करिष्यमाणस्तदर्थमपकृष्य एकस्मिन्वत्सरे प्रतिमासं गोत्रस्य तु द्वादश षोडश कर्तव्यानि उ
द्धृत्य प्रेतरूपेण प्रेतायात्प्रयामि श्रीघ्रता प्रीत्यर्थं एकादशसंख्याका ब्राह्मणानि एकस्मिन्का
ले एकान्नद्रव्येण तान्यपकृष्य अधुना करिष्यमाणः प्रथमाद्येकोद्दिष्टश्राद्धं तन्त्रेण करिष्ये ॥ गो
त्रस्य आद्यमासिक एकोद्दिष्टश्राद्धे क्षणप्रसादः क्रियतु ॥ १ ऊनर २ त्रैमासिक ३ द्वितीय ४ तृतीय ५
५६० ॥ चतुर्थ ६ पंचम ७ षण्मास ८ ऊनषण्मास ९ सप्तम १० अष्टम ११ नवम १२ दशम १३ एका

स्म० कौ० द्वा० १४ आश्विक १५ ऊनाब्दिक १६ वीरभ १ शंभुरेनं २ गिरिश ३ अजैकपात् ४ अहिर्बुध्न्य ५
५७ पिनाकिन ६ भुवनाधीश्वर ७ कपाली ८ दिशांपतिः ९ स्थाणुः १० रुद्रः ११ ध्रुवस्थिर २
सोमः ३ आप ४ अनिलः ५ अनल ६ प्रत्यूषः ७ प्रभासः ८ पाद्यप्रक्षालनं · अपाहता उदी
रता · आसन · क्षण · अर्घ्य · गंध · आच्छादनं · भवन्तु त्वया प्रेताद्भुतिं हो च · प्रेताय सुष्वे · स
कृश्छिवी ते पात्रं · श्रीविष्णु अन्नं रक्षस्व · गोत्रस्य श्राद्धे एतत्ते अन्नं · सपरिकरं गोत्रस्य प्र
तश्राद्धे इदमन्नं सोपस्करं सोदकुंभं सदक्षिणाकं प्रेततृप्तिं चोपतिष्ठतां · १६ वर्तमानं
गोत्रे उद्दिश्य एकादशाहनि आद्य ३ ऊन १६ श्राद्धे एकादशारुद्र संख्यया ब्राह्मण भोजनैः
अष्ट वसु संख्यया ब्राह्मण भोजनैः गोत्रस्य प्रेततुष्टिर्भूत्वा प्रेत विमुक्ति साधन भवंतो ब्रुवंतु
भुंजतां · ततः प्रेततृप्तिरस्त्विति · संकल्पः गोत्रस्य एकादशे षोडशैकोद्दिष्टश्राद्धे तदं
गपिंड प्रदानं करिष्ये · गोत्रस्य आद्य मासिक एकोद्दिष्ट श्राद्धे एषपिंडमुपतिष्ठतु · हवि
१६ अंजनादि · वर्तमानं गोत्रं उद्दिश्य आद्यादि षोडशैकोद्दिष्ट श्राद्धे तदंगपिंड प्रदाने श्रीरामः
न प्रेततुष्टिर्भूत्वा प्रेतस्य विमुक्ति साधनमस्त्विति · अथ सपिंडीकालः सपिंडीक ५७

रणं कुर्याद् संवत्सरांते यथाविधिः · अथवा द्वादशाहे तु देशकालादि शंकया · गार्ग्यः · आपद्यपि कृतं यत्तु द्वादशाहे सपिंड
नं · त्रयोदशादिने कुर्यात् तदेकादशेपि वा · वृहस्पतिः · द्वादशाहादि कालेषु सपिंडीकरणं न चेत् · संवत्सरे व्यतीते तु पुनः
संस्कारमर्हति · सपिंडीकरणं यावन्न भवेद्यस्य कस्यचित् · नवै तावत्पितृत्वं स्यादिति वेदविदो विदुः · व्यासः · श्राद्ध
षोडशदत्त्वा नैव कुर्यात् सपिंडनं · न सपिंडे कृते प्रेते पितृत्वं नोपपद्यते · अकृतस्य तु पुत्रस्य शुभं किंचिन्न विद्य
ते · न च नैमित्तिकं काम्यमिष्टापूर्तादिकं च सा · सपिंडीकरणं यस्य कार्यं तत्सुतादिभिः · अकृते तु सपिंडे स्तै
र्नैव तावद्व्रतादिकं · अथ सपिंडीकर्तारः · देवलः · सुतः सपिंडीकरणं न कुर्याद्यदि मोहितः · पत्नी वा तिष्ठ
त्वा तां मृतेनरकं आप्नुयात् · पैठीनसिः · भ्राता वा भ्रातृपुत्रो वा सपिंडः सोदकोपि वा · सपिंडीकरणं कुर्यात् पु
त्रहीन मृते सति · सर्वभावे विहीनस्य पत्नी कुर्याद् मंत्रकं · असपिंडः सपिंडो वा दहनाद्याः क्रियाः यादि · एवं
पुत्रस्य ज्येष्ठे नैव सपिंडनं · पत्नी स ज्येष्ठ जीवं त्वं पुत्रेनान्येषु कारयेत् · सपिंडीकरणं पित्रोर अभावेन्ये न सपिं
कारयेत् · गौतमः · अग्रजो वानुजो वा पितृजो वा सहोदरः · विदेशस्थोपि वा पत्नी पुत्रो वा रक्षपाल्यहिते
सपिंडीकरणं हित्वा वृद्धिश्राद्धमुपक्रमेत् · अन्यातपाय मरणं भवेन्न साम संशयः · विष्णुः · ज्येष्ठो
वा यदनुजो वापि सपिंडः सोदकोपि वा · यत्र सन्निहितस्तस्य अधिकारः सपिंडने · अथ प्रयोगः संक

वृद्धप्रपिता

स्मृ०ति० लो० स्यः· गोत्रस्य द्वादशेऽहनि सपिंडीकरणाख्यैकोद्दिष्टश्राद्धे प्रायश्चित्तसूक्तादिः समस्तसंपत्· कर्तुः प्राणायामसं
५८ कल्पः· गोत्रस्य प्रेताय प्रेतत्वविमुक्तिद्वारा द्वादशेऽहनि वस्वादिपितृलोकप्राप्त्यर्थं सपिंडीकरणाख्यैकोद्दिष्टश्रा
द्धं पितामह प्रपितामहैः शर्मभिः गोत्रैः रुपैः देवैः सह मानोदक सपिंड सिध्यर्थं गोत्रस्य प्रेतत्वविमुक्तिद्वारा द्वादशे
हनि वस्वादिपितृलोकप्राप्त्यर्थं पितामह प्रपितामह वृद्धप्रपितामहानां शर्मणां गोत्राणां रूपाणां देवानां अत
उभयात्मक कामकालक संज्ञकानां विश्वेषां देवानां च अन्नेन हविषा एकोद्दिष्टपार्वणविधानेन युष्मदनुज्ञ
रे या गोत्रस्य प्रेतत्वविमुक्तिद्वारा द्वादशेऽहनि वस्वादिपितृलोकप्राप्त्यर्थं सपिंडीकरण एकोद्दिष्टश्राद्धं सद्यः करिष्ये·
देवस्थाने क्षणं गोत्रस्य शर्मणे प्रेतो यक्षणमुपतिष्ठतु· प्रेतस्य पितृ पितामह प्रपितामह वृद्धप्रपितामहानां
गोत्राणां शर्मणां वसुरुद्रादित्यस्वरूपाणां स्थाने क्षणं दत्तो· पाद्यः प्रक्षालितकर्मकार्ये· अपाहता· उदीर
तो· कामकालकविश्वेदेवाः आसन अर्घ्य गंध आच्छादन गोत्रस्य प्रेताय आसनक्षणं· इहलोके· पिताम
हादि भवतु· अत्र विशेषः· प्रचेताः· षोडशानीह सर्वाणि कुर्यादेकादशाहनि· सपिंडीकरणं कुर्याद्द्वादशेऽह
नियत्नतः· सपिंडीकरणे कश्चिद्विशेषः परिकीर्तितः· प्रेतं स्वल्पाविनिर्दिश्य पितॄन् अथ तृतीयकं· प्रेतस्य पितृ
श्चैव षष्ठ्या निर्दिश्य तं पुनः· प्रेतपार्वणयोः षष्ठी अनुज्ञायां चतुर्युजी· तृतीया पार्वणे चैव उक्ते संबुद्धिरिच्य श्रीरामः ५८
ते· ततः अर्घ्ययोजनसंकल्पः· गोत्रस्य प्रेतस्य सपिंडीकरणश्राद्धे पितामह प्रपितामह वृद्धप्रपितामहैः शर्मभिः
गोत्रैः समानोदक सपिंड सिध्यर्थं गोत्रस्य प्रेतस्य श्राद्धे पितामह वृद्धप्रपितामह पात्रोदकैः सह संयोजयिष्ये·

प्रपितामह

संयोजय· समानीव· गोत्रस्य प्रेतस्य श्राद्धे पितामहेन शर्मणा गोत्रेणात्र हस्तेतत्पात्रस्थोदकं तस्मै ते स्वधा नमः· समानी
वआकूतिः· मधुवाताऋतायते· गोत्रस्य प्रपितामहेन ३· समानीव· मधुवाता· गोत्रस्य वृद्धप्रवृद्धप्रपितामहेन ३· तिलोसि
गोत्रस्य अर्घ्यः पितामहादि अर्घ्यः ३· इहलोके· पितामहादिभवतु गंधादि आच्छादनं भवदनुज्ञया प्रेताद्युक्तिहोष्ये·
पाणिहोम सोमाय पितृमते २ स्वधा· गोत्रस्य एतत्ते अन्नं सपरिकरं· गोत्राय इदमन्नं· वर्तमानं गोत्रं प्रेतं पितामह प्रपिता
मह वृद्धप्रपितामह कामकालक संज्ञक विश्वान्देवांश्च उद्दिश्य पक्रियमाणेन सपिंडीकरण एकोद्दिष्टपार्वणश्राद्धे
न गोत्रस्य श्राद्धे पितामह प्रपितामह वृद्धप्रपितामहानां शर्मणां गोत्राणां रूपाणां एतेषां प्रेतत्वविमुक्तिद्वारा वस्वादिपितृ
लोकप्राप्तिरस्त्विति· उच्छिष्टपिंडः· गोत्रस्य प्रेतत्र क्षिरस्त्विति· येअग्निदग्धाः पिंडप्रदानसंकल्पः· गोत्रस्य प्रेतस्य श्रा
द्धे पिंडप्रदानं करिष्ये· पिंडस्थाने दर्भासन तिलोदकं गोत्रस्य प्रेताय सपिंडीकरणश्राद्धे एषपिंडस्त्वमुपतिष्ठतु· ति
लोदकं अंजनाभ्यंजनं नैवेद्यं· तत्र अपहता इत्यादि पितामहादि पिंडं दद्यात्· संयोजन संकल्पः· गोत्रस्य पूर्वपिंडं वा
ये पितामह प्रपितामह वृद्धप्रपितामहैः सह सपिंडी सिध्यर्थं गोत्रस्य श्राद्धे पितामह प्रपिता वृद्धप्रपितामह पिंडैः सह संयोज
यिष्ये· प्रेतपिंडं त्रिधा कृत्वा मधुवाता संगच्छध्वं गोत्र पितामहेन प्रेतपिंडं कुलतस्मै ते स्वधा नमः· इति त्रिषु· पुनःपि

संयोजय

स्मृतिरत्नाकर
५९

त्तदा हीनपिंडत्रयं दद्यात्. प्रार्थना. एषवोनुगतः प्रेतः पितृभागमवाप्नुयात्. सुभं भवतु शेषाणां आपतां चीरजी
विनः. प्रेतलोकात्पितृलोकं गच्छ. वैतरणी नद्युत्तरणार्थं गोदानं करिष्ये. यमद्वारे महाघोरे तप्ता वैतरणी नदी. तर्तुकामस्य
यच्छामि सवत्सां गां पयस्विनीं. अत्र पितरो मादयध्वमित्यादि वर्तमान पितृपितामह प्रपितामहा विश्वान्देवांश्च उ
द्दिश्य क्रियमाणेन सपिंडीकरणश्राद्धेन वस्वादिपितृलोकप्राप्तिरस्त्विति ब्रूयात्. स्वर्गपाथेयश्राद्धं. अत्र स्मृतिः
प्रेतलोकात्पितृलोकगम्यतः पितृतुष्टिदः. प्रेतः पितृत्वमापन्ने सपिंडीकरणादनु. तस्मात्तत्स्वर्गपाथेयनाम्नैव त्रि
पूरुषं. हारीतः. सपिंडीकरणादूर्ध्वं पितृलोकं स गच्छति. कुर्यात्तु स्वर्गपाथेय नाम्नैव त्रिपूरुषः. पाथेयश्राद्धं
संकल्पः. पितृपितामह प्रपितामहानां पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां च आमद्रव्येण पार्वणविधानेनसुप्र
दनुस्तथा स्वर्गपाथेयश्राद्धं सद्यः करिष्ये. विश्वेदेवाक्षणत्रिपुरुषोनआद्रव्येण श्राद्धं कुर्यात्. अथोदकुंभश्राद्धं. द्रोन
सपिंडीकरणादर्वाक् यद्यासंवत्सराद्भवेत्. मासिकं चोदकुंभं च श्राद्धं कुर्याद्दिने दिने. पुनःसपिंडीकरणं.
कृतसंस्कारितु. देशांतरस्थो पितरौ मृतौ चेदन्येन कुर्यात्संकल्पचपेतकं. दाहं विना तान्निपुत्रश्च कुर्याज्ज्येष्ठस्तु कु
र्यादनुजैः सपिंडनं. तथा. पुत्रं विना कृतान्येन दाहादिप्रेतकर्मणि. प्रेतकर्म पुनः कुर्यात्पुत्रेण दहनं विना. ए
तद्वचनद्वयं अन्येन कृते सति दशाह मध्ये वेदितव्यं. स्मृत्यंतरे. पित्रोर्मरणकाले तु न चेत्सात्संनिधौ सु

श्रीरामः
५९

तः. अन्यैः कुर्यो दशाहांतं तेन सर्वं कदाचन. प्रालेके. दशाहाभ्यंतरे पित्रोर्मरणं श्रूयते यदि. तत्र वै भवति प्रेतं कार्यं चेत्स तु
कलं यदि. मृतालयं तु पश्चिंगं तत्र न वाक्यति. तत्कुर्यात्सकलं प्रेतं कार्यं दाहं विनैव तु. दशदर्भकृतायां कुशमय्यां तिला
न्तर्लीनः. तस्यामेव दशाहांतं दद्यात्तत्र तिलाजलीन्. पिंडान्पिष्टेन वान्नेन तत्र दद्यात्तथैव हि. नग्नस्यं च न वास्यंच
त्यक्त्वा श्राद्धमुदीरितं. आद्यादि षोडशश्राद्धं सपिंडीकरणं तथा. ज्येष्ठो वाथ कनिष्ठो वा कुर्यादित्याह शाकलः. द
शाहमध्ये एकेन कृते सति देशांतरपुत्रकर्तव्यमाह. दशाहाभ्यंतरे पित्रोर्मरणं श्रूयते यदि. देशांतरस्थितैः पुत्रैः किं त्रोर्म
विभक्तैर्वा दाहक्रिया भवेत्. विभक्तैर्वा कार्या सर्वक्रियाः स्मृतैः. प्रेतशब्देन शिष्टास्तु कर्तव्यं षोडश्यादिकं. त्रिभक्तो जनमा
त्रं तु उभयोरंतरं यदा. कुर्युः पृथक् षोडशास्यात्तन्यथापि ग्रामिनः. देशांतरस्थितज्येष्ठपुत्रेण दशाहानंतरं पि
त्रोर्मरणश्रवणात्. स्मृत्यंतरे. महागुरुनिपाते तु आर्द्रवस्त्रोपवीतिनः. अतीते द्वेपि कर्तव्यं प्रेतकार्यं यथावि य
धि. गृहीत्वा भो च नियमं केशश्मश्रु निकृंतनं. आदशाहात्प्रतिदिनं यथाविध्युदकांजलिः. एकोद्दिष्टं रो
चाप्तिसपिंडीकरणं भवेत्. अत्र स्कृते षन्यतमेन सपिंडीकरणे सति वेदितव्यं. स्मृत्यंतरे. पित्रोर्दाहादिकं
कर्मस्तु तादेशांतरेसुतः. सपिंडीकरणे कुर्यान्न कुर्यात्षोडशं पुनः. एतद्देशांतरस्थितज्येष्ठपुत्रविषयं. देशां
तरस्थित कनिष्ठपुत्रविषये. वसिष्ठः. कनिष्ठस्तु विदेशस्थः श्रुत्वा पितृवियोगं. तिलोदकं दशाहांतं कु

स्मृतिरत्नाक॰ यो श्राद्धं तु पार्वणं॰ तथा॰ अग्रजेन कृतं कर्म नानुजेन पुनः कृतं॰ अनुजेन कृतं यच्च श्राद्धं यः कुर्यात्तदग्रजः अगोत्रैः
६० सगोत्रैर्वा दशाहांतं कृतं यदि॰ षोडशादि सपिंडांतं कुर्यादेवौरसः सुतः॰ अग्रजो वानुजो वापि न च श्राद्धानि षोडश॰
सपिंडः सोदको वापि सर्वैरेव कृतं भवेत्॰ कात्यायनः॰ यः सपिंडीकृतं प्रेतं पृथक्पिंडेन योजयेत्॰ विधिघ्न
स्तेन भवति पितृहा चोपजायते॰ दाहकर्म नवश्राद्धं नग्नप्रच्छादनं तथा॰ पिंडदानं महास्नानं वासोहोमस्तथाग्नि
ला॰ उपतिष्ठेत्सुतो वा दं कृत्वा श्राद्धं विवर्जयेत्॰ शाकलेऽपि॰ श्रूयते मरणं पित्रोर्यदि चेत्कृतकर्मणः॰ आ
शौचमाचरेत्तत्र आदशाहं श्रवणादितः॰ औरसेनैव पुत्रेण कृतं यदि सपिंडनं॰ दूरात्स्नानि धनं पित्रोः श्रु
त्वा केशान्वपेन्नतः॰ तिलोदकांजलीस्तत्र प्रत्यहं दक्षिणामुखः॰ आदशाहं कुर्यात्यथोद्दिष्टं शब्दमेव
हि॰ प्राचीनावीतिना कार्यं गोत्रनामपुरःसरं॰ तिलोदकं सदर्भं तु तस्मै चैव ददत्यसौ॰ ज्येष्ठो वाथ कनि
ष्ठो वा शौचं दशाहमाचरेत्॰ श्राद्धं नाम सपिंडाख्यं कुर्याद्धेकादशेऽहनि॰ नोच्चरेत्सेतरा वं तु नैव स्या
दर्घ्यमीलनं॰ पिंडसंयोजनं नैव कुर्यात्सार्वणवद्भवेत्॰ तथा पितृदक्षोऽपि॰ यवीयसा कृते श्राद्धे प्रेतस्य
द्व विहाय च॰ दयजेन कर्तव्यं सपिंडीकरणं पुनः॰ सपिंडीकरणं नाम श्राद्धं पार्वणवद्भवेत्॰ अर्घ्यसंयो श्रीराम:
जनं नास्ति विप्रौ कामकालौ सोऽपि पितॄणां च त्रयोः पराः॰ मृतस्य पूर्ववत्कुर्यात्स्वधाश्च प्रयोजयेत्॰ प्रेतस्यात्तु ६०
पिंडसंयोजनं नहि

विमुक्तस्य प्रेतत्वं निनेर्दिशेत्॰ पितृशब्देन तत्सर्वं कुर्यादित्याह शाकलः॰ उत्क्रमसापिंड्यं॰ सपिंडीकरणं
यस्य यदि स्यात्पितुरक्रमात्॰ पितामहस्यानि धेर्दूर्ध्वं कुर्यात्सुतः क्रमात्॰ ब्रह्मपुराणे॰ मृते पितरि यस्याथ विद्यते चापि तामहः
तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकं॰ तथा॰ यदि चेन्म्रियते तातो विमाने पितामहे॰ तदा पिंडत्रयं दद्यात्प्रपितामहपूर्वकं॰ विभ
वः पितामहो जीवति चेन्मृतः पिता संयोजनीयं कथमत्र केवी॰ त्रेधा विभज्य प्रपितामहं हुपिंडं परे चैक स्थिति व्यवे स्कं॰ पि
तामह मरणानंतरं पुनः सपिंडीकरणं॰ कश्यपदक्षः॰ पितामहं न जीवंतमतिक्रम्य यदा सुतः॰ अतिक्रम्य हुयो वीपि सापिं
डीकरणं न चेत्॰ शाकलः॰ पितापितामहश्चैव मृतोस्यातामुभौ यदि॰ प्रपितामहजीवं स्यात्कथं संयोजनं तदा॰ पितामहस्य
यन्नाम द्विवारं तत्समुच्चरेत्॰ वारमेकं तृतीयस्य पिंडं श्राद्धपितृव्येवनंत्॰ पितामहात्प्रपितामहो विद्यमाने कथं चन॰ म्रि
यते चेत्पितायस्य जीवत्येव पितामहे॰ प्रपितामहोऽपि चान्यस्य कथं पितृसपिंडनं॰ तदा तृतीयमारभ्य दद्यात्पिंडत्र
यं सुतः॰ तेषामेव तु पिंडानां मध्ये प्रेतं नियोजयेत्॰ तेषां पिंडस्त्रिभिः सार्द्धं भवेद्यस्य सपिंडनं॰ प्रेतत्वान्मुच्यते प्रेतं पितृत्वस
मुपयाति॰ सपिंडीकरणादूर्ध्वं कुर्याच्छ्राद्धं पितुः सुतः॰ त्रिवारं पितृनाम्नैव समुच्चार्य यथाविधि॰ अर्घ्यत्रयं तथा पिंडान्द
दद्यात्पितृनाम्नैव हि॰ एवं श्राद्धं तु कर्तव्यं विधिरेष उदाहृतः॰ पितामहे स्थिते यस्य पिंडौ द्वौ पिंडवाहि॰ पिंडमेकं ततो दद्यो
पितुः पितामहाय च॰ पितामह पितुश्चान्मरणं यदि चेत्कृतः॰ क्रमः प्राप्तं पितुः कुर्यात्सपिंडीकरणं सुतः॰ पिता
महनिर्धं जीयात्पितुर्नीन्निहितीयके॰ अर्घ्येषु पिंडदानेपि विधिरेष उदाहृतः॰ पितामहस्य विधिनादूर्ध्वं कु
र्यात्सुतः क्रमात्॰ क्रमात्त्रतत्वसापिंड्यं प्रत्यब्दिकवदाचरेत्॰ त्रयाणां नामभिः श्राद्धं पित्रादीनां विधानतः॰ पि

स्मृतिरत्नाक० भिन्नाद्यक्रमेणेह नियोज्यास्त्वैर्ये न हि । कृत्वेदं विधिना न्यत्र श्राद्धे सेव नियोजयेत् । यद्यप्येककृते यस्य स
६१ [illegible] संयोजने ध्येर्य पिंडयोः पुनः संयोजने तस्य नैव कुर्यात्कथं च चन ग्रंथांतरे । म्रियते चलितातस्य विद्यमानेपि
तामहे पैतृकादिषु नामानि कथमेवोच्चरेदिति । द्विवारं पितृनामेव पैतृकादिषु वै यदि । यत्र पितामहस्येह नामैक
वारमुच्चरेत् । अनेन विधिना श्राद्धं यावज्जीवपितामहः तद्यत्पिंडद्वयं पित्रे चार्थेकं प्रपितामहे । अथ सहगमनसापिं
ड्यं । शातातपः तद्दिने वा पंधुवी भर्तारमनुगच्छति । भर्त्रा सहैव शुद्धिस्यात् श्राद्धं चैकदिनेऽपयेत् । नवश्राद्धं सपिं
डं च युगपच्च समापयेत् । गालवः एकचित्यां समारूढौ दंपती निधनं गतौ । एकोद्दिष्टं पृथग्दद्यान्न च भर्तुरेकादशेऽह
नि । द्वादशेह्नि संप्राप्ते पिंडमेकं दद्यात् क्षिपेत् । पितामहादिपिंडेषु तं पिंडं योजयेदिति । भर्तृपित्रादिभिः कुर्याद्भर्त्री
पत्न्यास्तथैव हि । सापत्न्यां नाम पत्न्या वा न भेदइति गोभिलः । कृते पित्रादिसापिंड्ये मातुः श्राद्धं पृथक् विधिः ।
अष्टकादौ तथा मातुः पितामह्यादिभिः सह । तथा । कुर्याद्वृत्ती सहैवानुगतायामन्तरेण हि । पिंडसंयोजनं तस्याः पितृपिंडेन
तं त्वनु । एवं सहगमनं स्याद्विधिः संयोजनं स्यात्तु । पितामह्यादिभिः कुर्यात्तथा नैवाष्टकादिकं विधवासापिंड्य ।
अपुत्रा योषितः पिंडं भर्तृपिंडेन योजयेत् । यदि जीवति भर्तारं श्वश्रूं वापि नियोजयेत् । ब्रह्मचारीसा व
पिंड्यं । वसिष्ठः सपिंडीकरणं नैव मृतानां ब्रह्मचारिणां । दाहादिदोषं तांस्तु निवर्त्यैवं च यत्स्मृतिः । एतं
नैष्ठिकब्रह्मचारीविषयं । सपिंडीकरणं कुर्यात्पिता चेद्ब्रह्मचारिणः एकोद्दिष्टश्राद्धकाले एकार्घ्यं चैकपिं श्रीरामः
डकं । सपिंडो देवयुक्तो न त्रयो ब्राह्मणएव वा । नैष्ठिकब्रह्मचारी तु देहं त्यक्त्वा परं व्रजेत् । तस्य श्राद्धं नैव का ६१

र्ये सपिंडीकरणं न च । मासिकानि । सपिंडीकरणादर्वागपकृष्य कृतान्यपि । पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात् । प्रे
तश्राद्धानि सर्वाणि सपिंडीकरणं तथा । अपकृष्यापि कुर्वीत कर्ता नांदीमुखे द्विजः । प्रचेताः । मासिकानि च सर्वाणि यथाकाले स
मावरेत् । अपकृष्यापि वा कुर्याद्वृद्धिश्राद्ध उपस्थिते । त्रैपक्षिकोन षण्मासाऊनाब्दिकं यथाक्रमात् । एतेषामन्यकालेऽनु न पुनः
कुर्वंस्तत्र । वृद्धिश्राद्धविहीनस्तु यः श्राद्धान्यपकर्षति । स श्राद्धे नरके घोरे पितृभिः सह मज्जति । निवर्तितं त्वनुमासिका त
नि समाचरेत् । अयातयाममरणं भवेत्तस्य न संशयः । एकोद्दिष्टविधानेन कुर्यात्कुर्याद्द्वादशषोडश । सपिंडीकरणादूर्ध्वं पूर्वं
यदा कुर्यात्तदा पुनः । कुर्यादूर्ध्वं पार्वणेन विधिना मासिकानि तु । द्वादश प्रतिमास्यानि आद्यं षाण्मासिके ऊनके । त्रैपक्षिको नाब्दि
कं च श्राद्धसंख्यानि षोडश । अनुमासिककालः आद्यमेकादशेऽह्नि स्याद्द्वादशेऽह्नि निर्हि । नो चेन्मासि
---- विषमे न्यूनमाचरेत् । आद्यमेकादशेऽह्नि स्याद्द्वादशे वोनमासिकं । नो चेत्त्रयोदशे कुर्यात्सप्तविंशदिनेपि
वा । त्रिपक्षे द्वादशे पक्षे चतुर्विंशति पक्षके । पक्षे त्रिपक्षिकं कुर्यादंतर्मध्यादिषु क्रमात् । ग्रंथांतरे । ऊनं स्याद्द्वाद
शाहे च त्रिपक्षे काद्शेऽह्नि दिनं । पूर्वाह्ने द्वादशे पक्षे पक्षादौ च तु विंशके । मासिकानि च शेषाणि मासानां प्रथमे दिने ।
नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे । ऊनश्राद्धं प्रकुर्वीत गृही पुत्रधनक्षयात् । आग्नेयार्द्रा च सर्पा च तिस्रः पू
र्वा च निर्ऋती । ऊनादित्रितये कुर्याज्ज्येष्ठपुत्रो विनश्यति । कृत्तिका रोहिणी इंद्री रौद्रा अदितिर्वसुपंचके । नैवैचो
त्तरा त्रीणि विश्वास्वातीमैत्रे च रेवती । न कुर्यान्मासिकं त्रीणि भृगुं गार्गं गुरु बृहस्पतौ । कालादर्शे । त्रयोदशेऽह्नि संप्राप्ते
लि

कारयेदूनमासिकं॰ नष्टोऽप्यतिथिवारर्क्षे लब्धे तिथौ दिनशोधने॰ अपकर्षेणु मासानामेककाले भवेद्यदि॰ एकाग्नौ तु
त्रयः पिंडान्दद्याद्दित्या हं गौतमः॰ पतिमत्यास्त्वपुत्राया विधिवा ब्रह्मचारिणः॰ सपिंडीकरणादूर्ध्वं न कुर्यादिनमासि
कं॰ हस्तेऽकृतं तु नाश्नीयाद्द्विदेमुक्तानुमासिकं॰ अग्नौ प्रक्षेपणं कुर्यात्सपिंडीप्रेतकर्मसु॰ एकोद्दिष्टे सपिंडे च प्रीतिश्राद्धानु
मासिके सपिंडीकरणाश्राद्धे न कुर्यात्तिलतर्पणं॰ सांवत्सरविमोकस्य श्राद्धं न क्रियते यदि॰ सांवत्सरकृते श्राद्धं
तोद्धृतपादेवनव्ययतिः सांवत्सरविमोकस्य न कृत्वा प्रथमाब्दिके॰ यः श्राद्धं कुरुते मोहात्कृतं चेन्निष्फलं भवेत्॰ प्रथ
श्राद्धे माब्दे निषिद्धानि॰ अस्थिक्षेपे गयाश्राद्धं चापरपक्षके॰ अर्वाक्मध्येन कर्तव्यं सपिंडीकरणं विना॰ नित्यश्राद्धं तथाद
र्शश्राद्धं च पितृतर्पणं॰ प्रथमाब्दे प्रकुर्वीत सपिंडीकरणे कृते॰ विभक्तश्राद्धनिर्णयः॰ सपिंडीकरणपर्यंतं वि
क्तोऽपि एकत्र कुर्यात्॰ मरीचिः॰ सर्वैरनुमतं कृत्वा ज्येष्ठेनैव तु यत्कृतं॰ द्रव्येण वाविभक्तेन सर्वैरेव कृतं भवेत्॰
नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश॰ एकेनैव तु कार्याणि संविभक्तधनेष्वपि॰ एकोदरविभक्तानामनुमा
सिककर्मणि॰ महालयेऽमावास्ये प्रत्यब्दं च पृथक्पृथक्॰ पितुः श्राद्धं पृथक्कुर्युर्विभक्ताश्च धनागमः॰ यद्येकत्र प्र
कुर्वीत पतिताः स्युर्न संशयः॰ विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकं॰ एकेनैवाविभक्तेन कृते सर्वैः स्तुकृतं॰
अविभक्ताश्च ते सर्वे पृथक्गृहनिवासिनः॰ पैतृकं कर्म विधिवत्पृथक्कुर्युरतंद्रितः॰ अविभक्तविदेश श्रीरामः
स्थोऽप्यनुमासिककर्मणि॰ महालये ममावास्यां प्रत्यब्दं पृथगाचरेत्॰ यामीतरं ब्रजेपुत्रे ह्यविभक्तासुतायदि॰ ६२

दर्शं च मासिकश्राद्धं कुर्युः पित्रोः पृथक्पृथक्॰ सापत्न्या भ्रातरः कुर्युर्विभक्ताः पृथक्पृथक्॰ अमावास्यादिकं चैव पितुः मृता
ब्दिकं विना॰ अथाशुभकर्मानर्हकालानि॰ मृते ताते जनन्यां च न कुर्याच्छुभकर्माणि॰ कुलधर्मस्तथैव
च॰ जनकश्च जनन्यश्च निधने समुपागते॰ अब्दमेकं न कुर्वीत पाणिग्रह---- लाः मृते पितरि यस्याथ ह्यतायां वापि मातरि
न कुर्याच्छुभकर्माणि वर्षं वर्षार्धमेव च॰ व्रतबंधं विवाहं च न कुर्याद्द्विमान्सुतः॰ वर्षं वर्षार्धकं चैव कृतेऽपि हि सपिंडने॰
संग्रहे॰ मृते जनन्यां जनके वाथ वायां द्वितीयवर्षे प्रकरोति शोभनं॰ करोति मोहात्स करोति हानिं वदंति गर्गात्रिपराश
राद्याः॰ पितुरब्दमर्द्धं च स्यात्षण्मासं मातुरेव हि॰ ज्येष्ठभ्रातुः पितृव्याणां तत्पत्नीनां त्रिमासिकं॰ मासत्रयं च भार्यायास्तदर्धं भ्रा या
तृपुत्रयोः॰ अन्येषां तु सपिंडानां मासार्धं मासमितं॰ न कुर्याच्छुभकर्माणि कृतेऽपि हि सपिंडीनं॰ सपिंडीकरणादूर्ध्वं शु
भकर्म न कारयेत्॰ सपिंडविषये॰ न कुर्यात्कर्म चौलादि विवाहांतं तथैव च॰ व्रतमुद्यापनं कर्म स्वगोत्रे विध्यसंस्कृते॰
तथा॰ प्रेतक्रियाप्यनिर्वृत्ता चेन्नाभ्युदयक्रियाः॰ आसमंततः पुंसी चाष्टमे नैव दोषभाक्॰ दृष्ट्वा हानं तु रंध्रो क्रमा त्
श्रौचं यद्यहि जन्मनां॰ स्वभार्या एव जानीयात्कृतेऽपि हि सपिंडने॰ उक्तकालाविधिर्यावत्तावन्नैव शुभक्रियाः॰ शुभकर्मा
णि कार्याणि निवृत्ते सूतके हितु॰ इत्युक्तं तत्सपिंडानां केचिन्नेच्छंति मानवाः॰ व्याघ्रः॰ प्रेतक्रियामनिर्वृत्य न कुर्याच्छो
भनयोः॰ विधिर्भवेत्सपिंडानां नापरेषामयं विधिः॰ यावदाशौचमारभ्य सपिंडीकरणं भवेत्॰ विवाहादीनि सर्वाणि शु

स्मृतिरत्ना० ६७

भकमाणिवर्जयेत्. मासिका(न्यु)दकुंभानि प्रातीनां चसपिंडनं. प्रातीतपितृमध्यं च कृत्वा तु समुपक्रमेत्. ग्रहणे
सूतकश्राद्धं. ग्रहणेन तु द्वितीये अह्नि रजोदोषात्तु पंचमे. त्रयोदशाहे मरणे जातस्यैकादशेहनि. अस्यार्थः. सूर्ये
ग्रस्तास्ते द्वितीयदिने श्राद्धं कार्यं. तथा. ग्रस्तास्तंगते वा स्नानं सूर्येण प्राप्नुयाद्यदि. प्रत्यब्दं तु तदा कार्यं परेह्न्येव सं
वदा. व्याघ्रपादोपि. ग्रस्तास्तं यदि वै सूर्ये श्राद्धं कुर्यात्परेहनि. तस्मिन्नेव दिने कुर्याद्ग्रस्तास्तं नैव च द्वि. त
था. अस्तं ग्रस्तं रवियाति प्रत्यब्दं स्यात्परेहनि. नयाति यदि वै ग्रस्तास्तस्मिन्नेव दिने भवेत्. ग्रस्तोरविर्यदायुक्तः
प्रागेवास्तमयाद्रवे. प्रत्यब्दं हि दिने तस्मिन्रात्रावपि न दृश्यते. ग्रस्तोदयेस्तु नैवेद्धं दिवा श्राद्धं न कारयेत्. रात्रा
वपि तदा कुर्यात्सत्यं तं पुरब्रवीत्. तथा च. ग्रस्तोदिते यदा चंद्रे प्रत्यब्दं समुपस्थिते. तद्दिनं तु तदा रात्रौ श्राद्धं
कुर्यात्प्रयत्नतः. मनुः. संध्यारात्र्यौ न कर्तव्यं श्राद्धं खलु विचक्षणैः. तयोरपि च कर्तव्यं यदि स्याद्राहुदर्शनं. श्राद्ध
कालेषु सर्वेषु श्राद्धं कुर्याद्दिवैव हि. केचिद्रात्रौ प्रकुर्वंति ग्रहणे चंद्रसूर्ययोः. तथा. विषमे संकटे प्राप्ते ग्रहणे चंद्रसू
र्ययोः. आपत्काले दर्शे इष्ट्या द्रव्यो पिंडं न दोषभाक् ग्रस्ते यहणे श्राद्धं. अथ रजस्वलाविषये. आह्निके समनुप्राप्ते
यस्या भार्या रजस्वला. पंचमेहनि तच्छ्राद्धं न कुर्यात्तथ मेहनि. तद्भर्तुः प्रत्याब्दिके अपुत्रपत्नी स्वयमेव कर्त्री निजस्वला
तद्दिवसे तत्स्वनं. तथा. अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके. रजस्वला भवेत्सा तु कुर्यात्तु पंचमेहनि द्वाति गौतम
स्मरणात्. तथा. भर्तुः श्राद्धं पंचमेह्नि कुर्याद्भार्या न जला. पुत्रस्तु पित्रोः कुर्वीत तद्दिनेन तु पंचमे इति. हेमाद्रौ. श्रीरामः ६७

६८

विद्वान्कोवा विततान्निकोवा रजस्वलायामपि धर्मपत्न्याः. श्राद्धं मृताहे विदधीत पाके रात्मनो हेलातु पंचमेह्नि. तथा
गोभिलः. रजस्वलायां भार्यायां मृताहं यः परित्यजेत्. स नरो रौरवं तसो गर्तेपि तृभिः सह मज्जति. सूतके श्राद्धनिर्णयः. पित्रो
र्मृतयोः कार्य्यं श्राद्धं त्रयोदशाहे स्यात्. अथवायः सपिंडीकरणं कर्तासवापित्र्योर्दशाहे कुर्यात्. तथाह. स्वगृहे
जातके जातमृतकेप्यथवा भवेत्. श्राद्धमेकादशेह्नि स्यात्स्वमाता तस्य पर्वणि. सूतकेप्येकादशाहे सर्वैरेव कार्यः.
तथाहऋष्यशृंगः. आह्निके चैव संप्राप्ते स्वगृहे जातसूतके. दृश्याहेतु व्यतिक्रांते तत्र श्राद्धं विधीयते.
तथा. दैवे पितृणां श्राद्धं तु आशौचं जायते यदा. आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं विधीयते. आशौचांतेऽशनांतरमसंभवेऽमावास्यां कु
र्यात्. तथा गोभिलः. दैवात्प्रत्याब्दिके श्राद्धे तंतरा मृतसूतके. आशौचानंतरं कुर्यात्तन्मासे दृश्यये पुनः. सूतकात्तत्क्षणं समारब्धं
कुर्यात्कृतं स्यात् चैवहि. आसमाप्तेर्न दोषः स्यादन्यकर्म सूतके. पादप्रक्षालनादूर्ध्वं यावद्विप्रविसर्जनं. नवश्राद्धं तु विज्ञे
यं नाशौचं न च सूतकं. तथा. श्राद्धविघ्ने समुत्पन्ने त्वंतरा मृतसूतके. त्रयः संकल्पतादूर्ध्वं श्राद्धं कुर्याद्धि वक्षणः. दर्पक्ष
यं पर्यंतं आशौचं चांतरे यदि. नश्यंजीवतदा विप्रपश्चाच्छ्राद्धं न भुंजते. श्राद्धकर्तृ प्रतिनिधिः. याज्ञवल्क्यः. अमा
वास्यां मासिकं च मृताहव्यतिरेकतः. त्रयः शक्तुं कर्तुमशक्तः प्रत्युत विप्रं च कारयेत्. राजकार्यनियुक्तस्य बंधग्र
हनिवर्तितः. व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत्. क्षयाहमज्ञानेनिर्णयः. यदा मासो न विज्ञातो विज्ञातं दिन
मेव हि. तदाषाढके मासि माघे वा तद्दिनं भवेत्. मृताहे च तिथ्यज्ञाने मासज्ञाने च तत्कुहुः. श्राद्धकालस्तथा दर्शे
द्वादश्यां तु विशेषतः. अथ मलमासे श्राद्धनिर्णयः. कात्यायनः. गर्भे वार्धुषिके दैत्ये प्रेतनित्ये तु मासिके. आ
ह्निके श्राद्धमिति तन्मलमासविधिष्वपि द्यते. तदाह मनुः. मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरं. मलमा
तथा आद्यमधिमासं विवर्जयेत्. आह्निके
६८

स्मृ.नि.स्मा.
६७

सेतु न कार्यं नान्येषां तु कदाचन॥ सत्यव्रतोपि॥ वर्षे वर्षे च यच्छ्राद्धं मातापित्रोर्मृताहनि॥ मलिम्लुचे॥ कुर्यात्तत्र प्रमी
तानामन्येषां तूत्तरत्र तु॥ शुद्धमासि मृतानां विषये॥ सत्यव्रतः॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि॥ मलमा
सेन कर्तव्यं व्याघ्रस्य वचनं यथा॥ मलमासे मृतानां कदाचिच्छ्राद्धं प्रत्याब्दिकं॥ मलमासेपि कार्यं॥ शुद्धमा
से मृतानां च प्रत्याब्दिकं तत्र कार्यं॥ अत एव निश्चयः॥ मलमासे मृतानां तु मृताहे नान्तरे॥ अन्येषा
मुत्तरे कार्यं प्रथमे त्वधिके च रेत्॥ मृतमासो भवेदाद्ये वर्षे चेदधिको यदि॥ कुर्यान्मलिम्लुचे मासि द्वादश्ये
प्रथमाब्दिकं॥ तथा॥ आब्दिकं प्रथमं यच्च मलमासे मृतस्य तु॥ कुर्यात्त्रयोदशे मासि व्याघ्रस्य वचनं
यथा॥ पुंसश्चैवाधिके मासि मृतस्य प्रथमाब्दिकं॥ मध्येधिकेपि दद्यात्स्यात्कुर्यान्मासे त्रयोदशे॥ संग्रहे॥
मलिम्लुचे मासि मृतस्य पुंसां त्रयोदशे तत्प्रथमाब्दिकं स्यात्॥ मध्ये त्रिमासेपि मृतस्य तद्वत्तेधिके
द्वादश मासि एव॥ मासपक्षतिथिस्पष्टे यो यस्मिन्म्रियते यदि॥ प्रत्यब्दं तु यथाकार्यं भूतं मृताहं श्रीराम
तस्य तद्विदुः॥ पाराशरः॥ षष्ठेभिर्दिवसैर्मासैः कथितो बादरायणैः॥ उत्तरे दैवकार्याणि पितृका
र्याणि चोभयोः॥ गौतमोपि॥ द्वौ मासावेकनामानावेकस्मिन्वत्सरे यदि॥ उत्तरे दैवकार्याणि पि ६८

पितृकार्याणि चोभयोः॥ उत्तरमासे देवकार्याणि॥ यत्तु वृद्धवसिष्ठवचनं॥ श्राद्धीयेहनि संप्राप्ते अधिमासि भवेद्यदि॥ मासद्वये
पि कुर्वीत श्राद्धमेवं न दुष्यति॥ तत्रायं प्रत्याब्दिकव्यतिरिक्तमासिकादिश्राद्धविषयं॥ तथा हेमाद्रौ नागरखंडे॥ अब्दमंबुघटं दद्यादन्नं वापि सु
संचितं॥ संवत्सरविवृद्धेपि प्रतिमासं च मासिकं॥ संग्रहेपि॥ योगाधिके मासिकं च दर्शश्राद्धं तथैव च॥ मन्वादिकं तैर्थिकं च कुर्या
न्मासद्वयेपि च॥ युगादिमन्वादिकं च श्राद्धानि पिंडरहितानि॥ मासिकदर्शाष्टकश्राद्धानि पिंडयुक्तानि एतानि मासद्वयेपि क
र्तव्यानि॥ मलमासे तु मासिकश्राद्धानि पिंडहीनकर्तव्यानि॥ तान्यन्वशुद्धमासे पिंडसहैव श्राद्धकर्तव्यानि॥ तदुक्तं पाराशरे
ण॥ नवं थाद्दैवं संकुर्यान्मासयोरुभयोरपि॥ पिंडहीनं मलं कार्यं तौ पिंडसंयुतं॥ सपिंडीकरणादर्वाङ्मासिकविषये॥ आवृत्ति संक्रांतो
र्यान्यमासानो द्वादशाहसपिंडनं॥ न तथा वर्तते दोषं मलेता तृप्तिरिष्यते॥ प्रेतमुद्दिश्य यच्छ्राद्धं षोडशं स्यान्मलिम्लुचे॥ मासद्व
येपि तत्कुर्यात्सपिंडीकरणं ततः॥ जाबालिः॥ एकराशौ स्थिते सूर्ये यदि मासौ द्विधा भवेत्॥ ऊनत्रयं तु पूर्वार्त्तन परात्त
थि तथाचरेत्॥ अथ प्रत्याब्दिकश्राद्धतिथिनिर्णयः॥ संग्रहे॥ सापत्वन्यपरत्रेचेन्मृततिथिः सैवाब्दिके मासिके ग्राह्या
सद्व्यपराह्णयोर्यदि तदा यत्राधिका समता॥ तुल्या चेदुभया परा ह्ण समये पूर्वैव चेत्तद्वयोः पूर्वैव त्रिमुहूर्तगास्त
समये नोचेत्स्यने वोचिताः॥ अस्यार्थः॥ सायंतन्यपरत्र चेदिति॥ अपरेद्युपराह्णे सायंमृततिथिर्यदा चास्ति
चेत्तत्कार्यमित्याह॥ तथाह॥ अपराह्णे तु संपूर्णा सायं पश्च्य यदा तिथिः॥ सैव प्रत्याब्दिके ग्राह्या न पूर्वा पुत्रहानि
दा॥ सा न दा आब्दिके मासिके ग्राह्या॥ तथा च॥ माधवीये॥ कुतपाद्यपराह्णं तु व्याप्तिराब्दिकउत्तमा॥ तदभावे परा
ह्णस्पाद्यास्तिका ग्राह्या सा तिथिः॥ कालनिर्णयेपि॥ यस्यामस्तं रविर्याति पितरस्तामुपासते॥ स पितृभ्यो यतो दत्तो

स्मृतिरत्नाक०
६५

पराह्णस्त्वयं भुवेति । पंचधा विभक्तस्याह्नश्चतुर्थो भागोऽपराह्णः । तदाह व्यासः । मुहूर्तत्रितयं प्रातस्तावानेव च संगवः । मध्याह्न
स्त्रिमुहूर्तं स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्तस्तु पंचधा दिवसः स्मृतः ॥ इति । सा च द्व्यह्नयोरिति । सा तिथिः । उभयत्रापराह्ण परा
व्यापिनी चेत्तत्र यस्यामपराह्णकालोऽधिकोऽस्ति सा ग्राह्या । तथाह मरीचिः । ह्यपराह्णव्यापिनी चेद्दर्शो द्विस्थो यदा तिथिः । प्रक क
र्षिणी तत्र तद्विज्ञा प्रशंसंति महर्षयः ॥ इति । उभयत्रापराह्णेनास्त्येव महत्त्वे निर्णय इति । तुल्यो चेदिति । उभयत्रापराह्णे तिथिः समा
चेत्तदा पूर्वैव । एतन्नि तिथि यविषये । वृद्धौ परा तिथि विधानात् । तथाह बौधायनः । अपराह्णद्वयंव्यापि न्यतीतस्य च या त
तिथिः । क्षये सा पूर्वैव कर्तव्या वृद्धौ कार्या तथोत्तरेति । साम्ये चोर्ध्व तिथि र्ग्राह्या परवृद्धे वर्धिवात् । उभयत्रापराह्णे नास्ति चेत्त
मतः । न यह व्यापिनी चेत्स्यान्मता हेतु यदा तिथिः । पूर्वैव सैव कर्तव्या त्रिमुहूर्ता भवेद्यदि । पूर्वतिथौ त्रिमुहूर्तन्यूना चे
त्तदा परैव कुतपकाल व्यापिनी ग्राह्या । तदाह गोभिलः । त्रिमुहूर्ता भवेद्ग्राह्या परैव कुतपे सहेति । अत्र कुतपश्चब्दे
नाष्टमो मुहूर्तोच्यते । मात्स्ये । अह्नो मुहूर्ता विज्ञेया दश पंच च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः कुत
पः स्मृतः । अथामावास्याद्वैधानिर्णयः संग्रहे दर्शो यत्रापराह्णं स्पृशति स दिवसः श्राद्धकालो द्वयोश्चेद
त्रानल्योऽयदा सोऽयदि भवति समक्षीयमाणे तु पूर्वः । वृध्योः साम्ये तु नग्नेर्युवतिवृषलयोः स्वयमेवाहिता
ग्नेः पूर्वा नक्कापराह्णं स्पृशति कुतप संस्पर्शतोऽयं विधिः स्यात् । अस्यार्थः दर्शो यत्रापराह्णं स्पृशति
दिवसः श्राद्धकालः । शातातपः दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं । अपरोऽपि तृणां च तत् [illegible] श्रीरामू

[illegible]

६५

त्तदानंतप्रश्नस्यांते । अत्रापराह्णे द्विविधो । त्रेधा पंचधा चेति काल निर्णये । दिनमानत्रिभागेन भास्करोदयतः क्रमात् । पूर्वाह्णश्चै
व मध्याह्नस्त्वपराह्णः स्मृतो बुधैः । अत्र भागत्रयपराह्णे आहिताग्नेर्विषये व । तथा । दर्शे प्राक्त्त्रयो भागा आहिताग्नेस्तु सर्वदा । पिं
डान्वाहारकं कुर्यादिस्येव मनुरब्रवीत् । अहरेकत्र श्राद्धे ब्राह्मणभोजन सूपश्चाद्गुच्यते । स्मृतिः । अनाहिताग्ने दर्शे तु पंचभागोऽस्तु
संस्मृतः । द्विजानामेव सर्वेषामिति प्राह मनीषिणः । पंचधापूर्वमुक्तं । दिनद्वयापराह्णयोर्दर्शे निर्णयमाह । काल निर्णये । अ
पराह्णद्वयंव्यापिन्यमावास्या यदा भवेत् । तत्रत्वेव महत्त्वाभ्यां निर्णयः पितृकर्मणि । महत्त्वेन याद्धे त्वभिप्रायः । हारीतोऽपि । अ
पराह्णद्वये चापि यदि स्यात्तत्र साधिका । साग्राह्या यदि तुल्या स्यात् दयवृद्धोपमा स्मृता । दिनद्वयापराह्णयोर्दर्शे साम्य निर्णीह यमा
स्मृतिः । अमावास्या यदा हि स्यादपराह्णद्वयोः समा । क्षये पूर्वा परे वृद्धौ साम्येपि च परा स्मृता । तिथिक्षये सिनीवाली
फि निवृद्धौ कुहूः स्मृता । साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिः । जाबालिः । अपराह्णद्वयंव्यापि यदि दर्शो दिनद्वये । आहिता
ग्नेः सिनीवाली निरग्न्यादेः कुहूः स्मृता । कृष्णाजिनिः । सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि । स्त्रीशूद्रैश्च कुहूः कुर्यात्तथा चान
ग्निकैर्द्विजैः । दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृता । दिनद्वयापराह्णयोर्दर्शाभावे निर्णयः । न कापराह्णं स्पृशति कुतप सं
स्पर्शतोऽयं विधिः स्यादिति । हारीतः । भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा । पित्र्ये कर्मणि विद्धा सा ग्राह्या कुतपका
लिकीति । कुतपलक्षणं पूर्वमुक्तं । काल निर्णये । प्रातः काले तु यः श्राद्धं प्रकुर्वीत तजो तमाः । नैमित्तिकेषु श्राद्धेषु न कालनियमः द्वि
स्मृताः । इत्यामावास्याद्वैधानिर्णयः । अथ पिंडपितृयज्ञप्रयोगः । श्राकलः । कुर्वीत पिंडपितृयज्ञमनाहिताग्निनश्चथा
दर्शे प्रत्याब्दिके वापि प्रायश्चित्तादिकं ततः । कृतीनद्यादिषु स्नात्वा प्रातरौपासनां ततस्तैरं । ब्राह्मणैः सह संकल्प्य उद्दिश्या
नां श्राद्धे प्रायश्चित्तसूक्तादि समस्तसंपत्त्यस्तु रव्य कालमस्त्वित्युक्त्वा पुनः प्राणानायम्य संकल्प । उद्दिश्यमाणाश्चा

स्मृतिरत्नाकर० इत्या
६६

णां गोत्राणां रूपाणां पूर्वोन्नेद्रव संज्ञकानां विश्वेषां देवानां च अन्नेन हविषा पिंड पितृयज्ञव्यतिषंग पार्वण विधानेन युक्तं
षा दर्शेष्टिरूप्य श्राद्धं सद्यः करिष्ये · ततः उपवीति पूर्ववत्सुखं गोमयेन चतुरस्रमंडलं कुर्यात् · औपासनाग्निं तूष्णीं प्रतिष्ठाप्य
पितृतीर्थेन परिसमूहनं · आग्नेयां दिश्यमारभ्याग्नेय · श्रवणं · अथवा पश्चाद्दिश्यमारभ्याग्नियां तं पात्रासादनं कुर्यात् · त
दनुक्रमः चरुस्थाली १ शूर्प · स्रुक् ३ उलूखल ४ मुसल ५ स्रुवा ६ स्रुक् ७ कृष्णाजिन ८ सकृदाच्छिन्न ९ इध्म १० मे
क्षण ११ कमंडलु · १२ एतान्येकैकमुत्तानं पात्राण्यासादयेत् · अथाग्नेः परिस्तरणाद्दक्षिणतो व्रीहिभिः पूरितं शकटं द
क्षिणतः आरुह्यामथ्य वाग्निष्ठादर्कं यदि न घटते तदाग्निष्ठो चानोनुसानेन तंडुलैर्वा कार्यं तत्र शूर्पस्थालीन्व्रीहीन्नर्ते पंचा
निर्मृज्य शूर्पस्थालीन्व्रीहिः शकटे निधाय प्राचीनावीं धर्वलोमं कृष्णाजिने उलूखलन्निधाय तत्र छोल्यागती व्रीहितंडुलैर्वा प
लीहस्तेन मुसलेन इषजाउ पित्वा आसादितशूर्पेणां तंडुलैर्वा तु पाठीन्न संशोध्य सकृत्प्रक्षाल्यौपासनाग्नेः पचेत् · अ
प्रणीतार्थमौपासनाग्नेरेकोल्मुकमादायैरूपाणीतिमंत्रेणाग्नेराग्नेयां दिशि प्रतिष्ठाप्य · अतिप्रणीताग्नेः प्रज्वा
ल्यौपासनाग्निवत्परिसमूहनादि कृत्वा · ततः प्रणीताग्नेर्नैर्ऋत्यां श्रित पश्चिमदेशे अपहता असुरा रक्षांसि अति
वेदिषद इति मंत्रेण रेखा सुष्ठुरेखा ते · तोल्लेखामभ्युक्ष्य सकृदाच्छिन्नैर्दर्भैरनवस्तीर्य अग्नेः परिस्तरणं दक्षिणभागे ध्रुवाय माज्यनवनीतं
वानिक्षिपेत् · स्रुवमेक्षणसंमार्जनं कृत्वा · ततः पक्वचरुं स्रुवेणाभिघार्योदगुद्वास्याग्नेः पश्चिम आसादयेत् · ततः अग्नेः परिस्त
रणा धृत्वा याद्दक्षिणभागे अंजनार्थं अंजनं · अभ्यंजनार्थं तिलतैलमाज्यं वा · कशिपोपबर्हणं बीजरहितं कार्पासेन कृत्वा · एतानि
चतुर्द्रव्याणि आग्नेयपत्रव्याणि क्रमादासाद्य · प्राचीनावीती भूत्वा · इध्ममभिघार्य तूष्णीमग्नौ निक्षिपेत् · ततः उपवीति तीर्थेन नि
क्रम्य दिशाचम्य दैवार्थं पित्र्यर्थं विनियुक्तब्राह्मणांक्षणं दत्वा · पादप्रक्षालनाद्याच्छादनांतं समभ्यर्च्य तेषां करस्थध्यंतं कृ श्रीराम ६६

त्वा · ततः एकस्मिन्पात्रे घृताक्तं चरुमादाय प्राचीनावीती भूत्वा तानुनुत्ता पृच्छेत् · अग्नौ करिष्ये · इति ब्राह्मणैरनुज्ञातो ब्राह्मणक्षिप्ततामिति प्रत्यनुज्ञा
द्युः · ततः औपासनाग्निमिंधं ज्वाल्यावदानधर्मेण चरुं जुहुयात् · अथावदानलक्षणं · दक्षिणकरस्थस्रुवेण वामकरस्थमेक्षण
ममभिघार्य अनुधृत चरुमध्यतः तर्जनीमध्यमांगुष्ठपर्वमात्रं प्रगृह्य मेक्षणे निधाय पुनरपि पूर्ववदानं तथैव गृहीत्वा मेक्षणे दद्यात् · यदि पंचा
वत्ती चेत् पश्चार्धादपि तथैव गृहीत्वा मेक्षणेन निदध्यात् · ततः शेषमभिघार्य मेक्षणस्थमभिघार्य प्राचीनापाणिना जुहुयात् · पराचीनापाणि
लक्षणं · वामजंघानु नानंकृत्वा जानुभूम्यां निधाय दक्षिणजानु भूर्ध्वमुखं कृत्वा प्राचीनावीतित्वा तर्जन्यंगुष्ठयोर्मध्येन पितृतीर्थेन यदा क
र्म कुर्यात् तदा पराचीनपाणिर्भवति · पराचीनपाणिना · ओं सोमाय पितृमते स्वधा नम इति मंत्रेणाहुतिं जुहुयात् · सोमाय पितृमत
इदं न मम · पूर्ववद्द्वितीयाहुतिं गृहीत्वा · ओं अग्नये कव्यवाहनाय स्वधा नम इति मंत्रेण जुहुयात् · त्यागः · ततो मेक्षणं प्रक्षाल्याग्नौ
नु तं निदध्यात् · ततः स्वतीर्थेन निष्क्रम्योपवीती परिवेषणाद्यूर्ध्वं कृत शेषं पितृपात्रे पुष्पप्राचीनावीती निक्षिपेत् · ततः त्यक्त्वा ब्राह्मणपिं
भोजनमध्ये राक्षोघ्नानि सूक्तानि श्रावयेत् · भोजनोत्तरं दृष्टिपिंडं दत्वाचम्य प्राणानायम्य संकल्प · पिंडपितृयज्ञ श्राद्धे तदंग पिंडप्रदानं क
रिष्ये · पिंडप्रदानकाले पुरुषं धं तामिश्रोत्यादि तिलोदकं त्रिर्निषिंच्य पिंडप्रदानं कुर्यात् · आस्नादितात्रिदर्भेण गृहीत्वा स्थंद्वेति मंत्रेण प्रति
पिंडं निमृजेत् · आसादितांजनं गृहीत्वांक्ष्वेति पिंडेषु निमृज्य कशिपु बर्हणो च पिंडसमीपे निधाय तद्द्वः पितर इत्यादि समापयेत् · हस्तादक्षा
दिश्राद्धेत्थिषं समाप्य चरुस्थाल्यां द्यु · दृष्टपात्राणि कृताभ्यां द्वं द्वं विसृज्य कमंडलुतर्पणेन सह विसृजेत् · अति प्रणीताग्निं संयोज्याग्निपाद पश्चि अ
न्नादि जुहुयात् · परिसमोहनादिकं कृत्वादि · औपासनाग्नौ समिद्ध्मारोपणं · एतच्छेषसंस्कारापिताग्नेश्च न प्रतापनं · इति पिंडपितृयज्ञः
समासः · अथामश्राद्धं · अपत्नीकः प्रवासी च यस्य भार्या रजस्वला · आमश्राद्धं द्विजः कुर्यात् शूद्रः कुर्यात्सदैव हि · मरीचीनां विशेषः मा

मा का नि सपिंडानि अमावास्यां तथा ह्निकं । अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वला ॥ आमं तु द्विगुणं प्रोक्तं हिरण्यं तु चतुर्गुणं ॥ आमश्रा
द्धं यदा कुर्यात्पिंडदानं कथं भवेत् ॥ गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ॥ हेमश्राद्धं ॥ स्मृत्यंतरे ॥ चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि ॥ हेमश्राद्धं वितन्वी
न वदैभक्ष्यकारकं ॥ आवाहनाग्नौकरणं विकिरं पात्रपूरणं ॥ तिलप्रक्षेपकं कुर्यात् आमे हेम्नि कदाचन ॥ श्राद्धमहिमा ॥ आकाशे तारका गण्यतृणगण्ये
महीतले ॥ श्राद्धकाले तु दानस्य फलं वक्तुं न शक्यते ॥ अथ श्राद्धाधिकारः ॥ पुत्रः पौत्रः प्रपौत्रो वा पुत्रिकापुत्र एव च ॥ भार्या भगिन्यस्तु स्नुषा अ
धीते श्राद्धकर्मणि ॥ अथ श्राद्धापयोगी वचनानि संदर्भाल्लिख्यन्ते ॥ भ्रातृभ्यो न कर्तव्यं न कर्तव्यं पितास्वसुः ॥ अमग्निकं न कर्तव्यं न कुर्याद्गर्भिणी
पतिः ॥ स्वगोत्रे भोजयेच्छ्राद्धे स्वगोत्रे पर कर्मणि ॥ दानं दद्यात्स्वगोत्रेभ्यः कन्यादानं तु वर्जयेत् ॥ द्वौ दैवे पितृकार्ये त्रीन् एकैकमुभयत्र वा ॥ भोजयेत्सुसमृ
द्धोपि न प्रसज्येत विस्तरे ॥ सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसंपदं ॥ पंचैतान् विस्तरो हंति तस्मान्नेहेत विस्तरं ॥ आमंत्रणं गते विप्रे निवाच्य ति
तः ॥ ब्रह्महत्याम वा प्नोति शूद्रयोनिषु जायते ॥ आमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति ॥ नरकाणां शतं गत्वा चांडाले घ्वभिजायते ॥ दंतधा
वनतांबूलं क्षौराभ्यंगमभोजनं ॥ रत्यौषधिपरान्नं च श्राद्धकृत्सप्त वर्जयेत् ॥ पुनर्भोजनमध्वानं मैथुनं ॥ दानं प्रतिग्रहो होमः श्राद्धभुक्त्वष्ट वर्जये भारवाहनान्
मो त् ॥ अज्ञानाद्वा प्रमादाद्वा दोरव्याद्धोराषतो द्विजः ॥ यो मर्त्याहमतिक्रम्य यांजलाः कोटिजन्मसु ॥ स्वागते स्वस्तिवचने गौर्विशेषप्रदक्षिणे ॥ अर्घ्ये चद
क्षिणे चैव पर्दसु सव्यं विधीयते ॥ विसर्गे चोल्मुके चैव विकिरे पिंडवारणे ॥ करस्थ द्विरपाश्चापि पितृपूर्वाणि षट् सदा ॥ कूर्चं तु त्रिविधं प्रोक्तं उत्तमं मध्यमाधमं ॥ नव
निः सप्तभिर्दर्भैः पंचभिर्दर्भसंयुतैः ॥ दर्भपंचाह्निके सप्त महालये नैत्तथा ॥ श्राद्धे विवाहे पत्तिषु द्विदीक्षा यामार्गे गुरौ ॥ तिष्ठतः क्षालनं कुर्यान्निराश्याः पि
ले तिागताः ॥ श्रौ प्रक्षालये त्पादौ आर्जवे दैविकेपि च ॥ निमंत्रिता नां विप्राणां आगत्यैव प्रेतकर्मणि ॥ नग्नश्राद्धेन च श्राद्धे सपिंडी प्रेतकर्मसु ॥
तिष्ठतः क्षालयेत्पादौ अन्यत्रोपविश्य तु ॥ मंडलान् पूर्वतो दैवे पितृविप्रास्तथोत्तरे ॥ कृतोकुर्वीत देश्यान्ये कुर्यादाचमनं क्रमात् ॥ कर्त्तुराचमनं न ह् म
वेत् श्राद्धाचमने द्विजः ॥ विपरीतो भवेद्यत्र श्राद्धं तत्र समं भवेत् ॥ यत्पर्णे भोजयेच्छ्राद्धे तत्पर्णे त्वर्घ्यपात्रकं ॥ पद्मिं वा भिन्न पात्रेषु निराः पितरा गा श्रीराम॰
गताः ॥ द्वाभ्यामेव तु पर्णाभ्यां अर्घ्यपात्राणि पैतृके ॥ सपिंडीकरणे प्रेते कार्यैकं न चैव हि ॥ कदली मधुपर्णे च कुटिजा ब्रह्मपर्णकं ॥ पालाशं ६७
पा

अधोगत्वाथ पोरसतिर्यग्यो निषु जायते ॥ अपेक्षितं याचितव्यं श्राद्धार्थमुपकल्पितं ॥ ५

मध्यपर्णे च पित्रूणां दत्तमक्षयं ॥ पाणिहोमः ॥ जमदग्निः ॥ यात्सौवैग्निकसंयुक्तं विनाग्निमथवापि वा ॥ ताव च्छ्राद्धं प्रकुर्वीत हस्ते ऽग्नौ कर
णं भवेत् ॥ विप्राय पंक्तिसु दत्ता तस्य पाणावनग्निमान् ॥ हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् ॥ हस्ते दत्तं तु नाश्नीयाद्दत्वा तु क्षीणमा
सिकं ॥ अग्नौ प्रक्षेपणं कुर्यात्सपिंडी प्रेतकर्मसु ॥ आग्नौकरणहोमं तु प्रमादादकृतं यदि ॥ पुनः पक्वान्नमादाय कुर्याद्विप्रादनुज्ञया ॥
श्राद्धे पंक्तिषु भुंजीनो ब्राह्मणो ब्राह्मणं स्पृशेत् ॥ तदन्नमत्यजन् भुक्ता गायत्र्यष्टशतं जपेत् ॥ मत्स्यपुराणे ॥ उच्छिष्टलेपनस्पृष्टे
प्रक्षाल्यान्येन वारिणा ॥ भोजनांतरे स्नात्वा गायत्रीं त्रिशतं जपेत् ॥ अपेक्षितं योन दद्याच्छ्राद्धार्थमुपकल्पितं ॥ न याचति द्विजो
मूढः स विप्रः श्राद्धघातकः ॥ वमनविषये ॥ सुरज्यस्थानस्थितो विप्रो भुंजानो वमते यदि ॥ तद्दिनं चोपवासं च पुनः श्राद्धं च
रेहनि ॥ अकृते पिंडदाने तु पितृणां च द्वमते यदि ॥ तद्दिनं चोपवासं च पुनः श्राद्धं परेहनि ॥ पुत्रवाद्भवश्रेव हितीय स्थानेनैव ॥
तद्दानस्य तृतीयस्य कदाचिद्वमनं यदि ॥ तत्स्थानं नाममंत्रेण आसनादि यथा चरेत् ॥ लौकिकाग्निं प्रतिष्ठाप्य होमं कुर्याद्यथावि
धिः ॥ प्राणादि पंचकैश्चैव हुत्वा मंत्रैः पृथक् पृथक् ॥ द्वात्रिंशद्धुतीः कृत्वा श्राद्धशेषं समापयेत् ॥ षोडश्याद्यस्थितो विप्रो भुंजा
नो वमते यदि ॥ उभौ स्वाह वर्ज्यैव आमश्राद्धं विधीयते ॥ पूर्वमन्नं समादाय पिंडे पोडश मे वहि ॥ सपिंडीकरणश्राद्धे प्रेतश्रे
द्वमते यदि ॥ सपिंडीकरणं कुर्यात्पुनः पाकेन तत्क्षणात् ॥ प्रेतस्थाने सपिंडेतु ब्राह्मणो वमते यदि ॥ पाकं कृत्वा पुनः श्राद्धं
अकृते पिंडयाजने ॥ मार्जारभक्षिते पिंडे कव्ये यो यदि गते सति ॥ पितां च द्वमते यत्र पुनः श्राद्धं परेहनि ॥

श्राद्धे तर्पणनिषेधः॥ हारीतः॥ सर्वदा तर्पणं कुर्यात् ब्रह्मयज्ञपुरःसरं॥ श्राद्धाहे नैव कुर्वीत यदि कुर्यान्निरर्थकं॥ श्रा
द्धांगतर्पणं॥ हारीतः॥ ततः परेह्नि कुर्वीत तर्पणं श्राद्धकृन्नरः॥ तत्र केचित् दर्भैस्तु पश्चात्संध्यादिकाः क्रियाः॥ श्राद्धं कृत्वा तु पूर्वेद्युः
प्रातःस्नानं परेहनि॥ तिलैः पितॄंस्तर्पयित्वा पश्चान्नित्यं समाचरेत्॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन्॥ अतः सा पितरस्तस्य
आपं दत्वा व्रजंति ते॥ जीवमाने पिता पश्चा माता यदि विपद्यते॥ मातुः श्राद्धं सुतः कुर्यान्न कुर्यात्तिलतर्पणं॥ अथ श्राद्धे भोजनप्रायश्चित्तं॥
भुक्त्वा तु पार्वणश्राद्धे प्राणायाम षडाचरेत्॥ दशकृत्वा पिबेदापो गायत्र्या श्राद्धभुक् द्विजः॥ आपो हि ष्ठा जपेत्सूक्तं श्राद्धे भुक्ते
६ तु षोडशे॥ यत्स्याद्विमुच्यते पापात्त्रिंशद्द्वारं जलं पिबेत्॥ विप्रा द्व्यापेक्ष्यं सपिंडीभोजने कृते॥ ततः पापात्प्रमुच्येत त्रिंशद्द्वारं जपे
द्यदि॥ पितामहश्राद्धं॥ पितामहे पितुः पश्चात्संचत्वं यदि गच्छति॥ पौत्रेणैकादश्याहादि कर्तव्यं श्राद्धषोडशं॥ तथा पौत्रेण पर्काले
र्ये पुत्रवच्च पितामहः॥ पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकं॥ धर्मप्रवृत्तौ॥ पितामहस्य श्राद्धं षोडशादि सपिंडनं॥
अपुत्रस्य कर्तव्यं पौत्रेण प्रथमाब्दिकं॥ पृथक् कृत्वा द्विकं तस्य वर्षे वर्षे प्रणतद्वये तु॥ पित्रा सहैव कर्तव्याः पितुः संवत्सरादि॥
कर्तव्यानष्टविषये॥ वृद्धशौनकः॥ यः करोति विना पुत्रं श्राद्धं चैव मृतस्य तु॥ मृतश्चेद्यदि कर्ता स्यात्श्राद्धं ह्ये
याम वेद्यदि॥ पित्रोः श्राद्धं विना मातुः सपत्न्या अपि कुर्यात्॥ तन्न कर्तव्यमन्येन नष्टे कर्तरि चेद्यदि॥ पित्रोः श्राद्धं विना ज्येष्ठो
न कुर्याच्छ्राद्धमेव हि॥ कृते मृते ज्येष्ठस्यात्दनुजैः कार्यमेव हि॥ अथापरपक्षे॥ आषाढ्यामन्नविकैर्यस्मा श्रीराम॥
त्पक्षस्तु पंचमः॥ ततः श्राद्धं प्रकुर्वीत कन्यागते तु भास्करे॥ मनुः॥ नभस्यापरपक्षे तु पत्र कन्या न चित्रजेत॥ स ६८

महालयसंज्ञं स्याद्गजच्छायाद्वयं तथा॥ प्राशनेनौपमः भवोपितृं श्राद्धो महालये॥ विजे पिता मातुष्ये श्रन्यं कृत्वास्व
यंपुरं॥ छ धार्थी कीर्तयंतश्च दुग्धं चस्वयं लतं॥ कांक्षितः पुत्रपौत्रेभ्यः पायसं मधुसंयुतं॥ तस्मात्तास्तत्र विधिना तर्पयेत्पायसेन तु॥
आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवं॥
आषाढ्याः पंचमे पक्षे यः श्राद्धं न करिष्यति॥ शोकेनापि दरिद्रो भिसोऽत्यजत्यमुपेष्यति॥ न कोति यदा भूर्वः पितृणां या महाल
ये॥ वृश्चिके दर्शनं यांति निराशाः पितरो गताः॥ अपुत्रायां पत्न्यां श्वेव लोके भवति निंदितः॥ दिने दिने गयाश्राद्धं भवेत्याग य
पंचके॥ दशतुल्यं व्यतीपाते पक्षमध्ये च विंशतिः॥ द्वादश्यां तु शतं चैव अमायां तु सहस्रकं॥ आश्विने कृष्णद्वितीयायां पि
तृणां दत्तमक्षयं॥ प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा॥ यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति॥ अथ कः पक्ष
मध्ये तु कनौत्यकदिने यदि॥ निषिद्धेपि दिने कुर्यात्पिंडदानं मृतेहनि॥ मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह॥ अहे २
त्वान्यत्र नाक्षीया श्राद्धं चापरपक्षकं॥ सपित्रादेः पुनः कुर्वन्सवर्णानामुपासकं॥ सतिले सूर्पयेद्भि पितुः श्राद्धं समाहितः॥
तेनैव सर्वमाप्नोति पितृयज्ञक्रियाः फलं॥ तीर्थश्राद्धे गयाश्राद्धे चापरपक्षके॥ एकस्मिन्भोजयेद्विप्रे अर्घ्यान्पिंडान्पृथ आद्ये
क्पृथक्॥ अन्नाभावे हि जाभावे श्राद्धे चापरपक्षके॥ एकस्मै दीयते चान्नं अर्घ्यान्पिंडान्पृथक् पृथक्॥ अयनव
मी॥ नागिलः॥ जीवमाने पिता यस्य माता चेन्म्रियते यदि॥ पितृपक्षे नवम्यां तु मातुः श्राद्धं विधीयते॥ कुर्यात्पिंडवि
धानेन पितुर्यपि च जीवति॥ तथा॥ महालयनवम्यां तु श्राद्धं मातुर्मृते यदि॥ कुर्यात्पिंडविधानेन अन्यश्राद्धं विवर्जये

स्मृतिरत्ना० ६९ तू· मातामंगळसूत्रेण मनाहे पुत्रतद्दिने· पिंडदर्शस्य सांनिध्ये सुवासिन्यै प्रदापयेत्· सुवासिनिथक्षपाहादौ ब्राह्मणान्भो
जयेत्ततः· श्रीश्च संभोजयेत्तस्मान्मंगलार्थं समंत्रकं· अथ त्रयोदशीश्राद्धं· कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते न
नः· पंचत्वं यस्य हानिः स्याज्ज्येष्ठपुत्रस्य निश्चयः· त्रयोदशीश्राद्धं निषेधवचनानि· तथाह कृष्णाजिनः· श्राद्धं नैवे
कवर्गस्य त्रयोदश्यामुपक्रमेत्· भरत सात्त्रयेवासुः प्रजाहिंसं निर्तत्रयजं· इत्युक्ते त्रयोदशीश्राद्धं पुत्रवान्सन्नतापुषः· एके
...तायां स्यैव तु नोदद्यान्मातामह सहैव तु· प्रोष्ठपद्यामतीमघायुक्तां त्रयोदशी· प्राप्य श्राद्धं तु कर्तव्यं मधुनापायसेन च· ज्ञातीनां
च भवेद्वृद्धि कुर्वन्श्राद्धं त्रयोदशी· मार्कंडेयः· अथ चतुर्दशीश्राद्धं· याज्ञवल्क्यः· प्रतिपत्प्रभृतिष्वेकां वर्जयि
त्वा चतुर्दशी· शस्त्रेण तु हता यैवै तेभ्यस्तत्र प्रदीयते· गर्गः· चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परं· एकोद्दिष्टविधानेन तत्कार्यं श
स्त्रघातिने· एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये· जलशस्त्राग्निकृष्णानां शृंगिणां च मृते यदि· एकोद्दिष्टं दैवयुक्तं इत्येवम
नुब्रवीत्· मरीचिः· विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनः· चतुर्दश्यां क्रियाः कार्याः अन्येषां तु विगर्हितं· तेषां प्र
त्याब्दिकं श्राद्धं स्मृत्युक्तं पार्वणं तथा· प्रेतपक्षे चतुर्दश्यां एकोद्दिष्टं सदैविकं इति नोस्मरणात्· अथ दौहित्रश्राद्धं· प्रतिप सिद्ध
द्याश्विने शुक्ले वर्तमानेपि मातुके· कुर्यान्मातामहश्राद्धं पितर्यपि च जीवति· पिंडनिषेधकाः· स्नानं सचैलं तिलमि
श्रकर्म प्रेतानुयानं करकप्रदानं· पिंडस्य निर्वापणमत्र पानं विवर्जयेन्मंगलतोर्ध्ववर्षात्· स्मृत्यंतरे· विवाहा
द् दूर्ध्वं मखे तु तदर्धं मौंजिबंधनं· नदद्युः करकान्पिंडान्तिलैरर्चयेत्सितान्· ज्योतिःपाराशरः· विवाहमौंजि श्रीरामः ६९
बंधे च वर्षं वर्षार्धमेव वा· पिंडान्सपिंडान्नोदद्युः सपिंडीकरणादृते· मातापितृणामब्दे तु विवाहादिषु सर्वदा· तिलपिंडस्तु दा

तव्या अन्यश्राद्धे तु वर्जयेत्· महालये गयाश्राद्धे मातापित्रोर्मृतेहनि· कृतोद्वाहोपि कुर्वीत पिंडनिर्वापणं सुतः· पित्रोर्नेव मृ
ताहे तु गयायां च महालये· पिंडनिर्वापणं कुर्यात्कृतोद्वाहोपि यः सुतः· पार्वणं तु परित्यज्य संकल्पं कुरुते द्विजः· संततिस्तु विनाशाय
संपदो हरणाय च पितृव्यभ्रातृपत्नीनां कारुण्यश्राद्धकर्मणि। संकल्पविधिना श्राद्धं कुर्यान्नांदीकृतात्परं स्मृत्यंतरे कृतो
द्वाहोपि यः कुर्यात्पार्वणं पितृपक्षके आवत्सरात्पितृ पिंडो दत्तपिंडात्ययेपि सते। अथ ग्रहणवत्सा मन्वादौ च युगादौ च
अमासंक्रांतिवैधृतौ पक्षायुक्ते श्राद्धपाते ग्रहणवत्साभिधीयते नित्येचैव तथा दर्शे षड्वत्सं समाचरेत् महालये ग
याश्राद्धे हत्यौ तु नवदैवते दर्शे संक्रांति मन्वादौ युगादौ पाते वैधृतौ संक्रांतौ पुच सर्वेषु श्राद्धे पिंडान्विना भवेत् अथ नि
त्यनैमित्तिकनिर्णयः नित्यनैमित्तिके प्राप्ते नित्यकर्म परित्यजेत् नैमित्तिकं तु कर्तव्यं पश्चान्नित्यं समाचरेत्
श्राद्धं कृत्वा पुनः श्राद्धं न कुर्यादेकवासरे नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् दर्शे क्षयाहे प्राप्ते तत्र श्रा
द्धं कथं भवेत् क्षयाहिकं तु निर्वृत्य दर्शे पश्चात्प्रवर्तयेत् श्राद्धे सपिंडके प्राप्ते पिंडहीनं तु वै यदि श्राद्धं कृत्वा सपिं
डं तु पिंडहीनमथाचरेत् स्मृत्यंतरे काम्यतंत्रेण नित्यस्य तंत्रश्राद्धस्य सिध्यति प्रत्याब्दिके यदा श्राद्धं युगमन्वं
तरादिकं प्राप्ते चेत्तत्र कुर्वन्न नैव दर्शे युगादिकं श्राद्धेनैव कृतेमोहात् कुर्वीत दैवत्यकेन च सिध्येःस्याद्दैवत्यश्राद्ध
स्य च विनाब्दिकं अथ सहगमनश्राद्धं एकचित्यं समारूढौ दंपती निधनं गतौ तयोः श्राद्धं पृथक्कुर्यादोदनं चै
कपेवहि मातापित्रोर्मृताह्ने संस्कृपाक यत्नतः प्रथमे पितृकार्यापि द्वितीयं मातुरुच्यते अग्नौकरणमेकं च पार्वणं
च पृथक् पृथक् मातापित्रोर्मृताहे च काले नाभिभवेद्यदि वैश्वदेवादिकं तंत्रं स्यात् पृथक्पाको विधीयते अथ जीवत्पित

कस्यश्राद्धनिर्णयः उद्वाहे पुत्रजनने पुत्रेष्टे सोमके मखे तीर्थब्राह्मणआयाते षडेते जीवितापितुः जीवत्पितृकस्य निषेधः पादुकारोहणं चैव यो गायद्दृष्टं तथैव च न जीवत्पितृकः कुर्यात्तर्जन्यां रौप्यधारणं तातस्य भ्रातरि ज्येष्ठ यस्य चैव तु जीवति न तस्य मौनं तर्जन्यां जडनस्यैव धारणं यदापिता तिहृत्स्यश्चेत्कार्थं तस्याप्यनुज्ञया इष्टौ पितरि सन्न्यस्ते तातेच पतिते सति येष्याएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः पाराशरः विद्यमाने पितितरि श्राद्धं कर्तुमुपस्थितः पित्ऱ्वसित्पित्रादेः कुर्याच्छ्राद्धं न संशयः पिंडप्रमाणं भगवान् यत्रास्तु बहवः पिंडास्तत्र बिल्वफलोपमाः यत्रैकोभवेत्पिंडः तत्राश्वखुरसंनिभः सर्वत्रासुरदाहिस्युः वर्तुलाश्राद्धेकर्मसु नारिकेलप्रमाणं तु प्रत्यब्दे मासिके तथा महालये गयाश्राद्धेकुर्यादामलकोपमं मरीचिः सर्वमन्नं समादाय सलिलं दक्षिणामुखः उच्छिष्टसन्निधौ पिंडं दद्याद्वै पितृयज्ञवत् अथयतीसंस्कारः पुलस्त्यः कुटीचको बहूदश्च हंसः परमहंसकः चतुर्विधानां भिक्षूणामेकदंडी त्रिदंडिनां पैठीनसिः कुटीचकं च प्रदहेत् पूरयेच्च बहूदकं हंसं जले विनिक्षिप्य परमहंसं विकिरयेत् षोडशानि नवान्यानि सपिंडीकरणं न च नवान्यानि न श्राद्धानि कुटीचको बहूदश्च हंसः परमहंसकः सपिंडीकरणं तेषां न कर्तव्यं सुतेन तत् सतकं नास्तिसंस्कारो न श्राद्धं तिलोदकं एकोद्दिष्टं षोडशाख्यं सपिंडं नास्तिभिक्षुके यत्तयः पितृवर्गाश्चेते पांडशादिकं नहि दर्शादिमातृवर्गाणां कर्तव्यं गौतमोक्तितः कुटीचकोयथोक्तस्या सावर्णं तु बहूदके हंसे नारायणबलिं परमहंसेनकिंचन यमः सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च न तस्यदहनं कार्यं नाशौचं नोदकं क्रियाः खनित्वा तु भुवो भूमो शिरोमात्रं भुवादिभिः निक्षिप्यस्नानमात्रेण शुध्यः स्वायंभुवोब्रवीत् बौधायनः यतीनां प्रेतसंस्कारं विधिं वक्ष्याम्य

शेषतः स्नात्वागृहस्थ भुज्यात्स्नायतिसंस्कारमाचरेत् पुंसूक्तेन चगायत्र्यादेहसंस्नापयेद्यते शिक्यशरीरमारोप्य गंधमाल्यैरलंकृतः घोषयंजयशब्देन दुंदुभीनां रवैस्तवैः ग्रामात्प्राचीमुदीचीं वा गच्छ गच्छान्यतादिशं नदीतीरेश्वत्थमूले गोष्ठे देवालयेपि वा अघशब्द घोषयं जयशब्देन शुद्धंस्थाने मवान्यात्तस्मिंस्तथा याम्याग्रां न र्भानास्ती लक्षस्य निखनेन्नात्स्तीजपेत् दंड्यामप्रमाणेन कुंडं गव्यैस्तु पंचभिः पंचामृतैर्गां संप्रोक्ष्य सम्यक्चात्तिभिस्तथा याम्याग्रां दर्भानास्तीर्य देहं संस्थापयेद्यते शरीरं पुरुषसूक्तेन स्नापयेत्कृत्यविन्नमः गंधमाल्यादिभिरितिस्मरेत् जपेद्धृदयदेशे तु मनुं हंसमिति प्रभो हंसः शुचिषदिति च साक्षाद्ध्यान्योभवेदिति भिद्यते हृदयग्रंथिरिति मनुः पुंसूक्तं तु भ्रुवोर्मध्ये पुरुषं संस्मरं जपेत् मंत्रेण मूर्ध्निभिद्येत मूर्ध्नि विमगादिति भस्मास्य पुत्रैः पशुभियोनो द्विषिम मभिघाता इत्यनेन मंत्रेण मूर्ध्नीनं मभिघात्वणवेनेवै लवणेनाकृतं पूर्यात्त्रिभिर्वा इति पूर्वकैः शरीरमस्याभिमृश्य मकलाव्याहृतीर्जपेत् पूजयेद्देवयत्नेन विष्णुक्रमणमाचरेत् आत्मयेदग्निनामान मनिस्कंहामाद शत् अग्निना तिः समिनि वैगतं ममभिपूरयेत् न चाद्यशेषसंस्कारो नाशौचं नोदकक्रिया अभ्यासयोगयुक्तानां शरीरं तु विनिक्षिपेत् स्याद्गस्ति नश्यगालाद्यैः कर्तुर्दोषो भवेद्यदि तस्मिन्देशेऽप्यनावृष्टिर्भवत्येव न संशयः यतीनां वहने चैव स्पर्शने च शरीरतः आशौचं नाधिगच्छेत अश्वमेधफलं लभेत् ज्ञातिपुत्रकलत्राणांपारिव्राज्ये मरणे सति नास्त्येव सूतकं तेषां स्नानमप्याचरेत्तु यतीनां मरणे प्रा सप्तपक्षस्पृष्टि नैविद्यते आशौचबुध्यास्नायेत नरकं प्रतिपद्यते अतः परे हनि परस्मिन्वाशिष्य वर्गैर्यथासंभवं वासुदेवादिचत्वारि पाण्युद्दिश्याराधनं कुर्यात्कृतो वा कृतो वा तस्य प्रेतत्वं नास्ति भवत्पूजार्थे शिष्यवर्गैः करणीयं अकरणे शिष्याणां किंचित्प्रत्यवायो पिकरणे महत्पुण्यं भवति एवं प्रति संवत्सरं शिष्यैर्यथाशक्त्या तस्मिन्नहनि समाराधनं कुर्यात् इति यतीसंस्कारः अथ नविकरणे महत्पुण्यं भवति ... अथ नवमूर्तिप्रतिष्ठाक्रमः पुण्याहवाचनं संकल्प्य अस्यां नवमूर्तौ शिल्पिना हस्तेन कारितं तस्य प्रतिष्ठार्थं संपूर्णसंनिधानसिद्ध्यर्थं स्वस्ति पुण्याहवाचनं करिष्यमाणं मंत्रोदकेरभिषेकः ततः पंचगव्यं पंचामृतस्नानं देवस्य पुरतः ईशान्यादि कोणेषु मध्ये कुंभान्संस्थाप्य स्योना पृथिवीतिभूमिं मार्जयेत् येनतो कायेति धान्यं आकलशेषु विनिकलशानि मंत्रयां इमं मे गंगे इत्युदकं तथा

स्म·रत्ना पाहि त्वं नो अग्ने स त्वं नो अग्ने इमं मे वरुण सर्वे समुद्रा इति सरिता वाहनं कुष्ठि मांसि हरिद्रा द्वे मुरा शैलेय चंदनी वचा कर्चोर मुस्ता
७१ चक्रातो बाधि समादरात् या ओषधीरित्योषधानि सहिरत्नानीति पंचरत्नानि उत्थानेति पंचमृत्तिका रूपेति भीमेति पंचत्वक् प्र
वो यक्षे ति पंचपल्लवानि गायत्र्या गोमूत्रं गंधद्वारेति गोमयं आप्यायस्वेति क्षीरं दधिक्राव्णेति दधि शुक्रमसीत्याज्यं देवस्य त्वे
ति कुशोदकं एतान्क्रमान्कलशे षु निक्षिप्य अष्टाक्षरेण मूलमंत्रेणाभिमंत्र्य पुरुषसूक्तेन शंखेनाभिषेकः ततो वस्त्रेण प्रोक्ष्य
जलाधिवासयेत् वरुणसूक्तं पवमानसूक्तं ततः पीठं गंधपुष्पादिभिः पूजयेत् ततो दिक्षु चंड प्रचंडादि पूजयेत् विमलादि
पूजयेत् गरुडादि चक्राद्यायुधानि पूजयेत् अंकुरार्पणं सर्वावरणदेवता पूजयेत् चतुर्द्वारेषु वेदपारायणं उत्तिष्ठेति मंत्रे
ण देवस्योत्थापनं कुर्यात् देवाय तैलाभ्यंगं मुद्गहरिद्राचूर्णेनोद्वर्तनं कुर्यात् उष्णोदकेनाभिषेकः पंचपल्लवादि पंचरत्नं
तुलसीपत्रसमन्वितपूर्णकलशं मूलमंत्रेणाभिमंत्र्य शंखेनाभिषेकः वस्त्रवेष्टनं नीराजनं गंधपुष्पादि दत्वा ततः अष्टदिक्षु
बलिं दत्वा नेत्रोन्मीलनं चित्रं देवानामिति दक्षिणनेत्रं तच्चक्षुरिति दक्षिणनेत्रं सुवर्णशलाकेन दर्पणं गां च फलानि मंगल
द्रव्याणि प्रदर्शयेत् यागवेद्यां प्रवेश्य तत्र धान्योपरि व्याघ्रचर्मणा संस्थाप्य कौशेयवाससाच्छाद्य तेन देवं प्रतिष्ठाप्य अंकुर
रोपणं देवस्य पश्चिमे भागे पंचयागादियुतानुअष्टौ पूर्णकलशान् अष्टदिक्षु मध्ये च संस्थाप्य मूलमंत्रेणाभिमंत्र्य पुरुषसूक्तहोमं कु
र्यात् पायसद्रव्येण अष्टोत्तरशतं ततः मूलमंत्रेणाज्यमष्टोत्तरशतं कृत्वा पूर्णाहुतिं कुत्वा अष्टकलशस्थितोदकेन शंखेनाभिषेकः
वासोविभूषणं उपनीतं गंधपुष्पनीराजनं अनेन देवप्रतिष्ठाप्य देवस्य मातृकान्यास तत्त्वन्यास अष्टाक्षरन्यास ध्यानश्लोक संनिधान जप
१०८ गंधपुष्पादि आवरणदेवता पूजयेत् धूपदीपनैवेद्यतांबूलं नीराजनं मंत्रपुष्पं शंखभ्रमणं नमस्कार प्रदक्षिणा नृत्यगीतादि यस्य ७१
स्मृत्या ब्राह्मणभोजनं इति नवमूर्ति प्रतिष्ठाक्रमः अथ गृहनिर्माणं न हस्तस्वक्रियाः सर्वा न सिध्यंति गृहं विना अतस्तस्मा
द्गृहारंभः प्रवेशसमयो बुधैः बाकृदीर्घपरिगुणितः धनाष्टकरणायव्ययआयनंदवसुस्तथा आयः ध्वजो धूम्रो धूम्र सिंहाश्व वृषभस्या

खरोगजः ध्वांक्षश्चेति क्रमेण तद्दायाष्टकम् दास्तः कीर्तिः शोको जयो वैरं धनं निर्धनता सुखं रोग श्चेति गृहारंभे ध्वजादीनां फलं क्रमात्
शिल्पशास्त्रे भाद्रत्रये शिरः प्राच्यां याम्यां मार्गशिरस्त्रये फाल्गुने त्रितये पश्चाद्वास्तुज्ये ष्ठत्रये उदक् ग्रंथांतरे वास्तुशीर्षं प्रवे
श्यामि प्रातरूत्तरशीर्षकं मध्याह्ने पूर्वशीर्षं च छायाती ते तु दक्षिणं संध्याकाले च रात्रौ च पश्चिमे शिर उच्यते धरित्री सुखो वास्तु पुरुषं त
मुखं समन्नतः शुभं प्रतिकूलमुखं सद्यः स्वरोगभयप्रदं प्रासादे षु च हर्म्येषु गृहेष्वन्येषु सर्वदा आग्नेयं प्रथमं स्तंभं स्थापयेत्तद्विधान
तः शेषः प्रदक्षिणेन स्तंभांश्चैव प्रतिष्ठाप्य शिरः खने मातृपितृक्षयो श्च पादौ खने स्त्री कुलगोत्रहानिः खनेच्च पृष्ठे भयरोगदुःखं स्त्री
पुत्रलाभो धनदौ च कुक्षिः वास्तोः शिरसि पृष्ठे च याम्यकुक्षौ च पृष्ठतः आयुः कामाः खनेनैव वामकुक्षौ खनिः शुभः वास्तुक्षेत्र प्रमाणं
च संध्यायित्वा स्ववामके कुक्षौ ज्ञात्वा विधायारोप्य वर्णेः पूरनस्ततः नारदः वास्त्वायमंगलं नाभितस्मान् मध्यगुलं त्रये कुक्षिस्तस्मिन्न्यसेच्छोकोपुत्र
पौत्रप्रवर्धयेत् ऊर्ध्वमात्रेयं त्यक्त्वा तद्द्वौ भागद्वयं तथा मध्ये नाभिं विजानीयादिति प्राह पराशरः यदा वामपार्श्वेन पूर्वशिराः शेते तदा पश्चिमपु
च्छं दक्षिणे क्रोडं तु तुनःपृष्ठं एवं सर्वत्र ज्ञेयं चिंतामणौ यत्र दैर्घ्यं गृहादीनां द्वात्रिंशत्स्थलतो धिकं न तत्र चिंतयेद्धीमान् गुणानायव्ययादि कं
नं द्वारनिर्णयः त्रिषु त्रिषु चराशीनां कन्यादीनां स्थितेरवौ पूर्वादिदिक्षु न कर्तव्यं द्वारं चैवं यथाक्रमं श्रीपतिः कर्किनक्रहरिकुंभगते कें पू
र्वपश्चिममुखानि गृहानि तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि गृहानि मीनचापमिथुनांगनागते कारयेन्नगृहमेवभास्करे
मांड्व्यः नवभागगृहं कृत्वा पंचभागं तु दक्षिणे त्रिभागं वामतः कृत्वा शेषं द्वारं प्रकल्पयेत् याम्योत्तरमुखं गेहे पश्चिमे तु कपाटकं प्राक्प
श्चिममुखं गेहे दक्षिणे तु कपाटकं ताक्ष्यमार्जारसिंहाश्वसर्पाखुगजमेषकः दिक्पतेरणाभिमंयोनिस्ववर्गे पंचमोरिपुः सौम्यफाल्गुन
वैशाखमाघश्रावणकार्तिकः मासास्युर्गृहनिर्माणे पुत्रपौत्रधनप्रदः दशम्येकादशी षष्ठी सप्तमी च त्रयोदशी पंचमी च तिथिः श्रेष्ठा
द्वितीया च तृतीयका आदित्यभौमवारं तु हित्वा वाराः शुभप्रदाः नक्षत्र उत्तरात्रितयं चित्रा रोहिणी स्वाति रेवती ज्येष्ठा मृगशिरो मूल
मश्विनी हस्त तिष्यकः मैत्रं चैत्रानि हस्तानि सर्वदा वास्तुकर्मणि रोहिणी मृगशिराक वासवोत्तरवैश्वमं श्रवणं चैव भान्यष्टौ शालाल
निग्रहकर्मणि ग्रंथांतरे मृगशिरकरपूष्यवाष्ठमित्रोत्तराप्रश्रवणादितिजले शावासवे दस्त्र पुष्यः वकृस्रुतधनं वतसंभया

म०र०कु
७२

चप्रतिष्ठामत्कळमुनिमतं स्यान्मान वानां गृहाणां· भूमिं दुष्टिं पुत्रहानिं पुरंध्रिनाशं मृत्युः संपदः शत्रुबाधा· किंचिल्लौख्यंशं भुक्तो
पादिकुर्यात्कुयोगे हमध्यमर्थक्षयं च· प्रवेशः गृहारंभादृतैमासैर्धिष्ण्यैर्वारैर्विशेद्गृहं· विशेत्सौम्यायने हर्म्यं तृणागारं तु सर्वदा·
माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनं· प्रवेशो मध्यमो ज्ञेयो नभः कार्तिकमासयोः· पुष्ये धनिष्ठा मृदुवासु मूला श्विनी विष्णु
अश्लेषा हस्तः एषां प्रविष्टो बहुपुत्र पौत्र जीवेत्सदा भूरि समागमश्च· मेषे याने घटे व्याधि धनहानिर्मृगे गृहे· वृश्चिके कर्कटे न
शः शेषलग्ने शुभं शोभनं अथ प्रयोगः स्वस्तिपुण्याहवाचनसंकल्प मम निर्मितनवमंदिरस्य स्थितिपुत्रकुलस्थर्थं वास्तुपूजां न
वमंदिरे वास्तुदेवतापूजार्थं स्वस्तिपुण्याहवाचनं करिष्यमाणाः नांदीश्राद्धं कुर्यात् ततः वास्तुपूजा मध्ये दृढकलसं पुन्नं पंच
पल्लवशोभितं खारीप्रमाणमात्रेण धान्यं च परिकल्पयेत्· तत्राष्टदलभागाग्रे धान्यराशीं प्रकल्पयेत् कुंभस्योपरि संस्थाप्य वस्त्र
युग्मेन वेष्टयेत् वास्तोष्पते इति मंत्रेण पूजा होमं च कारयेत्· इंद्रादिलोकपालांश्च तन्मंत्रेण पूजयेत्· स्तंभाभिमंत्रणमंत्रः वंश
माधीयमानिमतेन स्थूणामधिरोहं वंशो अग्नीषु आयुः प्रतरं दधानाः ईशान्यदेशे रंगवल्यादेक देशे पूर्वं वस्त्रं तत्र शिलास्थापनं
कं प्रतिष्ठाप्य· पृथिव्या अधिसंभरति मंत्रेण आरंगरेति मंत्रेण ऐतु राजेति मंत्रेण कुंभं पूरयित्वा ऐतु राजा वरुणो रेवतीभिस्मिं स्था
ने तिष्ठतु मोदमानाः· इरां वहंतो घृत मुक्षमाणा मित्रेण साकं सह संविशंतु· व्रीहीयवादि रुप्यानि निधाय च· भद्रान्नइति मंत्र द्वयेन गृहं गत
गिरमुवेक्ष्य· भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहित्वा· सनो मयोभूः पितवाविशेह शंनो भव द्विपदे शंचतुष्पदे· मंत्रः गृहवा
संसुमनसंप्रपद्ये वीरघ्नो वीरवंतः सुवीरान्· इरां वहंतो घृत मुक्षमाणा स्तेष्वहं सुमना संविशानीति विश्वे वंशं गृहं श्रयो सिति· अथ प्रागिशे देशे चंज
यित्वा· वास्तुपूजांस्तु निर्वर्त्य होमं कुर्यात्प्रयत्नतः अग्निस्थापनाद्याज्यभागांतं कृत्वा· अन्वाधानं अग्नीषोमौ चक्षुषी आज्येन वास्तोष्पते ७२
प्रधानदेवता चरुद्रव्येण स्विष्टकृतमित्यादि समाप्य· स्तंभपूजां गंधपुष्पादि· अर्थनामंत्रः वास्तुपुरुष नमस्तेस्तु भूशय्याभिरतप्र
भो· मद्गृहे धनधान्यादि समृद्धिं कुरु सर्वदा· एवं पूजां मुनिर्वर्त्य बलिदानं यथाविधि: बलिदानमंत्रः तद्गृहवस्त्रमाच्छाद्य तंतुभिर्वेष्टयेत्

पमतः त्र्यंबकं ज्ञानी इति सूक्तेन गृहं सूत्रवेष्टित्वा आपोहिष्ठेति सूक्तेन जलैः परिवृतं प्रोक्षयेत् ब्राह्मणान्भोजयित्वा शिववास्त्विति ब्र
चयेत् अनेन विधिना सम्यक् वास्तुपूजां करोति यः आरोग्यं पुत्रलाभं च धनं धान्यं भवेन्नरः एवं यः कुरुते सम्यक् सर्व वास्त्वनुसारतः प्रवे
शो बुद्धिमान्गृहे सर्व सौभाग्य संयुतं पुत्र पौत्रादि संयुक्तश्चिरकालसुखी भवेत् अकृत्वा वास्तुपूजायः प्रवेशं नवमंदिरे नानारोगान्विधान्क्ले
शान्स्तुते सर्वसंकटान् इति संक्षेपेण वास्तुप्रकरणं समाप्तं मघा च रेवती चैव कृत्तिका पुष्य एव च पूर्वाफल्गुनि हस्तर्क्षं मूलं चैव तु सप्तकं·
अग्निभौमेन संयुक्तं कूने चैव तु वेश्मनि· अग्निनादह्यते क्षिप्रं पुत्रहानि धनक्षयं· इति वास्तु· स्वमतं· त्रिवेदाब्धित्रिवेदाब्धि द्वित्रि मेषकर्क
नः शः ग्री· फ का नि· लक्ष्मीस्त्वउद्वसंस्थैर्यं लक्ष्मीदारिद्र्यता धने व्याधितस्य क्रमान्मृत्युः प्रवेशारंभयोरिह ३।४।४।३।४।४।२।३।

मुखे कं दिक्षु चत्वारि चत्वारो गर्भ एव च· श्रीवाश्चीणि गुदे त्रीणि सूर्यऋक्षात्	लक्ष्मी। उद्वास। स्थैर्य। लक्ष्मी। दारिद्र्य। धन। व्याधि। मृत्यु।
दिक्षु क्रमात्· मुखे कं स्वामिनं हंति पूर्वे उद्वसनं भवेत्· दक्षिणे चार्थनाशं च पश्चि मे श्रियसंपदः उत्तरे धनलाभं च गर्भे गर्भविनाशनं· चिरकाल	
वासं कंठे गुदे चायुष्यवर्धनं· मेषे व्याधिर्वृषे यानं धनहानिर्मृगे गृहे· वृश्चि	मुख १ पूर्व ४ दक्षिण ४ पश्चिम ४ उत्तर ४ गर्भ ४ श्रीवा ३ गुद ३
कं कर्कटे नाशः शेषलग्नेषु शोभनं गृहकर्मणि· सनत्कुमारः धिष्ण्योर्वि	स्वामिहं· उद्वास· अर्थनाशः· श्रियसंपदा· धनलाभः गर्भविनाशः·
बुधश्चंद्रस्यांतिर्यदैरवा च तुष्टयं· अश्विन्यादीनि ऋक्षाणि तत्र संस्थापयेत्क्र	चिरकालवासः· आयुष्यवर्धनं
मात्· ऊर्ध्वगं भुमं प्रोक्तं अधोऋक्षाणि निंदितं· चंद्रे रवौ स्थिते भानौ भयं शताधि	

निर्दिशेत्· भौमे मेषा शनि भयं वि द्या बुधे पुत्रविनाशनं· गुरौ भयं स्वगो हानिं भृगौ द्रव्यविनाशनं· सिंहिकेये भयं व्याधि केतौ च मरणं ध्रुवं· गृहकर्मणि तल्लि
ख्यं वर्ज्यं ये च्यो लिभं वदा·

कृ	त	र	आ	पु	पु	पू
पू·अ·						उ
उ·ऊ·						चि
पू·श्री·	—					स्वा
ध						वि
श्र	अ	अ	म	म	ज्ये	मू

सप्तशलाका रवे		
कृति·	श्रव·	आश्लेषा
अनु·	मघा·	भरणी·
विशा·	रेवती	धनिष्ठा

चक्रे पंचशलाका खास्क्रे कृत्तिकाद्यं न्यसेद्दक्षे पंचश्च वस्ताश्च पूरः एषे तत्रो भव

	मृग		चित्रा		धनिष्ठा	
रोह	आश्ले	ह	स्वा	अ	श्र	
कृ	पु	उ	वि	उ	पु	
भ	पु	पु	अ	पू	उ	
अ	अ	म	ज्ये	म		रे

स्म॰ रत्ना अथ कूपवापीप्रतिष्ठा पुण्याहवाचनं संकल्प्य यथाकारितं नवकूपस्य सर्वेषां प्राणिनां उपकारार्थं सर्वारिष्टशांत्यर्थं कूपप्रतिष्ठांगं स्वस्ति पुण्या
हवाचनं करिष्यमाणः तदादौ यथाशक्ति स्वर्णस्य प्रतिमां कारयित्वा आचार्यं वृणुयात् कूपपश्चिमतो होमं कुंडं कृत्वा पंच कलशा
७३ स्थाप्य पंचपल्लवं पंचमृत्तिका पंचरत्नं चतुः कोणेषु स्थापयेत् अनुक्रमेण कलशपूजां कुर्यात् सुवर्णेन मंडूकमत्स्यकूर्मरूपं कृत्वा
ग्रहत्कुंभेव स्वर्णवरुणप्रतिमां अयतेहेळो वरुणेति मंत्रेण षोडशोपचारपूजां कुर्यात् आचम्य प्राणायामसंकल्पः कूपप्रतिष्ठांग हव
नं करिष्ये तत्रान्वाधानं अग्नौ सोमो चक्षुषी आज्येन वरुणं प्रधानदेवता चरुद्रव्येण अपू देवता आज्य दधि सक्तु लाजा चरुद्रव्येणाग्नि
ष्टकृतमित्यादि सद्यो यक्ष्ये परिसमूहनाद्याज्यभागांतं कृत्वा ततः आज्यहोमं आपोहिष्ठेति नवर्चस्य सिंधुद्वीप ऋषिः आपो देवता
सप्ताद्या गायत्री पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ प्रधानाज्यहोमे विनि० अनेन आहुती हुत्वा अभ्यद्ंदं न मम आपो
अस्मानिति पंचर्चस्य देवश्रवा ऋषिः आपो देवता त्रिष्टुप् छंदः प्रधानाज्यहोमे अभ्याद समुद्राद्र्मिरित्येकादशर्चस्य सूक्तस्य वा
मदेव ऋषिः आपो देवता त्रिष्टुब् अंत्या जगती प्रधानाज्यहो० अष्ट० ततो दधिसक्तुहोमं प्रसुवआपइति नवर्चस्य सूक्त
स्य सिंधुक्षित् प्रियमेध ऋषिः आपो देवता जगती छंदः प्रधानदधिसक्तुहोमेन वा हुती हुत्वा वरुणाय एतेन वाहुता हुत्वा ततः
लाजाहोमं नहि तेक्षत्रमिति विंशतिऋचस्य शुनःशेप ऋषिः वरुणो देवता दशाद्यास्त्रिष्टुभो गायत्र्यः प्रधानलाजाहोमे वि० एतैर्वि
शत्याहुती हुत्वा वरुणाय ततः चरुहोमं प्रसमाजे बृहदित्यष्टर्चस्य सूक्तस्य कूर्मो वार्ष्य ऋषिः आपो देवता त्रिष्टुप् छंदः प्रधानच
रुहोमे वि० एतैरष्टचर्वाहुती हुत्वा वरुणायेदं एवं चतुर्विधप्रधानहोमं कुर्यात् ततः स्विष्टकृतादिहोमशेषं समापयेत् पूर्णम
स्यादिति नैवेद्यांतं प्रपूजयेत् आचार्यो ब्रह्मकलशं पूजयेत् आचार्यो मध्यकलशं पूर्णं गृहीत्वा पंचमिश्रकलशसहितं कूपमध्ये
उदकधारां कारयित्वा मत्स्यकूर्मादिसहितं प्रक्षिपेत् शं नो देवीरिति सूक्तं जपेत् उदकं प्रक्षिपेत् तत्कलशमध्ये कूपोदकं नी
त्वा सर्वजनं प्रोक्षयेत् तत्कलशमध्यगत दुग्धानि पूरयित्वा सवस्त्रं सवरुणप्रतिमां गुडमिश्रितं आचार्याय दद्यात् हिरण्यवस्त्र ७३
गोदानं दक्षिणां भूरि दानं दद्यात् य इदं कुरुते भक्त्या कूपतडागादि विधानतः जन्मप्रभृति तस्य श्रीः न कदाचिद्विमुंचति इति कूपोद्यापनं

अथ वनभोजनविधिः द्वादश्यां वा चतुर्दश्यां पौर्णिमास्यां अथापि वा पंचम्यां वा सह प्रज्ञां वनभोजनं समाचरेत् सर्वोपस्क
रसंयुक्तो भृत्यबालैः समावृतः वनं प्रवेशयेत् स्त्री मानुधात्रीवृक्षैश्च शोभितं अश्वत्थैर्बकुलैस्तथा अश्वत्थैर्मुचुकुंदैः कदंबकैः न्यग्रोधै
स्त्रिभिः पिंडवृक्षैः समंतात्समशोभितं तत्र गत्वा महाप्राज्ञः पुण्याहं वाचयेत् सुधीः ब्रह्मपूर्वं तथा पूजां धात्रीमूले तु कारयेत् वेदिकां
चतुरस्रां च हस्तमात्रां सुतां शुभां तथोपवेदिकां कृत्वा वेदिकाग्रे महामते उपवेशाय देवस्य धोलं कायांनु धातुभिः वेदिकायाः
पश्चिमे तु कारयेत् कुंडमंडलं मेखलात्रयसंयुक्तं पिप्पलाच्छदसंयुतं हस्तमात्रायतासौम्या मे कुंडं तु कारयेत् पश्चात्स्नानं तथा बाह्ये
देवपूजां समाचरेत् पश्चादग्निं समाराध्य होमं कुर्याद्यथाविधिः धात्री शांती तथा कांती मथाप्रकृति मेव च विष्णुपत्नी महालक्ष्मी रमामा
कमला तथा सावित्री वा जगद्धात्री गायत्री सुधृतिस्तथा अव्यक्ता विश्वरूपा च सुरूपाच्छि संभवा पृथ्वी देवतां त्यांत्वां लाजाहोमं स
माचरेत् तस्मिन्नेव हि कुंडे तु एभिर्मंत्रैश्च ब्रेहुधः संसृष्टमिति मंत्रेण ऋषभमेति मंत्रतः अपूपगुडसूपाभ्यां संयुतं तु कुर्यात्सुविः धा
त्री होमं महाप्राज्ञ लाजाहोममनु पायसं पूर्णाहुतिं ततो हुत्वा होमशेषं समापयेत् धात्रीवृक्षस्य परितो वेदिकासंयुतस्य च सूत्रेण गुडमि
श्रेण बलिं पश्चान्निवेदयेत् देवि धात्रि नमस्तुभ्यं गृहाण बलिमुत्तमं मिश्रितं गुडसूपाभ्यां सर्वमंगलदायिनि पुत्रान् देहि महाप्रज्ञां
यशो देहि निरंतरं प्रज्ञां मेधां च सौभाग्यं विष्णुभक्तिं च देहि मे निरोगं कुरु मां नित्यं निष्पापं कुरु सर्वदा वर्चस्वं कुरु मां देवि धनवंतं त
था कुरु इति तां प्रार्थितां देवि प्राक्षिण्यां दत्त्वा विन्यसेत् बलिप्रदानकाले तु ये कुर्वंति प्रदक्षिणां तेयांति विष्णुसालोक्यं पितृभिः सार्ध
मेव च धात्रीवृक्षस्यमूलस्थं मंदस्मितं रमापतिं तेयांति विष्णुसायुज्यं ये पश्यंति हि चक्षुषा वैश्वदेवं ततः कृत्वा पूजयेद्गुनर्देवतां गंधा
क्षतां ततो दत्त्वा विप्रेभ्यः प्रसंभव ब्राह्मणान्भोजयेत्स्वस्वात्स्वयंभुंजीत बंधुभिः गृहं प्रवेशयेत्पश्चाद्वृद्धबालादिकैः सह ब्रह्मचारी
भवेद्रात्रौ क्षितिशायी भवेत्तथा सर्वपापविनिर्मुक्तो वनभोजनमुत्तमं कृते वसकलं कर्म विष्णवे च समर्पयेत् अश्वमेधसहस्रेषु रा
जसूयशतेषु च तत्फलं समवाप्नोति यत्फलं वनभोजनात् इति पंचरात्रागमे भारद्वाजसंहितायां ब्रह्महंससंवादे क्रियापादे उत्सवकां

स्मृ॰ रत्ना॰ उ कार्तिकोत्सव वन भोजन विधिर्नाम पंचत्रिंशोऽध्यायः ॥ अथ पराकविधिः ॥ द्वादशाहोपवासेन पराकः परिकीर्तितः । निर्जलेषूप
वासेषु सप्तपराकसंज्ञकं । आद्यस्त्रिदिनमध्ये तु पयः पलार्धकं । ततस्त्रिदिनमध्ये तु दधिपानं पलार्धकं । तृतीयदिनमध्ये तु नारि
७४ केलांबु तथा । अंते तु त्रिदिनं प्राश्ने जीवेच्छ करया बुधः । सर्वं पलार्धकं ग्राह्यं नाधिकं प्राशयेत्क्वचित् । एवं कुर्याद्द्वादशदिने सार्धप
राकसंज्ञकं । इति पराकव्रतं ॥ अथैकभक्तः ॥ यथान्नकाले भोक्तव्यः कालस्तानेभवेद्यदि । उपवासद्वयं तानि एकभुक्तं पवकाल उच्य
ते ॥ तथा अहस्त्रयं द्विरात्रं च कुर्यादित्यानुपोषणं । त्रिरात्र्यां पारणं कुर्याद्दृष्ट्वा नक्षत्रमंडलं । स्नाने देवार्चनं कृत्वा मध्याह्ने होममा
चरेत् । अतो देवेति मंत्रेण समिधं पिप्पलोद्भवं । जुहुयादष्टोत्तरशतं देवेभ्यो घृतसंयुतं । इदं विष्णुरिति त्र्यृचा विष्णवे जुहुयाद्घृतं । तदष्ट
ोत्तरशतं पंचविंशतिनामभिः । जुहुयात्सायसान्नं तु महाव्याहृतिभिस्तिलान् । ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ इति प
क्षकाकव्रतं ॥ अथ यावकव्रतं ॥ गोपुरीषाद्यवान्नं च मासं नित्यं समाहितः । व्रतं तु यावकं कुर्यात्सर्वपापप्रणाशनं ॥ गोभक्षणोर्ध्वयवान्
त्यागो मयमध्ये स्थितान्यवानाहीत्वा नैर्यवैश्चरुं श्रपयेत् । तेनान्नेनैकभुक्तानि कुर्वन्मासं नयेद्व । एतद्यावकव्रतमित्युच्यते । अत
एवाह याज्ञवल्क्यः । अतः सा श्रावयित्वा गां गोधूमान्यवमिश्रितान् । गोमयोत्थांश्च तन्नपचेत्तन्मूत्रे यावकमिति ॥ इति यावकव्रतं ॥
अथ आकाशदीपः ॥ तुलायां तिलतैलेन सायं संध्यासमागमे । आकाशदीपं यो दद्यान्मासमेकं निरंतरं । सश्रीकां मश्रियं नेन सश्रियोन
विमुच्यते । तैलनिर्णयः । एषु के घृततैलेषु संमिश्रं वगवाघृतं । दीपं प्रज्वालयेद्द्विजो दौ सुभे रंडकं विना ॥ इति दीपतैलनिर्णयः ॥ अथ लक्षनम
स्कारः ॥ आषाढस्य सिते पक्षे एकादश्यां समाहितः ।
गोधूमतंडुलैः । देवजगन्नाथ सर्वक्रतुफलप्रद । व्रतेनानेन देवेश गृहाणार्घ्यं मयार्पितं । इति चार्घ्यत्रयं दत्वा पश्चाद्धोमं समाचरेत् । पौरुषेये
न सूक्तेन शतमष्टोत्तरं चरुं । ब्राह्मणान्भोजयेत्पश्चात्त्रिंशतिपंचवा ॥ इति भविष्योत्तरपुराणे लक्षनमस्कारविधिः ॥ अथ लक्षप्रदक्षि ७४
णा ॥ श्रीकृष्ण उवाच । बोधितो वरेणाथ पापमोक्षनकारकं । प्रदक्षिणा नाम व्रतं यः कृत्वा सुखदुर्लभं । स्वस्तिवाचनसंपूज्य कार्तिक
पंचनादिनं । संवत्सरविधानेन तृप्तिं तं फलश्चार्चयेत् । कृत्वा तु विष्णुगायत्र्या शतमष्टोत्तरं चरुं । फलशाचनं तथा दद्यादाचार्याय सदक्षि

णां । ब्राह्मणान्भोजयेत्पश्चाद्दद्यात्तेभ्यश्च दक्षिणां ॥ इति विष्णुधर्मोत्तरे लक्षप्रदक्षिणाविधिः ॥ अथ धारणापारणं ॥ आषाढे मासि सित
र्यां ते चातुर्मास्ये तथापि च । एकस्मिन्धारणं कार्यं पारणं च ततः परं । उपवासो धारणं स्यात्पारणं भोजनं भवेत् । समाप्ते मासि राजेंद्र कु
र्यादुद्यापनं बुधः । उपवासदिने प्राप्ते पुण्याहं कारयेत्ततः । आचार्यं वरयेत्पश्चाद्ब्राह्मणांस्तु ततः परं । कुर्यात्तु प्रतिमां पश्चाल्लक्ष्मीनारायणस्य
वे । पूर्णकुंभे तु संस्थाप्य प्रतिमां तास्त्रिभूमिपे । रात्रौ जागरणं कृत्वा पुराणपठनादिभिः । प्रातःकाले समायाते ब्राह्मणांस्तु निमंत्रयेत् । प
श्चादग्निं समाधाय होमं कुर्याद्यथाविधि । विष्णुरीदेति मंत्रेण जुहुयाद्घृततिलौदनं । अरायि काणे इति मंत्रेण जुहुयाच्च तिलौदनं । अष्टाक्षरेण मं
अष्टाक्षरेण मंत्रेण पायसं जुहुयात्ततः । लक्ष्मीनारायणो देवो स्थानत्रयेऽपि देवताः । पूर्णाहुतिं ततो हुत्वा होमशेषं समापयेत् । ब्राह्म
णान्भोजयेत्पश्चादाचार्यं पूजयेत्ततः ॥ इति भविष्योत्तरपुराणोक्तधारणापारणसंपूर्णं ॥ अथ महादीपदानं ॥ श्रृणु देवि प्रवक्ष्यामि व्रतानां
मुत्तमं व्रतं । महादीपव्रतं पुण्यं सर्वपापप्रणाशनं । सर्वव्रतानां परमं रहस्यं मुक्तिदायकं । तदहं कीर्तयिष्यामि श्रृणुष्वैकाग्रमानसः । संक्रांतौ मरणे पु
ण्ये पौर्णिमा कार्तिके तथा । स्नात्वा नद्यां शुचिर्भूत्वा संध्यावंदनपूर्वकं । नवाढकान्यं गोपिं च देवदेवस्य संनिधौ । स्नात्वा पंचामृतैस्तत्र षोडशैरुपचार
कैः । महोपहारकं कुर्यात्ततस्त्वादीपं प्रपूजयेत् । फलैस्तु नवभिर्वर्तिं कृत्वा देवस्य संनिधौ । शालिभिर्वास्यपात्रं तु तिलैः प्रस्थैस्तु वा तथा । दक्षाजिषुच
सर्वेषु एकस्मिन्वत्सरेऽपि वा । यदा संक्रांतिकालस्या त्वोर्णम्यां तु यथाशुचिः । दीपदानं तु यः कुर्यात्सर्वपापैः प्रमुच्यते । कुंकुमात्तमुख्यत्यविष्णुसा
युज्यमाप्नुयात् । महादीपफलं देवी कीर्तयद्यः श्रृणोति यः । न लिप्यते सर्वदोषैः किमुतेव्रतचारिणात् । पुत्रकामो लभेत्पुत्रान्धनकामो धनं लभेत्
॥ इति पुराणोक्तमहादीपदानं ॥ अथाधि
वायुपुराणे । कार्तिके तु शुभे मासि दीपदानं प्रशस्यते । परदीपप्रदीप्ताक्षः प्रज्वलन्स्वर्गमाप्नुयात् ॥
मासे प्रथमाह्निक श्राद्धविचारमाह । आह्निके प्रथमं यस्मात्तत्कुर्वन्तमलिम्लुचे मिस्मरणात् । तथा हारीतेऽपि । असंक्रांते यत्कर्तं प्रमाहिकंप्र
धर्मं द्विजैरिति । शुक्लमासप्रमितानां प्रथमाह्निकं मलमासेऽपि कर्तव्यं । तथा च भृगुः । शुक्लमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरं । मलमासेऽपि कर्त
व्यं नान्येषां तु कदाचन । तथा च मनुः । अग्न्याधानं प्रतिष्ठां च यज्ञदानव्रतानि च । वेदव्रतवृषोत्सर्गचूडाकरणमेखला । मांगल्यमभिषेकं
च वत्सरप्रथमं तथा । मलमासे पितान्सर्वा वर्जयेद्देवदर्शनमिति । श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः । त्रयोदशेऽपि सर्वासां

स्मृ०रत्ना० निष्फला इति कीर्तिताः तस्मिन्न्रयोदशो मासि कुर्यात्तान्न कदाचन इति स्मृतिरत्नाकरः समाप्तः शुभं भवतु श्रीशके १७२१
७५ सिद्धार्थिनाम संवत्सरे भाद्रशुक्लत्रयोदश्यां सांड्योपनामक हरिभट्टेन स्मृतिरत्नाकरपुस्तकं लिखितं स्वार्थं च परार्थं च

इति स्मृतिरत्नाकरः समाप्त ४ श्रीः